CC-0. In Public Domain. Digitization by eGangotri

श्रीः · अथापरान्तस्थानामाद्यस्य पदादिस्थस्यान्यहलसंयुक्तस्य संयुक्तस्य रेफोष्मा
भ्यामकारेणाचा विशेषेणादिमध्यावसानेषूच्चारणेजकारोच्चारणम् · इति प्र
तिज्ञापरिशिष्टसूत्रम् · द्विर्भावेष्वेव · प्रतिज्ञा०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यतइन्द्र भया महे ततोनोअभयंकृधि · मघवन्छग्धिसवतन्नऊतिभिर्दिद्योविश्वधोजहि ।
त्वंहिराधसोमहः क्षयस्यासिविधतः · तन्त्वावयंमघवन्निन्द्रगिर्वणः सुतावंतोहवा
महे २ इन्द्रः स्वर्षुतद्वत्रहापरस्यानोवरेण्यः · सनोरक्षिषच्चरमं समध्यमं सपश्चात्पातुनः
पुरः · ३ त्वंनः पश्चादधरादुत्तरात्पुरइन्द्रनिपाहिविश्वतः · आरेअस्मद्गृणहिदैव्यंभय
मारेहेतीरदेवीः ४ अद्याद्याश्वःश्वइन्द्रत्राश्वपरेचनः · विश्वाश्चनोजरितॄन्नसत्पतेअहा
दिवानक्तंचरक्षिषः ५ प्रभंगीशूरोमघवाभूवीमघः संमिश्लोवीर्यायकं · उभातेबाहू वृषणा
शतक्रतोनियावज्रंमिमिक्षतुः · ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४०२२

श्रीगणेशाय नमः ॥ ॥ अथ मानसागरीपद्धतिः प्रारभ्यते ॥ ॥ स्वस्तिश्रीशुद्धिवृद्धिर्जयोमङ्गलाभ्युदयश्च ॥ ॥ स्वस्तिश्रीसौख्यधात्रीसु
तजयजननीतुष्टिपुष्टिप्रदात्रीमाङ्गल्योत्साहकर्त्रीगतभवसदसत्कर्मणांव्यञ्जयित्री ॥ नानासम्पद्विधात्रीधनकुलयशसामायुषांवर्द्धयित्रीदुष्टापद्विग्रह
त्रीगुणगणवसतिर्लिख्यतेजन्मपत्री ॥ १ ॥ श्रीआदिनाथप्रमुखाजिनेशाःश्रीपुण्डरीकप्रमुखागणेशाः ॥ सूर्यादिखेटर्क्षयुताश्चभावाःशिवायसन्तु
प्रकटप्रभावाः ॥ २ ॥ दशावतारोभुवनैकमल्लोगोपाङ्गनासेवितपादपद्मः ॥ श्रीरामचन्द्रःपुरुषोत्तमोयंऽददातुवःसर्वसमीहितंमे ॥ ३ ॥ श्रीमान
स्मानवतुभगवान्पार्श्वनाथःप्रियंवोश्रेयोलक्ष्म्यांक्षितिपतिगणैःसादरंस्तूयमानः ॥ भर्त्तुर्यस्यस्मरणकरणात्तेपिसर्वेविवस्वन्मुख्याःखेटाददतुकुशलंसर्व
दादेहभाजाम् ॥ ४ ॥ सूर्यःशौर्यमुखेंदुरुच्चपदवींसन्मंगलमंगलःसद्बुद्धिंचबुधोगुरुश्चगुरुतांशुक्रःसुखंशंशनिः ॥ राहुर्बाहुबलंकरोतुविपु
कुलस्योन्नतिंनित्यंप्रीतिकराभवंतुभवतांसर्वेप्रसन्नाग्रहाः ॥ ५ ॥ कल्याणङ्कमलासनःसभगवान्विष्णुःसजिष्णुःस्वयंप्रालेयाद्रिसुतापतिःसुतन
नंचनिर्विघ्नताम् ॥ चंद्रज्ञास्फुजिदार्किभौमाधिषणच्छायासुतैरन्विताज्योतिश्चक्रमिदंसदैवभवतामायुश्चिरंयच्छतु ॥ ६ ॥ सूर्योयच्छतुभू
पतिःप्रीतिंपरातन्वतामांगल्यंविदधातुभूमितनयोबुद्धिंविधत्ताबुधः ॥ गौरंगौरवमातनोतुचगुरुःशुक्रःसशुक्रार्थदःसौरिर्वैरिविनाशनंवितनु
सैंहिकः ॥ ७ ॥ श्रीमान्पङ्कजिनीपतिःकुमुदिनीप्राणेश्वरोभूमिभृःशाशांकिःसुरराजवंदितपदोदैत्येंद्रमंत्रीशनिः ॥ स्वर्भानुःशिखिनां
तिब्रह्मेशलक्ष्मीधरास्तंरक्षंतुसदैवयस्यविमलापत्रीत्वियंलिख्यते ॥ ८ ॥ कृतंमयानोदकयंत्रसाधनंनक्षणंचापिनशंकुधारणम् ॥ परे
वबोधकंविलिख्यतेजन्मफलंनराणाम् ॥ ९ ॥ ललाटपट्टेलिखिताविधात्राषष्ठीदिनेयाक्षरमालिकाच ॥ तांजन्मपत्रींप्रकटींविधत्तेदीपोयथा

अमुकरा
शुद्धौ शु
घटीपलाक्षर
पलसूर्यपुरु
अमुकयाज
मुकनक्षत्रेऽ
म्मादाही

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाधकारे ॥ १० ॥ यावन्मेरुर्धरापीठेयावच्चंद्रदिवाकरौ ॥ तावन्नंदतुबालोसौयस्यैषाजन्मपत्रिका ॥ ११ ॥ यस्यनास्तिकिलजन्मपत्रिकाय
शुभफलप्रदर्शिनी ॥ अंधकंभवतितस्यजीवितंदीपहीनमिवमंदिरंनिशि ॥ १२ ॥ वंशोविस्तारतांयातुकीर्तिर्यातुदिगंतरे ॥ आयुर्विपुल
स्यैषाजन्मपत्रिका ॥ १३ ॥ यंब्रह्मवेदांतविदोवदंतिपरंप्रधानंपुरुषंतथान्ये ॥ विश्वोद्गतेःकारणमीश्वरंवातस्मैनमोविघ्नविनाशनाय ॥ १
दित्याद्याग्रहाःसर्वेसनक्षत्राःसराशयः ॥ सर्वान्कामान्प्रयच्छंतुयस्यैषाजन्मपत्रिका ॥ १५ ॥ जननीजन्मसौख्यानांवर्धनीकुलसंपदाम् ॥
पूर्वपुण्यानांलिख्यतेजन्मपत्रिका ॥ १६ ॥ एकदंतोमहाबुद्धिःसर्वज्ञोगणनायकः ॥ सर्वसिद्धिकरोदेवोगौरीपुत्रोविनायकः ॥ १७ ॥ ब्रह्म
तुदीर्घायुर्विष्णुःकुर्याच्चसंपदम् ॥ हरोरक्षतुगात्राणियस्यैषाजन्मपत्रिका ॥ १८ ॥ गणाधिपोग्रहाश्चैवगोत्रजामातरोग्रहाः ॥ सर्वेकल्याण
न्तुयस्यैषाजन्मपत्रिका ॥ १९ ॥ कल्याणानिदिवामणिःसुललिताङ्कान्तिकलानांनिधिर्लक्ष्मींक्ष्मातनयोबुधश्चबुधतांजीवश्चिरंजीविताम् ॥
ज्यंभृगुजोऽर्कजोविजयतांराहुर्बलोत्कर्षताकेतुर्यच्छतुतस्यवांच्छितमियंपत्रीयदीयोत्तमा ॥ २० ॥ श्रीजन्मपत्रीशुभदीपकेनव्यक्तंभवेद्भाविफलंस
मग्रम् ॥ क्षपाप्रदीपेनयथागृहस्थंघटादिजातंप्रकटत्वमेति ॥ २१ ॥ येकुर्वंतिशुभाशुभानिजगतांयच्छंतियेसंपदोयेपूजाबलिदानहोमविधिभिर्निघ्नं
तिविघ्नानिच ॥ येसंभोगवियोगजीवितकृतःसर्वेश्वराःखेचरास्तेतिग्मांशुपुरोगमाग्रहगणाःशान्तिम्प्रयच्छंतुवः ॥ २२ ॥ येनोत्पाट्यसमूलमंदिरगि
रिश्छत्रीकृतोगोकुलेराहुर्येनमहाबलीसुररिपुःकायार्द्धशेषीकृतः ॥ कृत्वात्रीणिपदानियेनवसुधाबद्धोबलिर्लीलयासत्वांपातुयुगेयुगेयुगपतिस्त्रैलोक्य
नाथोहरिः ॥ २३ ॥ पूषापुष्टिन्दिशतुसततंसंततिंशीतरोचिर्भौमोभाग्यंसितकरसुतःशातिमांगल्यनित्यम् ॥ जीवोराज्यंचिरशुभगतांभार्गवोभूमि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पात्रंराहुःसौख्यंशिखिनइतितेकीर्तिमभ्रंलिहाच ॥ २४ ॥ ग्रहाराज्यंप्रयच्छन्तिग्रहाराज्यंहरन्तिच ॥ ग्रहैर्व्याप्तमिदंसर्वंत्रैलोक्यंसचराचरम् ॥ २५ ॥
उमागौरीशिवादुर्गाभद्राभगवतीतथा ॥ कुलदेव्यथचामुंडारक्षंतुबालकंसदा ॥ २६ ॥ अविरलमदजलनिवहंभ्रमरकुलानीकसेवितकपोलम् ॥ अ
भिमतफलदातारंकामेशंगणपतिंवंदे ॥ २७ ॥ ॥ इतिजैनवैष्णवीप्रशस्तिः ॥ ॥ यःपश्चिमाभिमुखसंस्थितविद्यमानोह्यव्यक्तमूर्तिपरिवर्तित
विश्वभोगः ॥ दुर्लक्ष्यविक्रमगतिःकृतकर्मलक्ष्योराज्यश्रियंदिशतुवोरहमाणएषः ॥ ॥ इतियावनीप्रशस्तिः ॥ ॥ अथाग्रेपद्धतिः ॥ ॥ अथ
श्रीमन्नृपविक्रमार्कराज्यादमुकसंवत्सरेऽमुकशाकेकरणगताब्दाधिकमासावमदिनाहर्गणामुकायनामुकगोलगतेश्रीसूर्येऽमुकऋतावमुकमासेऽमुक
पक्षेऽमुकतिथावमुकवासरेघटीपलामुकनक्षत्रेघटीपलामुकयोगेघटीपलामुककरणेऽत्रदिनेसूर्योदयाद्दिनगतघटीपलामुकराशिस्थितेश्रीसूर्ये अमुकरा
शिस्थितेचंद्रेअमुकराशिस्थितेभौमेबुधेगुरौशुक्रेशनौराहौकेतौवा अमुकराशिनवांशेऽमुकलग्नाधिपतावमुकराश्यधिपतौएवंपुण्यतिथौपंचांगशुद्धौ शु
भग्रहनिरीक्षितकल्याणवत्यांवेलायांतात्कालिकामुकलग्नोदयेसंक्रांतिगतांशघटीपलायनांशाः घटीपलमिश्रप्रमाणघटीपलदिनार्द्धप्रमाणघटीपलाक्षर
निशार्द्धप्रमाणघटीपलाक्षरदिनप्रमाणघटीपलरात्रिप्रमाणघटीपलसंमीलनेऽहोरात्रिप्रमाणघटीपलरविभोग्यलंकोदयाद्गतघटीपलेउन्नतघटीपलसूर्यपुरु
षाकारनक्षत्रंअमुकस्थानेपतितं तत्रकैलासगिरिशिखरेउमामहेश्वरसंवादे विंशोत्तरीदशाप्रमाणेनादावमुकदशामध्येजन्मामुकसंध्यायां अमुकयाज
केषु वंशोद्भवगंगानीरपवित्रोपमामुकान्वयेऽमुकगोत्रेऽमुकपुत्रेअमुकगृहेभार्याऽमुकनाम्नीपुत्ररत्नमजीजनत् ॥ अत्रहोराशास्त्रप्रमाणेनामुकनक्षत्रेऽ
मुकचरणेऽमुकाक्षरेऽमुकस्वरेऽमुकयोनावमुकनाड्यामुकगणेऽमुकवर्णेऽमुकवर्गे ऽमुकयुंजाया तस्य चिरंजीवामुकनामप्रतिष्ठितं सचजिनप्रसादाद्दी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्घायुर्भवतु ॥ ॥ अथजन्मकुंडली ॥ ॥ कलियुगफलम् ॥ ॥ संवत्सरफलायनफलगोलफलऋतुफलमासफलपक्षफलतिथिफलवारफल
दिनजातफलरात्रिजातफलयोगफलकरणफलगणफलयोनिफलवारायुर्लग्नफलांशफलाग्रे चंद्रकुंडलिकाचक्रंचंद्रकुंडलीफलम् ॥ चंद्रात्फलराश्यायुः
र्भावसाधनार्थंसूर्यादिकमध्यमसूर्यादिकस्पष्टसूर्यादिकतात्कालिकभावचक्रविधिफलसूर्यादीनांभावविश्वोपकभावोक्तफलद्वादशभुवनेनवग्रहाणां
द्वादशभुवननिरीक्षणविधिःद्वादशभुवनेनवग्रहाणांफलम् द्वादशभुवनेशफलं द्वादशभुवनेद्वादशलग्नफलं द्वादशलग्नानांस्वामिफलं षड्वर्गमैत्रीच
क्रंषड्वर्गकुंडलीचक्रं पंचमहापुरुषयोगीफलं सुनफाऽनफादुरधराकेमद्रुमवोसिवेस्युभयचरीयोगिनीफलरागयोगद्वादशायुरगतिगतिनवग्रहचक्रनव
ग्रहफलदीप्तस्वस्थनवप्रकारग्रहफलम् ॥ अरिष्टभंगराजयोगगजचक्रम् ॥ अश्वचक्रम् ॥ शतपदचक्रम् ॥ सूर्यकालानलचंद्रकालानलयमदंष्ट्रात्रि
नाडीयंत्रसर्वतोभद्रचक्रम् ॥ चंद्रावस्थाचक्रंरश्मिचक्रंरश्मिफलंचतुर्विंशतिबलचक्रम् ॥ अष्टवर्गाष्टवर्गफलंसर्वाष्टकवर्गचक्रम् ॥ मैत्रीचक्रंमहादशाफलं
विंशोत्तर्यष्टोत्तरीसंध्यापाचकचक्रमन्तर्दशाचक्रमन्तर्दशाफलमुपदशाचक्रमुपदशाफलम् ॥ ॥ इतिजन्मपत्रीविधिः ॥ तत्रप्रथमंशाकानयनं खंड
खाद्योक्तम् ॥ विक्रमादित्यराज्यस्यपंचत्रिंशोत्तरंशतम् ॥ पातयित्वाभवेच्छाकंचैत्रार्द्धात्तिथयःस्मृताः ॥ १ ॥ ॥ इतिशाकः ॥ ॥ तदनंतरं
करणगताब्दाधिकमासाऽवमासाऽहर्गणाद्यायस्मिन्ग्रंथमतेज्ञायंतेतस्मिन्नेवग्रंथेविलोक्यलेख्यम् ॥ तदग्रेयुगानयनम् ॥ द्वात्रिंशत्सहस्राणिकलौल
क्षचतुष्टयम् ॥ वेदा ४ ग्नि ३ नेत्रै २ र्गुण्यंहिकृतंत्रेताचद्वापरम् ॥ ॥ इतियुगानयनम् ॥ ॥ तत्रकलियुगफलम् ॥ ॥ पापात्मादुःखसंयुक्तो
धनहीनोयशवर्जितः ॥ दुष्टबुद्धिर्दुराचारोजायतेचकलौयुगे ॥ इतिकलियुगजातफलम् ॥ ॥ अथप्रभवादिषष्टिसंवत्सरानयनविधिः ॥ प्रभवो १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विभवः २ शुक्लः ३ प्रमोदोथ ४ प्रजापतिः ५ ॥ अंगिराः ६ श्रीमुखो ७ भावो ८ युवा ९ धाता १० तथैवच ॥ ईश्वरो ११ बहुधान्यश्च
१२ प्रमाथी १३ विक्रमो १४ वृषः १५ ॥ चित्रभानुः १६ सुभानुश्च १७ तारणः १८ पार्थिवो १९ व्ययः २० ॥ सर्वजित् २१ सर्वधारीच २२
विरोधी २३ विकृतिः २४ खरः २५ ॥ नंदनो २६ विजयश्चैव २७ जयो २८ मन्मथ २९ दुर्मुखौ ३० ॥ हेमलंबी ३१ विलंबीच ३२ विकारी
३३ शार्वरी ३४ प्लवः ३५ ॥ शुभकृत् ३६ शोभनः ३७ क्रोधी ३८ विश्वावसु ३९ पराभवौ ४० ॥ प्लवंगः ४१ कीलकः ४२ सौम्यः ४३ साधारण
४४ विरोधकृत् ४५ ॥ परिधावी ४६ प्रमाथीच ४७ आनंदो ४८ राक्षसो ४९ नलः ५० ॥ पिंगलः ५१ कालयुक्तश्च ५२ सिद्धार्थी ५३ रौद्र
५४ दुर्मती ५५ ॥ दुंदुभी ५६ रुधिरोद्गारी ५७ रक्ताक्षी ५८ क्रोधनः ५९ क्षयः ६० ॥ ॥ इतिषष्टिसंवत्सरनामानि ॥ ॥ शाकेंद्रकालः
पृथगाकृतिघ्नः २२ शशांकनंदाश्वियुगैः ४२९१ समेतः ॥ शराद्रिवस्विंदु १८७५ हतःसलब्धःषष्ट्याप्तशेषेप्रभवादयोष्टौ ॥ १ ॥ अस्यार्थः ॥
शाकविहुठामेंमांडीजैहेठलानै २२ गुणाकीजै ४२९१ इतराअंकमाहेमोडिदीजेभाग १८७५ लीजै लब्धांकउपरलाशाकमध्येजोडणाशेषांकरहणा
दीजैउपरिलानैभाग ६० कादीजे लब्धांकपरिवर्तिकहिएसाठि ६० भागदीधापछेजोशेषअंकरहेइतिणमांहि १ अवरजोडिये पहलेप्रभवादिगणी
यैअठारइसपंचहुत्तरी १८७५ भागदीधापछेजोअंकरह्याथासुद्धादशगुणाकीजैभाग १८७५ इनकादीजैलब्धमास ॥ शेषंत्रिंशद्गुणं ३० भाग
१८७५ लब्धंदिनेशेषंषष्टि ६० गुणंभाग १८७५ लब्धंघटीशेषंषष्टि ६० गुणंभाग १८७५ लब्धंपलपायासुगतमासदिनेघटीपलसंवत्सरकाकहणा
द्वादशमध्येशोधणा शेषरहै सुचैत्रशुक्लप्रतिपदादिभोग्यमासघटीपलसंवत्सरकाकहणा पुनःअवरप्रकारः ॥ शाकंरूपाक्षि २१ संयोज्यषष्टिभागेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हर्यते ॥ शेषंसंवत्सरंज्ञेयंलब्धंतत्परिवर्तकम् ॥ १ ॥ ॥ इतिसंवत्सरानयनविधिः ॥ ॥ अथसंवत्सरफलम् ॥ ॥ जातिस्वकुलधर्मात्माविद्यावांश्चमहाबलः ॥ क्रूरश्चकृतविद्यश्चजायतेप्रभवोदयः ॥ १ ॥ स्त्रीस्वभावश्चचपलस्तस्करःसधनीतथा ॥ परोपकारीपुरुषोजायतेविभवोदयः ॥ ॥ २ ॥ शुद्धःशांतःसुशीलश्चपरदाराभिलाषकः ॥ परोपकारकर्माचनिर्द्धनीसहिशुक्लजः ॥ ३ ॥ क्वचिल्लक्ष्मीःक्वचिद्भार्याबंधुमित्रारिविग्रहः ॥ राजपूज्यःप्रधानश्चप्रमोदादिभवोनरः ॥ ४ ॥ प्रजापालनसंतुष्टोदाताभोक्ताबहुप्रजः ॥ विदेशेषुसमाख्यातोवित्तहेतुःप्रजापतिः ॥ ५ ॥ क्रियाद्याचारसंपन्नोधर्मशास्त्रागमादिषु ॥ अतिथ्यमित्रभक्तोयमंगिरोजातउच्यते ॥ ६ ॥ धनवान्देवभक्तश्चधातुवादादिरेवच ॥ पाखंडकृतकर्माचश्रीमुखेतुभवेन्नरः ॥ ७ ॥ भावनाङ्कुरुतेनित्यंकर्मकर्तापुमान्भवेत् ॥ मत्स्यमांसप्रियश्चैवजायतेभाववत्सरे ॥ ८ ॥ भार्यार्त्तोजलभीतश्चव्याधिदुःखादिपीडितः ॥ सर्वदाप्रीतिसंयुक्तोयुवसंवत्सरेफलम् ॥ ९ ॥ धनीभोगीतथाकामीपशुपालप्रियोभवेत् ॥ अर्थधर्मसमायुक्तोनरईश्वरसंभवः ॥ ॥ १० ॥ वेदशास्त्ररतोनित्यंकलागंधर्वगायनः ॥ नातिगर्वीसुरापश्चजायतेबहुधान्यके ॥ ११ ॥ परदाराभिलाषीचपरद्रव्यरतोनरः ॥ व्यसनीदूतवादीचप्रमाथिनिभवेन्नरः ॥ १२ ॥ संतुष्टोव्यसनेसक्तःसप्रतापोजितेंद्रियः ॥ शूरश्चकृतविद्यश्चविक्रमेजायतेनरः ॥ १३ ॥ स्थूलोदरोस्थूलगुल्फोऽल्पपाणिःकुलापवादीकुलसेवकश्च ॥ धर्मार्थयुक्तोबहुवित्तहारीवृषेप्रजातश्चभवेन्मनुष्यः ॥ १४ ॥ तेजस्वीमतिगर्वीचहीनकर्माकृतस्थितिः ॥ देवपूजाप्रियोनित्यंचित्रभानौभवेन्नरः ॥ १५ ॥ सर्वाणिशुभकार्याणिमित्रामित्रफलंभवेत् ॥ सर्वसंग्रहकर्ताचसुभानौजायतेनरः ॥ ॥ १६ ॥ सर्वलोकप्रियोनित्यंसर्वधर्मबहिष्कृतः ॥ राजपूजाप्तवित्तश्चतारणेजायतेनरः ॥ १७ ॥ शिवब्रह्मविकर्माचशुभसौख्यप्रदायकः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मव्ययुक्तश्चपापात्मापार्थिवेजायतेनरः ॥ १८ ॥ दाताभोक्ताप्रधानत्वंजन्मकर्मणिसौख्यकम् ॥ बहुधामित्रलाभश्चजायतेव्ययवत्सरे ॥ १९ ॥
जित्वाचसकलाँल्लोकान्विष्णुधर्मपरायणः ॥ पुण्यानिसर्वकर्माणिसर्वजिज्जायतेनरः ॥ २० ॥ पितृमातृप्रियोनित्यंगुरुभक्तोभवेन्नरः ॥ शूरःशान्तः
प्रतापीचसर्वधारीभवोनरः ॥ २१ ॥ विरोधीकर्मशार्दूलोमत्स्यमांसकृतादनः ॥ धर्मबुद्धिरतोनित्यंप्रशस्तोलोकपूजितः ॥ २२ ॥ चित्रवादी
चनृत्यज्ञोगांधर्वोभिन्नसंशयः ॥ दातामानीतथाभोगीविकृतौजायतेनरः ॥ २३ ॥ परहिंसापरोमैत्रीपरद्रव्यरतोभवेत् ॥ कुटुम्बभारकोत्साहोजायते
खरवत्सरे ॥ २४ ॥ सर्वदाप्रीतिसंयुक्तोगृहेकल्याणकारकः ॥ राजमान्योपिपुरुषोनन्दनेजायतेनरः ॥ २५ ॥ कीर्तिरायुर्यशःसौख्यंसर्वकर्मशुभा
न्वितः ॥ युद्धशूरोऽरिणासक्तोविजयेवत्सरेफलम् ॥ २६ ॥ जेतायुद्धेकलत्राणिमित्रामित्रफलंलभेत् ॥ व्यापारकर्मसंयुक्तोजयसंवत्सरेफलम् ॥
॥ २७ ॥ अतिकामीचातिबुद्धिस्तृष्णावान्बहुधान्वितःपुरुषः ॥ निष्ठुरोप्यतिभोग्यअविबलयुक्तोपिमन्मथेजातः ॥ २८ ॥ शुचिःशान्तः
सुदक्षश्चसर्वत्रगुणपूजितः ॥ परोपकारीवादीचदुर्मुखेदुर्मुखीप्रियः ॥ २९ ॥ मणिमुक्तास्तथारत्नमष्टधातुसमन्वितः ॥ अदाताकृपणःपूज्योहेम
लंबौनरोभवेत् ॥ ३० ॥ अलसःसततञ्चातोव्याधिदुःखसमन्वितः ॥ कुटुंबधारकोवापिविलंबौजायतेनरः ॥ ३१ ॥ रक्तविकारीयुक्तश्चरक्ताक्षः
पित्तसंभवः ॥ वनप्रियोधनैर्हीनोविकारौतुभवेन्नरः ॥ ३२ ॥ वेदशास्त्रप्रियोदेवब्राम्हणेशुचिभक्तिमान् ॥ शर्करारसभोगीचशार्वरौजायतेनरः ॥
॥ ३३ ॥ सुनिद्रोबहुभोगीचव्यवसायीयशोन्वितः ॥ पूजितःसर्वलोकानांप्लवसंवत्सरेफलम् ॥ ३४ ॥ कर्मवान्सुयशाःप्रोक्तोधर्मशीलस्तपस्करः
प्रजापालःसुनिष्णातःशुभसंवत्सरेफलम् ॥ ३५ ॥ सुचित्तःशान्तचित्तश्चशूरोदाताह्यनेकधा ॥ नातिवृद्धोनपूर्णत्वंशोभनेफलमश्नुते ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतिक्रोधमतिःशूरोविज्ञानौषधिसंग्रहः ॥ परापवादीसर्वत्रक्रोधसंवत्सरेफलम् ॥ ३७ ॥ छत्रदंडप ताकादिचामरादिविभूषितः ॥ प्रधानपुरुषो
जातोविश्वसंवत्सरेफलम् ॥ ३८ ॥ भयार्त्तःशीतभीतिश्चकातरोजायतेनरः ॥ अध र्मःपरघातीचपरा वभवोमतः ॥ ३९ ॥ रौद्रस्तस्करकर्माचक्षि
तिपालोनरेश्वरः ॥ योगाभ्यासरतोनित्यंप्लवंगेजायतेनरः ॥ ४० ॥ चित्रकर्तासमा नश्चसुखीस्याद्भाह प्रणप्रियः ॥ पितृमातृषुभक्तश्चजायतेकीलके
फलम् ॥ ४१ ॥ शुचिःशीलःसमोदक्षःसप्रतापोजितेंद्रियः ॥ अतिव्याकुलभक्त श्चसौम्येसौम्यफ लंभवेत् ॥ ४२ ॥ व्यवसायीचाल्पतुष्टोधर्म
कर्मरतःसदा ॥ शीघ्रागमोपितत्रैवफलंसाधारणेमतम् ॥ ४३ ॥ विरोधकृशितो जातोविरोधोबां धवैःसह ॥ क्षणंसौम्यःक्षणंहीनोदुर्वारोजाय
तेनरः ॥ ४४ ॥ स्वल्पबुद्धिःक्रियास्वल्पोदेशंभ्राम्यतिमानवः ॥ देवतीर्थप्रियो नित्यंपरिधाविनि जायते ॥ ४५ ॥ सर्वभक्तिप्रियोनित्यंग
न्धमाल्यानुलेपनैः ॥ शौचक्रियानुरक्तश्चप्रमाथिप्रभवोनरः ॥ ४६ ॥ सर्वदाऽऽनन्द संयुक्तःसर्वदाति थिपूजकः ॥ स्वजनार्थागमोनित्यमानन्देजा
यतेनरः ॥ ४७ ॥ मत्स्यमांसप्रियोनित्यंनित्यंलुब्धकवृत्तिमान् ॥ सुराहारीवृथापापीजायतेराक्षसेनरः ॥ ४८ ॥ बहुपुत्रोऽनंतमित्रोद्रव्यलो
भीकलिप्रियः ॥ हानिःशोकस्तथादुःखंनलेजातोभवेन्नरः ॥ ४९ ॥ पित्तप्रकोपसर्वात्मानानाव्याधिरनेकधा ॥ वाहनैश्वसमायुक्तःपिंगले
जायतेनरः ॥ ५० ॥ कृषिवाणिज्यकर्त्ताचतैलभाण्डादिसंग्रही ॥ क्रयविक्रियकर्त्ताचकालयुक्तेभवेन्नरः ॥ ५१ ॥ वेदशास्त्रप्रभावज्ञःसिद्धिचित्तश्च
कोमलः ॥ सुकुमारोनृपैःपूज्यःकविःसिद्धार्थिजोनरः ॥ ५२ ॥ तस्करश्चपलोधृष्टःपरद्रव्यरतःसदा ॥ निंद्यानिसर्वकर्माणिकुरुतेरुद्रसंभवः ॥
॥ ५३ ॥ पापबुद्धिरतोनित्यंपापात्मापापसंश्रितः ॥ बोधकर्मसमायोगोदुर्मतौजायतेनरः ॥ ५४ ॥ गीतवाद्यानिशिल्पानिमंत्रमौषधिमेवच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वाङ्गगुणसंपन्नोनरोदुंदुभिसंभवः ॥ ५५ ॥ वातशोणितसंयुक्तःकफमारुतमेवच ॥ कूटसाक्षीरतश्चैवरुधिरोद्गारिसंभवः ॥ ५६ ॥ देशत्यागोधनभ्रंशहानिःसर्वत्रजायते ॥ धृताविवाहिताभार्यारक्ताक्षेयोनरोभवेत् ॥ ५७ ॥ क्रोधीक्रोधसमुत्पादीसिंहतुल्यपराक्रमः ॥ ब्राह्मणःपरजीवीचक्रोधसंवत्सरेनरः ॥ ५८ ॥ कुटुंबकलहोनित्यंमद्यवेश्यारतोनरः ॥ धर्माधर्मविचारोनोजायतेक्षयवत्सरे ॥ ५९ ॥ ॥ इतिजातकेषष्टिसंवत्सरफलम् ॥ ॥ अथ षष्टिसंवत्सरेषुद्वादशयुगानिभवंति ॥ यतः ॥ युगंभवेद्वत्सरपञ्चकेनयुगानिचद्वादश १२ वर्षषष्ट्याः ॥ ॥ इतियुगानयनम् ॥ ॥ अथयुगफलम् ॥ ॥ मद्यमांसप्रियोनित्यंपरदाररतःसदा ॥ कविःशिल्परतप्राज्ञोजायतेप्रथमेयुगे ॥ १ ॥ वाणिज्येव्यवहारीचधर्मिष्ठःसत्यसङ्गतः ॥ द्रव्यंलुभ्यतिपापात्मायुगेजातोद्वितियके ॥ २ ॥ भोक्तादाताकृतप्रज्ञोब्राह्मणोदेवपूजकः ॥ तेजस्वीधनयुक्तश्चतृतीयेफलमश्नुते ॥ ३ ॥ वाटिकाक्षेत्रलाभःस्यादोषधीप्रियमानवः ॥ धातुवादेधनेनाशोजायतेचचतुर्युगे ॥ ४ ॥ पुत्रोत्पत्तिःसदाप्रोक्ताधनवांश्चजितेंद्रियः ॥ पितृमातृप्रियश्चैवजायतेपंचमेयुगे ॥ ५ ॥ सर्वदाशत्रुनीचश्चसर्वदामहिषीप्रियः ॥ पट्टघातोभयार्त्तश्चयुगेषष्ठेचजायते ॥ ६ ॥ बहुमित्रप्रियश्चैवव्यापारेकुटिलागतिः ॥ शीघ्रगामीतथाकामीजायतेसप्तमेयुगे ॥ ७ ॥ पापकर्ताचसंतुष्टोव्याधिदुःखान्वितस्तथा ॥ कर्ताचपरहिंसायाजायतेत्वष्टमेयुगे ॥ ८ ॥ वापीकूपतडागादिदेवदीक्षातिथिप्रियः ॥ भूपतिर्वृत्रहातुल्योजायतेनवमेयुगे ॥ ९ ॥ राजाधिराजमंत्रीचस्थानप्राप्तिमहासुखः ॥ सुवेषीरूपदाताचजायतेदशमेयुगे ॥ १० ॥ बुद्धिमांश्चसुशीलश्चस्थापकश्चासुरद्विषाम् ॥ संग्रामेचभवेच्छूरोजातएकादशेयुगे ॥ ११ ॥ तेजस्वीचलसन्नात्मानरमध्येमहाजनः ॥ कृषिवाणिज्यकर्ताचजायतेद्वादशेयुगे ॥ १२ ॥ ॥ इतिद्वादशयुगफलम् ॥ ॥ अथायनानयनविधिः ॥

२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ मकरादिगतेषट्केसूर्यस्यैवोत्तरायणम् ॥ कर्कादिषट्कगेसूर्येदक्षिणायनमुच्यते ॥ १ ॥ ॥ इत्ययनानयनविधिः ॥ ॥ पुनःरत्नमालायांअयनानयनविधिः ॥ शिशिरपूर्वमृतुत्रयमुत्तरंह्ययनमाहुरहश्चतदामरम् ॥ भवतिदक्षिणमन्यदृतुत्रयंनिगदितारजनीमरुतांचसा ॥ १ ॥ इतिअयनानयनविधिः ॥ अथअयनफलम् ॥ ॥ उत्तरायणेनरोजातःसर्वशास्त्रविशारदः ॥ धर्मार्थकामशीलश्चगुणवांश्चसुरूपवान् ॥ १ ॥ याम्यायनेनरोजातःकूटसाक्षीसदानृतः ॥ अधर्मीचाथरोगीचबहुव्याधिःसदाभवेत् ॥ २ ॥ ॥ इतिअयनफलम् ॥ ॥ मेषादिषट्कगेसूर्येउत्तरोगोलउच्यते ॥ तुलादिषट्कगेसूर्येयाम्यगोलःसउच्यते ॥ १ ॥ ॥ इतिगोलाः ॥ ॥ अथगोलफलम् ॥ ॥ योजातोत्तरगोलेषुधनवान्विद्ययान्वितः ॥ पुत्रपौत्रादियुक्तश्चराजमान्योनरोभवेत् ॥ १ ॥ याम्यगोलेषुयोजातःसदाससुखवर्जितः ॥ कूटसाक्षीदुराचारोहीनांगश्चापिनिर्धनः ॥ २ ॥ ॥ इतिगोलफलम् ॥ ॥ अथरत्नमालायांऋतोरानयनविधिः ॥ ॥ मृगादिराशिद्वयभानुभोगात्षट्कंऋतूनांशिशिरोवसंतः ॥ ग्रीष्मश्चवर्षाशरदश्चतद्वद्धेमंतनामाकथितोत्रषष्ठः ॥ १ ॥ ॥ इतिऋतोरानयनविधिः ॥ ॥ अथऋतुफलम् ॥ रूपयौवनसंपन्नोदीर्घसूत्रोमहोत्कटः ॥ साधुयुक्तःकामुकश्चशिशिरेजायतेनरः ॥ १ ॥ महोद्यमीमनस्वीचतेजस्वीबहुकार्यकृत् ॥ नानादेशरसाभिज्ञोवसंतेजायतेनरः ॥ २ ॥ बह्वारंभोजितक्रोधोक्षुधालुःकामुकोनरः ॥ दीर्घःशठोबुद्धिमांश्चग्रीष्मेजातःसदाशुचिः ॥ ३ ॥ गुणवान्भोगयुक्तश्चराजपूज्योजितेंद्रियः ॥ कुशलोर्थानुवादीचवर्षाकालेभवेन्नरः ॥ ४ ॥ वाणिज्यकृषिवृत्तिश्चधनधान्यसमृद्धिमान् ॥ तेजस्वीबहुमान्यश्चशरज्जातोभवेन्नरः ॥ ५ ॥ बहुव्याधिर्हीनतेजास्त्रासयुक्तोप्रणिष्ठुरः ॥ ह्रस्वपीनगतोभीरुर्हेमंतेजायतेनरः ॥ इतिऋतुफलम् ॥ ॥ अथमास फलम् ॥ चैत्रेचदृष्टिभाजःस्यात्साहंकारःशुभाकरः ॥ रक्तेक्षणः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सरोषश्चस्त्रीलोलःसभवेत्सदा ॥ १ ॥ भोगीधनीसुचित्तश्चसक्रोधश्चसुलोचनः ॥ सुरूपोवल्लभःस्त्रीणामाधवेजायतेनरः ॥ २ ॥ परदेशरतश्चैवशुभ
चित्तोधनान्वितः ॥ दीर्घायुश्चसुबुद्धिश्चज्येष्ठेसुष्ठुधनीभवेत् ॥ ३ ॥ पुत्रपौत्रान्वितोधर्मीवित्तनाशेनपीडितः ॥ सुवर्णश्चाल्पसुखितोह्याषाढेचभवे
न्नरः ॥ ४ ॥ सुखदुःखेतथाहानौलाभेचसमचित्तकः ॥ स्थूलदेहःसुरूपश्चश्रावणेजायतेनरः ॥ ५ ॥ नित्यंप्रमोदीजल्पाकःपुत्रयुक्तःसुखीभवेत् ॥
मृदुभाषीसुशीलश्चशुचिजातोभवेन्नरः ॥ ६ ॥ सुरूपश्चसुखैर्युक्तःकाव्यकर्त्तापरःशुचिः ॥ गुणवान्धनवान्कामीह्याश्विनेजायतेनरः ॥ ७ ॥ सुधनी
कामुकोबुद्धिर्दुरात्माक्रयविक्रयी ॥ पापीयान्दुष्टचित्तश्चकार्तिकेजायतेनरः ॥ ८ ॥ मृदुभाषीधनीधर्मीबहुमित्रःपराक्रमी ॥ परोपकारीजातश्चमार्ग
शीर्षेभवेन्नरः ॥ ९ ॥ शूरउग्रप्रतापीचपितृदेवविवर्जितः ॥ ऐश्वर्यजन्मकारीचपौषेमासेनरोभवेत् ॥ १० ॥ मतिमान्धनवांश्चैवशूरोनिष्ठुरभाषकः ॥
कामुकश्चरणेधीरोमाघजातोभवेन्नरः ॥ ११ ॥ शुक्लःपरोपकारीचधनविद्यासुखान्वितः ॥ विदेशेभ्रमतेनित्यंफाल्गुनेजायतेनरः ॥ १२ ॥ ॥ इति
जातकेद्वादशमासफलम् ॥ ॥ अथपक्षफलम् ॥ ॥ निष्ठुरोदुर्मुखश्चैवस्त्रीद्वेषीमतिहीनकः ॥ परप्रेक्षोजनैर्युक्तःकृष्णपक्षेप्रजायते ॥ १ ॥
पूर्णचंद्रनिभःश्रीमान्सोद्यमीबहुशास्त्रवित् ॥ कुशलोज्ञानसंपन्नःशुक्लपक्षेभवेन्नरः ॥ २ ॥ ॥ इतिपक्षफलम् ॥ ॥ अथजन्मतिथिफलम् ॥
॥ क्रूरसंगोधनैर्हीनःकुलसंतापकारकः ॥ व्यसनासक्तचित्तश्चप्रतिपत्तिथिजोनरः ॥ १ ॥ परदाररतोनित्यंसत्यशौचविवर्जितः ॥ तस्करःस्नेहहीनश्च
द्वितीयासंभवोनरः ॥ २ ॥ अचेतनोतिविकलोनिर्द्रव्यःपुरुषःसदा ॥ परद्वेषरतोनित्यंतृतीयायांभवेन्नरः ॥ ३ ॥ महाभोगीचदाताचमित्रस्नेही
विचक्षणः ॥ धनसंतानयुक्तश्चचतुर्थ्यांयदिजायते ॥ ४ ॥ व्यवहारीगुणग्राहीपितृमात्रोश्चरक्षकः ॥ दाताभोक्तातनुप्रीतःपंचमीसंभवोनरः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ५ ॥ नानादेशाभिगामीचसदाकलहकारकः ॥ नित्यंजठरपोषीचषष्ठ्यांयोजायतेनरः ॥ ६ ॥ अल्पतोषीचतेजस्वीसौभाग्यगुणसंयुतः ॥ पुत्रवान्धनसंपन्नःसप्तम्यांजायतेनरः ॥ ७ ॥ धर्मिष्ठःसत्यवादीचदाताभोक्ताचवत्सलः ॥ गुणज्ञःसर्वकार्यज्ञोह्यष्टमीसंभवोनरः ॥ ८ ॥ देवता राधकःपुत्रीधनस्त्रीसक्तमानसः ॥ शास्त्राभ्यासरतोनित्यंनवम्यांजायतेयदि ॥ ९ ॥ दशम्याधर्माधर्मज्ञोदेवसेवीचयाजकः ॥ तेजस्वीसौख्य संयुक्तोजायतेमानवःसदा ॥ १० ॥ अल्पतोषीनरेंद्रस्यगेहगामीशुचिर्भवेत् ॥ धनीपुत्रीभवेद्धीमानेकादश्यांभवेन्नरः ॥ ११ ॥ चपलश्चपलज्ञानी सदाक्षीणवपुःस्मृतः ॥ देशश्रमणशीलश्चद्वादशीजातकोभवेत् ॥ १२ ॥ महासिद्धोमहाप्राज्ञःशास्त्राभ्यासीजितेंद्रियः ॥ परकार्यरतोनित्यंत्रयो दश्यांयदाभवेत ॥ १३ ॥ धनाढ्योधर्मशीलश्चशूरःसद्वाक्यपालकः ॥ राजमान्यो यशस्वीचचतुर्दश्यांयदाभवेत् ॥ १४ ॥ श्रीमांश्चमतिमांश्चा पिमहाभोजनलालसः ॥ उद्यतःपरदारेषुह्यासक्तःपूर्णिमाभवः ॥ १५ ॥ स्थिरारंभपरिद्वेषीवक्रोमूर्खःपराक्रमी ॥ गूढमंत्रीचसज्ञानोप्यमावास्याभ वोनरः ॥ १६ ॥ ॥ इतिजातकेतिथिफलम् ॥ अथनंदादिपंचतिथिफलम् ॥ ॥ नंदातिथौनरोजातोमहामानीचकोविदः ॥ देवताभक्तिनि ष्ठश्चज्ञानीचप्रियवत्सलः ॥ १ ॥ भद्रातिथौबंधुमान्योराजसेवीधनान्वितः ॥ संसारभयभीतश्चपरमार्थमतिर्नरः ॥ २ ॥ जयातिथौराजपूज्यःपुत्रपौ त्रादिसंयुतः ॥ शूरःशांतश्चदीर्घायुर्मनोविज्ञश्चजायते ॥ ३ ॥ रिक्तातिथौवितर्कज्ञःप्रमादीगुरुनिंदकः ॥ शास्त्रज्ञोमदहंताचकामुकश्चनरोभवेत् ॥ ॥ ४ ॥ पूर्णातिथौधनैःपूर्णोवेदशास्त्रार्थतत्ववित् ॥ सत्यवादीशुद्धचेताविज्ञोभवतिमानवः ॥ ५ ॥ ॥ इतिपंचकतिथिफलम् ॥ ॥ अथजन्मवारफलम् ॥ ॥ व्याधितःसूर्यसंयुक्तस्तेजस्वीसमरप्रियः ॥ दातादानेमहोत्साहोसूर्यवारेभवेन्नरः ॥ १ ॥ मतिमान्प्रियवाक्शांतोनरें

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्राशयजीविकः ॥ समदुःखसुखःश्रीमान्सोमवारेभवेत्पुमान् ॥ २ ॥ वक्रबुद्धिर्जराजीवीरणोत्साहीमहाबली ॥ सेनानीस्तंत्रपालोवाधरापुत्रदिनो
द्भवः ॥ ३ ॥ लिपिलेखनजीवीस्यात्प्रियवाक्पण्डितःसुधीः ॥ रूपसंपत्तिसंयुक्तोबुधवासरसंभवः ॥ ४ ॥ धनविद्यागुणोपेतोविवेकीजनपूजकः ॥
आचार्यःसचिवोवास्याद्गुरुवासरसंभवः ॥ ५ ॥ चलचित्तःसुरद्वेषीधनक्रीडारतःसदा ॥ बुद्धिमान्सुभगोवाग्मीभृगुवारेभवेन्नरः ॥ ६ ॥ स्थिरजःस्थिर
गीःक्रूरोदुःखचित्तःपराक्रमी ॥ अधोदृङ्नचलोकेशोवृद्धनारीरतःसदा ॥ ७ ॥ ॥ इतिवारफलम् ॥ ॥ अथजन्मरात्रिदिनफलम् ॥ ॥ सद्ध
र्मयुक्तोबहुपुत्रभोगीप्रियान्वितःकामनिपीडिताङ्गः ॥ वस्त्रानुयुक्तोमतिमान्सुरूपोभवेन्मनुष्यश्चदिवाप्रसूतः ॥ १ ॥ मंदवाग्बहुकामार्तःक्षयरोगीमली
मसः ॥ क्रूरात्माछिन्नपापश्चनिशिजातोभवेन्नरः ॥ २ ॥ ॥ इतिदिनरात्रिजातफलम् ॥ ॥ अथजन्मनक्षत्रफलम् ॥ ॥ सुरूपःसुभगो
दक्षःस्थूलकायोमहाधनी ॥ अश्विनीसंभवोलोकेजायतेजनवल्लभः ॥ १ ॥ अरोगीसत्यवादीचसत्प्राणश्चदृढव्रतः ॥ भरण्यांजायतेलोकःसुसु
खीधनवानपि ॥ २ ॥ कृपणःपापकर्माचक्षुधालुर्नित्यपीडितः ॥ अकर्मकुरुतेनित्यंकृत्तिकासंभवोनरः ॥ ३ ॥ धनीकृतज्ञोमेधावीनृपमान्यः
प्रियंवदः ॥ सत्यवादीसुरूपश्चरोहिण्यांजायतेनरः ॥ ४ ॥ चपलश्चतुरोधीरःकूटकर्मास्वकर्मकृत् ॥ अहङ्कारीपरद्वेषीमृगेभवतिमानवः ॥
॥ ५ ॥ कृतज्ञोगर्वतोहीनोनरःपापरतःशठः ॥ आर्द्रानक्षत्रसंभूतोधनधान्यविवर्जितः ॥ ६ ॥ शांतःसुखीचसंभोगीसुभगोजनवल्लभः ॥
पुत्रमित्रादिभिर्युक्तोजायतेचपुनर्वसौ ॥ ७ ॥ देवधर्मधनैर्युक्तोबहुयुक्तोविचक्षणः ॥ पुष्येचजायतेलोकःशान्तात्मासुभगःसुखी ॥ ८ ॥ सर्व
भक्षीकृतान्तश्चकृतघ्नोवंचकःखलः ॥ आश्लेषायांनरोजातःकृतकर्माहिजायते ॥ ९ ॥ बहुभृत्योधनीभोगीपितृभक्तोमहोद्यमी ॥ चमूनाथोराज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सेवीमघायाजायतेनरः ॥ १० ॥ विद्यागोधनसंयुक्तोगंभीरःप्रमदाप्रियः ॥ पूर्वाफाल्गुनिकाजातःसुखीपण्डितपूजितः ॥ ११ ॥ दान्तःशूरोमृ
दुर्वक्ताधनुर्वेदार्थपण्डितः ॥ उत्तराफाल्गुनीजातोमहायोद्धाजनप्रियः ॥ १२ ॥ असत्यवचनोधृष्टःसुरापोबन्धुवर्जितः ॥ हस्तेजातोनरश्चौरोजाय
तेपरदारकः ॥ १३ ॥ पुत्रदारयुतस्तुष्टोधनधान्यसमन्वितः ॥ देवब्राह्मणभक्तश्चचित्रायांजायतेनरः ॥ १४ ॥ विदग्धोधार्मिकश्चैवकृपणःप्रिय
वल्लभः ॥ सुशीलोदेवभक्तश्चस्वातौजातोभवेन्नरः ॥ १५ ॥ अतिलुब्धोतिमानीचनिष्ठुरःकलहप्रियः ॥ विशाखायांनरोजातोवेश्याजनरतोभवेत्
॥ १६ ॥ पुरुषार्थप्रवासीचबन्धुकार्येसदोद्यमी ॥ अनुराधाभवोलोकःसदाधृष्टश्चजायते ॥ १७ ॥ बहुमित्रप्रधानश्चकविर्दातविचक्षणः ॥
ज्येष्ठाजातोधर्मरतोजायतेशूद्रपूजितः ॥ १८ ॥ सुखेनयुक्तोधनवाहनाढ्योहिंस्रोबलाढ्यःस्थिरकर्मकर्ता ॥ प्रतापितारातिजनोमनुष्योमूलेकृतीस्या
जननंप्रपन्नः ॥ १९ ॥ दृष्टमात्रोपकारीचभाग्यवांश्चजनप्रियः ॥ पूर्वाषाढाभवोनूनंसकलार्थविचक्षणः ॥ २० ॥ बहुमित्रोमहाकायोजाय
तेविजयीसुखी ॥ उत्तराषाढसंभूतःशूरश्चविजयीभवेत् ॥ २१ ॥ कृतज्ञःसुभगोदातासर्वरोगैश्चसंयुतः ॥ श्रीमान्बहुलसंतानःश्रवणेजायतेनरः ॥
॥ २२ ॥ गीतप्रियोबन्धुमान्योहेमरत्नैरलंकृतः ॥ जातोनरोधनिष्ठायांशतैकस्यपतिर्भवेत् ॥ २३ ॥ कृपणोधनपूर्णःस्यात्परदारोपसेवकः ॥ जा
तःशतभिषायांचविदेशेकामुकोभवेत् ॥ २४ ॥ वक्तासुखीप्रजायुक्तोबहुनिद्रोनिरर्थकः ॥ पूर्वाभाद्रपदायांचजातोभवतिमानवः ॥ २५ ॥ गौरः
ससत्वोधर्मज्ञःशत्रुघातीपरामरः ॥ उत्तराभाद्रपदोद्भूतोनरःसाहसिकोभवेत् ॥ २६ ॥ संपूर्णांगःशुचिर्दक्षःसाधुःशूरोविचक्षणः ॥ रेवतीसंभवोलोके
धनधान्यैरलंकृतः ॥ २७ ॥ ॥ इतिनक्षत्रफलम् ॥ ॥ अथजातकेयोगफलम् ॥ विष्कंभजातोमनुजोरूपवान्भाग्यवान्भवेत् ॥ नानालंका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रसंपूर्णोमहाबुद्धिर्विशारदः ॥ १ ॥ प्रीतियोगेसमुत्पन्नोयोषितांवल्लभोभवेत् ॥ तत्त्वज्ञश्चमहोत्साहीस्वार्थेनित्यकृतोद्यमः ॥ २ ॥ आयुष्मान्नामयो
गेचजातोमानीधनीकविः ॥ दीर्घायुःसत्त्वसंपन्नोयुद्धेचाप्यपराजितः ॥ ३ ॥ सौभाग्येचसमुत्पन्नोराजमंत्रीसजायते ॥ निपुणःसर्वकार्येषुवनिता
नांचवल्लभः ॥ ४ ॥ शोभनेशोभनोबालोबहुपुत्रकलत्रवान् ॥ आतुरःसर्वकार्येषुयुद्धभूमौसदोत्सुकः ॥ ५ ॥ अतिगण्डेचयोजातोमातृहन्ताभवे
च्चसः ॥ गण्डान्तेषुचजातस्तुतुलहन्ताप्रकीर्तितः ॥ ६ ॥ सुकर्मानामयोगेतुसुकर्माजायतेनरः ॥ सर्वप्रीतःसुशीलश्चरागीभोगीगुणाधिकः ॥ ७ ॥
धृतिमान्धृतियोगीचकीर्तिपुष्टिधनान्वितः ॥ भाग्यवान्सुखसंपन्नोविद्यावान्गुणवान्भवेत् ॥ ८ ॥ शूलेशूलव्यथायुक्तोधार्मिकःशास्त्रपारगः ॥
विद्यार्थीकुशलोयज्वाजायतेमनुजःसदा ॥ ९ ॥ गण्डेगण्डव्यथायुक्तोबहुक्लेशोमहाशिराः ॥ ह्रस्वकायोमहाशूरोबहुभोगीदृढव्रतः ॥ १० ॥
वृद्धियोगेसुरूपश्चबहुपुत्रकलत्रवान् ॥ धनवानपिभोक्ताचसत्ववानपिजायते ॥ ११ ॥ ध्रुवयोगेचदीर्घायुःसर्वेषांप्रियदर्शनः ॥ स्थिरकर्माऽतिश
क्तश्चध्रुवबुद्धिश्चजायते ॥ १२ ॥ व्याघातयोगजातश्चसर्वज्ञःसर्वपूजितः ॥ सर्वकर्मकरोलोकेव्याघातीसर्वकर्मसु ॥ १३ ॥ हर्षणेजायतेलोके
महाभाग्योनृपप्रियः ॥ धृष्टःसदाधनैर्युक्तोविद्याशास्त्रविशारदः ॥ १४ ॥ वज्रयोगेःवज्रमुष्टिसर्वविद्यास्त्रपारगः ॥ धनधान्यसमायुक्तोतत्त्वज्ञो
बहुविक्रमः ॥ १५ ॥ सिद्धियोगेसमुत्पन्नःसर्वसिद्धियुतोभवेत् ॥ दाताभोक्तासुखीकान्तोशोकीरोगीचमानवः ॥ १६ ॥ व्यतीपातेनरोजातो
महाकष्टेनजीवति ॥ जीवेत्स्याद्भाग्ययोगेनसभवेदुत्तमोनरः ॥ १७ ॥ वरीयान्नामयोगेचबलिष्ठोजायतेनरः ॥ शिल्पशास्त्रकथाभिज्ञो
गीतनृत्यादिकोविदः ॥ १८ ॥ परिघेचनरोजातःसकुलोन्नतिकारकः ॥ शास्त्रज्ञःसुकविर्वाग्मीदाताभोक्ताप्रियंवदः ॥ १९ ॥ शिवयोगेनरो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जातोसर्वकल्याणभाजनः ॥ महादेवसमोलोकेसदाबुद्धियुतो भवेत् ॥ २० ॥ सिद्धियोगेसिद्धिदातामंत्रसिद्धिप्रवर्तकः ॥ दिव्यनारीसमेतश्चसर्वसम्पद्युतोभवेत् ॥ २१ ॥साध्येमनसिवासिद्धिर्व्ययशेषेसुखागमः ॥ दीर्घसूत्रःप्रसिद्धश्चजायतेसर्वसंमतः शुभेशुभानतैर्युक्तःधनवानपिजायते ॥विज्ञानज्ञानसंपन्नोदाता ब्राह्मणपूजकः ॥ २३ ॥शुक्लेसर्वकलायुक्तःसर्वार्थज्ञानवान्भवेत कविःप्रतापीशूरश्चधनीसर्वजनप्रियः ॥ २४ ॥ ब्रह्मयोगेमहाविद्वान्वेदशास्त्रपरायणः ॥ ब्रह्मज्ञानरतोनित्यंसर्वकार्येषुकोविदः ॥ २५ ॥ ऐंद्रेभूपकुलेजातोराजाभवतिनिश्चयः ॥ अल्पायुस्तुसुखीभोगीगुणवानपिजायते ॥ २६ ॥ वैधृतौजायतेयस्तुनित्योत्साहीविभूषितः ॥ कुर्वाणोपिजनैःप्रीतिंप्रयात्यप्रियतांनरः ॥ २७ ॥ ॥ इतियोगफलम् ॥ अथकरणानयनम् ॥ ॥ कृष्णपक्षेतिथिर्द्विघ्नामुनिभिर्भागमाहरेत् ॥ शेषांकेनबवाद्यंचतिथ्यादौकरणंविदुः ॥ १ ॥ तिथिर्द्विघ्नाद्विकोनामशुक्लपक्षेसदाबुधैः ॥ शेषांकेसप्तभिर्भागस्तिथ्यादौकरणंमतम् ॥ २ ॥ इतिकरणानयनम् ॥ ॥ अथकरणफलम् ॥ ॥ बवाख्येकरणेजातोमानीधर्मरतःसदा ॥ शुभमंगलकर्माचस्थिरकर्माचजायते ॥ १ ॥ बालवाख्येनरोजात

कृष्णपक्षेकरणविचारः ।						शुक्लपक्षेकरणविचारः ।					
ति.	पूर्वदल	उत्तरदल	ति.	पूर्वदल	उत्तरदल	ति.	पूर्वदल	उत्तरदल	ति.	पूर्वदल	उत्तरदल
१	बालवः	कौलव	९	तैतिल	गर	१	किंस्तुघ्न	बव	९	बालव	कौलव
२	तैतिल	गर	१०	वणिज	भद्रा	२	बालव	कौलव	१०	तैतिल	गर
३	वणिज.	भद्रा	११	बव	बालव	३	तैतिल	गर	११	वणिज	भद्रा
४	बव	बालव	१२	कौलव	तैतिल	४	वणिज	भद्रा(विष्टि	१२	बव	बालव
५	कौलव	तैतिल	१३	गर	वणिज	५	बव	बालव	१३	कौलव	तैतिल
६	गर	वणिज	१४	भद्रा	शकुनि	६	कौलव	तैतिल	१४	गर	वणिज
७	भद्रा	कौलव	०	चतुष्पद	नाग	७	गर	वणिज	१५	भद्रा	बव
८	बालव	कौलव				८	भद्रा	बव			

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तीर्थदेवाधिसेवकः ॥ विद्यार्थसौख्यसंपन्नोराजमान्यश्चजायते ॥ २ ॥ कौलवाख्येतुजातस्यप्रीतिःसर्वजनैःसह ॥ संगतिर्मित्रबाणैश्चमानवांश्च प्रजायते ॥ ३ ॥ तैतिलेकरणेजातःसौभाग्यधनसंयुतः ॥ स्नेहीसर्वजनैःसार्द्धंविचित्राणिगृहाणिच ॥ ४ ॥ गराख्येकृषिकर्माचगृहकार्यपरायणः ॥ यद्वस्तुवांछितन्तच्चलभ्यतेचमहोद्यमैः ॥ ५ ॥ वाणिज्येकरणेजातोवाणिज्येनैवजीवति ॥ वांछितंलभतेलोकेदेशान्तरगमागमैः ॥ ६ ॥ अशुभारं भशीलश्चपरदाररतःसदा ॥ कुशलोविषकार्येषुविष्ट्याख्यकरणेनच ॥ ७ ॥ शकुनेकरणेजातःपौष्टिकादिक्रियाकृतिः ॥ औषधादिषुदक्षश्चभिषग्वृत्ति श्चजायते ॥ ८ ॥ करणेचचतुष्पादेदेवद्विजरतःसदा ॥ गोकर्मागोप्रभुःश्लाघ्यश्चतुष्पदचिकित्सकः ॥ ९ ॥ नागेचकरणेजातोधीवरप्रीतिकारकः ॥ कुरुतेदारुणङ्कर्मदुर्भगोलोललोचनः ॥ १० ॥ किंस्तुघ्नकरणेजातःशुभकर्मरतोनरः ॥ तुष्टिंपुष्टिंचमांगल्यंसिद्धिंचलभतेसदा ॥ ११ ॥ इतिजातकेकरणफलम् ॥ ॥ अथगणफलम् ॥ ॥ सुन्दरोदानशीलश्चमतिमान्सरलःसदा ॥ अल्पभोजीमहाप्राज्ञोनरोदेवगणोभवेत् ॥ १ ॥ मानीधनीविशालाक्षोलक्षवेधीधनुर्धरः ॥ गौरःपौरजनाग्राहीजायतेमानवेगणे ॥ २ ॥ उन्मादीभीषणाकारःसर्वदाकलिवल्लभः ॥ पुरुषोदुःसहंब्रूते प्रमेहीराक्षसेगणे ॥ ३ ॥ ॥ इतिगणफलम् ॥ ॥ अथयोनिफलम् ॥ ॥ स्वच्छंदःसद्गुणःशूरस्तेजस्वीघर्घरेश्वरः ॥ स्वामिभक्तोतुरंग स्ययोन्यांजातोभवेन्नरः ॥ १ ॥ राजमान्योबलीभोगीभूपस्थानविभूषणः ॥ आत्मोत्साहीनरोजातोगजयोनौनसंशयः ॥ २ ॥ स्त्रीणांप्रियःसदो त्साहीबहुवाक्यविशारदः ॥ स्वल्पायुश्चनरोजातःपशुयोनौनसंशयः ॥ ३ ॥ दीर्घरोषःसदाक्रूरउपकारंनगृह्यते ॥ चपलोरसनालौल्यःसर्पयोनौ नसंशयः ॥ ४ ॥ सोद्यमःसुमहोत्साहीशूरःस्वज्ञातिविग्रही ॥ मातृपित्रोःसदाभक्तःश्वानयोनौसमुद्भवः ॥ ५ ॥ स्वस्वकार्येशूरदक्षोमिष्टान्ना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हारभोजनः ॥ निर्दयोदुष्टसद्भावीनरोमार्जारयोनिजः ॥ ६ ॥ महद्विक्रमयोद्धापिईश्वरोविभवेश्वरः ॥ परोपकारीनित्यंचमेषयोनौभवेन्नरः ॥
॥ ७ ॥ बुद्धिमान्वित्तसंपूर्णःस्वकार्यकरणोद्यतः ॥ अप्रमत्तोप्यविश्वासीनरोमूषकयोनिजः ॥ ८ ॥ स्वधर्मेतुसदाचारःसत्क्रियासद्गुणान्वितः ॥
कुटुंबस्यसमुद्धर्तासिंहयोनिभवोनरः ॥ ९ ॥ संग्रामेविजयीयोद्धासकामस्तुबहुप्रजः ॥ वाताधिकोमन्दमतिर्नरोमहिषयोनिजः ॥ १० ॥
स्वच्छंदोऽर्थरतोग्राहीदीक्षावान्सविभुःसदा ॥ आत्मस्तुतिपरोनित्यंव्याघ्रयोनिभवोनरः ॥ ११ ॥ स्वच्छंदःशांतसद्वृत्तःसत्यवान्स्वजनप्रियः ॥
धर्मिष्ठोदानशूरश्चयोनरोमृगयोनिजः ॥ १२ ॥ चपलोमिष्टभोगीचार्थलुब्धश्चकलिप्रियः ॥ सकामःसत्प्रजःशूरोनरोवानरयोनिजः ॥ १३ ॥
परोपकरणेदक्षोवित्तेश्वरविचक्षणः ॥ पितृमातृप्रियोनित्यंनरोनकुलयोनिजः ॥ १४ ॥ ॥ इतियोनिफलम् ॥ अथवारायुः ॥ ॥ विपदः
प्रथमेमासेद्वात्रिंशेचत्रयोदशे ॥ षष्ठेपिचततःसूर्येजातोजीवतिषष्ठकम् ॥ १ ॥ एकादशेऽष्टमेमासेचंद्रेपीडाचषोडशे ॥ सप्तविंशतिवर्षेचचतुर्यु
क्ताशितौमृतिः ॥ २ ॥ द्वात्रिंशेचद्वितीयेचवर्षेपीडाचमंगले ॥ चतुःसप्ततिवर्षाणिसदारोगीसजीवति ॥ ३ ॥ बुधवारेष्टमेमासेपीडावर्षतथा
ष्टमे ॥ पूर्णेचतुःषष्टिवर्षेततोमृत्युर्भविष्यति ॥ ४ ॥ गुरौचसप्तमेमासेषोडशेचत्रयोदशे ॥ पीडाततश्चतुर्युक्ताशीतिवर्षाणिजीवति ॥ ५ ॥
शुक्रवारेचजातस्यदेहोरोगविवर्जितः ॥ षष्टिवर्षेऽथसंपूर्णेम्रियतेमानवोध्रुवम् ॥ ६ ॥ शनौचप्रथमेमासेपीड्यतेचत्रयोदशे ॥ दृढदेहस्तदाजातः
शतवर्षाणिजीवति ॥ ७ ॥ इतिवारायुः ॥ ॥ अथलग्नफलम् ॥ ॥ मेषलग्नेसमुत्पन्नश्चण्डोमानीधनीशुभः ॥ क्रोधीस्वजनहंताचविक्र
मीपरवत्सलः ॥ १ ॥ वृषलग्नभवोलोकेगुरुभक्तःप्रियंवदः ॥ गुणीकृतीधनीलोभीशूरःसर्वजनप्रियः ॥ २ ॥ मिथुनोदयसंजातोमानीस्वजन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वल्लभः ॥ त्यागीभोगीधनीकामीदीर्घसूत्रोरिमर्दकः ॥ ३ ॥ कर्कलग्नेसमुत्पन्नोभोगीधर्मजनप्रियः ॥ मिष्टान्नपानसंयुक्तःसौभाग्यःसुजन
प्रियः ॥ ४ ॥ सिंहलग्नोदयेजातोभोगीशत्रुविमर्दकः ॥ स्वल्पोदरोल्पपुत्रश्चसोत्साहीरणविक्रमः ॥ ५ ॥ कन्यालग्नेभवेद्बालोनानाशास्त्र
विशारदः ॥ सौभाग्यगुणसंपन्नःसुंदरःसुरतप्रियः ॥ ६ ॥ तुलालग्नोदयेजातोसुधीःसत्कर्मजीविकः ॥ विद्वान्सर्वकलाभिज्ञोधनाढ्योजनपूजितः
॥ ७ ॥ वृश्चिकोदयसंजातःशौर्यवान्धनवान्सुधीः ॥ कुलमध्येप्रधानश्चप्राज्ञःसर्वस्यपोषकः ॥ ८ ॥ धनलग्नोदयेजातोनीतिमान्धर्मवान्सुधीः ॥
कुलमध्येप्रधानश्चप्राज्ञःसर्वास्यपोषकः ॥ ९ ॥ मकरोदयसंजातोनीचकर्माबहुप्रजः ॥ लुब्धःसुस्थोऽलसोदीनःस्वकार्येषुकृतोद्यमः ॥ १० ॥
कुंभलग्नेनरोजातोचलचित्तोतिसौहृदः ॥ परदाररतोनित्यंमृदुकार्योमहासुखी ॥ ११ ॥ मीनलग्नेभवेद्बालोरत्नकांचनपूरितः ॥ अल्पकामोतिरिक्त
श्चदीर्घकालविचिंतकः ॥ १२ ॥ ॥ इतिजन्मलग्नफलम् ॥ ॥ अथअंशकफलम् ॥ ॥ पिशुनश्चपलोदुष्टःपापकर्मानिराकृतिः ॥ परे
षांव्यसनेरक्तःप्रथमांशेप्रजायते ॥ १ ॥ उत्पन्नविभवोभोक्तासंग्रामेविगतस्पृहः ॥ गांधर्वप्रमदासक्तोद्वितीयांशेप्रजायते ॥ २ ॥ धर्मिष्ठःसंतत
व्याधिःसर्वसाक्षएवच ॥ सर्वज्ञोदेवताभक्तस्तृतीयांशेप्रजायते ॥ ३ ॥ चतुर्थांशेभिजातस्तुवीक्षितोगुरुभक्तिमान् ॥ यत्किंचिद्धरणौवस्तुतत्सर्व
लभतेहिसः ॥ ४ ॥ सर्वलक्षणसंपन्नोराजाभवतिविश्रुतः ॥ दीर्घायुर्बहुपुत्रश्चजायतेपंचमांशके ॥ ५ ॥ स्त्रीनिर्जितःशुभैर्हीनोबहुमानीनपुंस
कः ॥ अर्थध्वंसीप्रमाथीचषष्ठांशेजायतेनरः ॥ ६ ॥ विक्रांतोमतिमाञ्छूरःसंग्रामेष्वपराजितः ॥ महोत्साहीचसन्तोषीजायतेसप्तमांशके ॥ ७ ॥
कृतघ्नोमत्सरीक्रूरःक्लेशभाषीबहुप्रियः ॥ फलकालेपरित्यागीजायतेचाष्टमांशके ॥ ८ ॥ क्रियासुकुशलोदक्षःसुप्रतापीजितेंद्रियः ॥ भृत्यैश्चवेष्टितो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नित्यंजायतेथनवाशके ॥ ९ ॥ ॥ इतिराशिनवांशकफलम् ॥ ॥ अथाग्रेचंद्रकुंडलिकालिख्यते ॥ ॥ लग्नंदेहोवर्गषट्कोडुकानिप्राणश्चं द्रोधातवोन्येग्रहेंद्राः ॥ प्राणेनष्टेदेहधात्वंगनाशोयस्मात्तस्माच्चंद्रवीर्यप्रधानः ॥ १ ॥ लग्नमात्मामनश्चंद्रस्तदात्माजीवयोगवान् ॥ लग्नांशात्द्वादशां काद्ग्रहाणांफलमादिशेत् ॥ २ ॥ इंदुःसर्वत्रबीजांभोलग्नंचकुसुमप्रभम् ॥ फलेनसदृशोंशश्चभावःस्वादुरसःस्मृतः ॥ ३ ॥ ॥ अथचंद्रराशि फलंलिख्यते ॥ ॥ नेत्रलोलःसदारोगीधर्मार्थकृतनिश्चयः ॥ पृथुजङ्घःकृतघ्नश्चनिष्पापोराजपूजितः ॥ १ ॥ कामिनीहृदयानंदोदाताभीतोज लादपि ॥ चंडकर्मामृतश्चांतेमेषराशौभवेन्नरः ॥ २ ॥ भोगीदाताशुचिर्दक्षोमहासत्वोमहाबलः ॥ रोगीविलासीतेजस्वीसुमित्रश्चवृषेभवेत् ॥ ॥ ३ ॥ मृष्टवाक्योलोलदृष्टिर्दयालुर्मैथुनप्रियः ॥ गांधर्ववित्कंठरोगीकीर्तिभागीधनीगुणी ॥ ४ ॥ गौरोदीर्घःपटुर्वक्तामेधावीचदृढव्रतः ॥ सम र्थोन्यायवादीचजायतेमिथुनेनरः ॥ ५ ॥ कार्यकारीधनीशूरोधर्मिष्ठोगुरुवत्सलः ॥ शिरोरोगीमहाबुद्धिःकृशांगःकृत्यवित्तमः ॥ ६ ॥ प्रवासशी लःकोपांधोऽबलोदुःखीसुमित्रकः ॥ अनासक्तोगृहेवक्रःकर्कराशौभवेन्नरः ॥ ७ ॥ क्षमायुक्तःक्रियाशक्तोमद्यमांसरतःसदा ॥ देशभ्रमणशील श्चशीतभीतःसुमित्रकः ॥ ८ ॥ विनयीशीघ्रकोपीचजननीपितृवल्लभः ॥ व्यसनीप्रकटोलोकेसिंहराशौभवेन्नरः ॥ ९ ॥ विलासीसुजनाल्हादी सुभगोधर्मपूजितः ॥ दातादक्षःकविर्वृद्धोवेदमार्गपरायणः ॥ १० ॥ सर्वलोकप्रियोनाट्यगांधर्वव्यसनेरतः ॥ प्रवासशीलःस्त्रीदुःखीकन्याजातो भवेन्नरः ॥ ११ ॥ अस्थानरोषणोदुःखीमृदुभाषीकृपान्वितः ॥ चलाक्षश्चललक्ष्मीकोगृहमध्येतिविक्रमः ॥ १२ ॥ वाणिज्यदक्षोदेवानांपूजको मित्रवत्सलः ॥ प्रवासीसुहृदामिष्टस्तुलाजातोभवेन्नरः ॥ १३ ॥ बालप्रवासीक्रूरात्माशूरःपिङ्गललोचनः ॥ परदाररतोमानीनिष्ठुरःस्वजनेभवेत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १४ ॥ साहसप्राप्तलक्ष्मीकोजन्यामपिसुदुष्टधीः ॥ धूर्तश्चोरफलारंभीवृश्चिकेजायतेनरः ॥ १५ ॥ शूरःसत्यधियायुक्तःसात्विकोजननन्दनः ॥
शिल्पविज्ञानसंपन्नोधनाढ्योदिव्यभार्यकः ॥ १६ ॥ मानीचरित्रसंपन्नोललिताक्षरभाषकः ॥ तेजस्वीस्थूलदेहश्चधनुर्जातःकुलातकः ॥ १७ ॥
कुजनस्थोवशःस्त्रीणांपंडितःपारदारिकः ॥ गीतज्ञोललितग्राह्योपुत्राढ्योमातृवत्सलः ॥ १८ ॥ धनीत्यागीसुभृत्यश्चदयालुर्बहुबांधवः ॥ परचिं
तितसौख्यश्चमकरेजायतेनरः ॥ १९ ॥ दातालसःकृतज्ञश्चगजवाजिधनेश्वरः ॥ शुभदृष्टिःसदासौम्योधनविद्याकृतोद्यमः ॥ २० ॥ पुण्याढ्यः
स्नेहकीर्तिश्चधनभोगीसशक्तिकः ॥ शालूरकुक्षिनिर्भीतःकुंभेजातोभवेन्नरः ॥ २१ ॥ गंभीरचेष्टितःशूरःपटुवाक्योनरोत्तमः ॥ कोपनः कृपणोज्ञा
नीगुणश्रेष्ठःकुलप्रियः ॥ २२ ॥ नित्यसेवीशीघ्रगामीगंधर्वकुशलःशुभः ॥ मीनराशौसमुत्पन्नोजायतेबंधुवत्सलः ॥ २३ ॥ ॥ इति राशिफ
लम् ॥ ॥ अथाग्रेराशिभावाध्यायप्रकारोलिख्यते ॥ ॥ चंद्रात्प्रथमगोभानुर्जन्मकालेयदाभवेत् ॥ विदेशगामीभोगीचकलहेकृतवासनः ॥
॥ १ ॥ जन्मकालेयदाभानुर्द्वितीयोयदिचंद्रतः ॥ बहुभृत्ययशाश्चैवराजमान्योभवेन्नरः ॥ २ ॥ चंद्राद्भानुस्तृतीयश्चजन्मकालेयदाभवेत ॥
स्वर्णार्थीशोशुचिश्चैवराजतुल्योभवेन्नरः ॥ ३ ॥ चंद्राच्चतुर्थगोभानुर्जन्मकालेयदाभवेत् ॥ गणकाःकथयंत्येवमातृहस्तेनभक्तिमान् ॥ ४ ॥ चंद्रा
त्पंचमगोभानुर्जन्मकालेयदाभवेत् ॥ सुताभिश्चासुखीचैवबहुपुत्रीभविष्यति ॥ ५ ॥ चंद्रात्षष्ठगतोभानुर्जन्मकालेयदाभवेत् ॥ शत्रूणांविजयी
शूरःक्षत्रकर्मरतःसदा ॥ ६ ॥ जन्मकालेयदाभानुश्चंद्रात्सप्तमगोभवेत् ॥ सुस्त्रीसुशीलचारीचपतिव्रत्तोमहातपी ॥ ७ ॥ चंद्रादष्टम
गोभानुर्जन्मकालेयदाभवेत् ॥ सर्वदाक्लेशकारीचह्यतिरोगात्प्रपीड़ितः ॥ ८ ॥ चंद्रान्नवमगोभानुर्जन्मकालेयदाभवेत् ॥ अधर्मःसत्यवादीचबंधक्ले

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शीसदाभवेत् ॥ ९ ॥ चंद्रात्प्रथमगोभानुर्जन्मकालेयदाभवेत् ॥ तस्यद्वारेषुतिष्ठंतिधनवंतोनसंशयः ॥ १० ॥ चंद्रादेकादशेभानुर्जन्मकाले
यदाभवेत् ॥ राजगर्व्यतिवेत्ताचप्रसिद्धःकुलनायकः ॥ ११ ॥ चंद्रात्द्वादशगोभानुर्जन्मकालेयदाभवेत् ॥ लग्नद्वादशगेअंधेचंद्रात्कारणमुच्यते ॥
॥ १२ ॥ ॥ इतिबृहज्जातकेद्वितीयप्रकरणेसूर्याध्यायभावः ॥ ॥ अथभौमभावाध्यायोलिख्यते ॥ ॥ चंद्रात्प्रथमगोभौमोजन्मकालेयदाभवेत् ॥
रक्ताक्षीरुधिरस्रावीरक्तवर्णोभवेन्नरः ॥ १ ॥ चंद्रात्द्वितीयगोभौमोजन्मकालेयदाभवेत् ॥ धराधीशोभवेत्पुत्रःकृषिकर्तानसंशयः ॥ २ ॥ चंद्रा
त्तृतीयगोभौमोजन्मकालेयदाभवेत् ॥ चतुर्भ्रातृसमायुक्तःसुशीलःसर्वदासुखी ॥ ३ ॥ चंद्राच्चतुर्थगोभौमोजन्मकालेयदाभवेत् ॥ सुखभंगीदरि
द्रीस्यात्पुंसःस्त्रीप्रियतेध्रुवम् ॥ ४ ॥ चंद्रात्पंचमगोभौमोजन्मकालेयदाभवेत् ॥ पुत्रहीनोनरःस्त्रीणांलग्नेपततिनिश्चितम् ॥ ५ ॥ चंद्राच्चषष्ठगो
भौमोजन्मकालेयदाभवेत् ॥ अधर्मेशत्रुताचैवरोगेणपीडितःसदा ॥ ६ ॥ चंद्रात्सप्तमगोभौमोजन्मकालेयदाभवेत् ॥ स्त्रीकुशीलाभवेत्तस्यसदा
चाप्रियवादिनी ॥ ७ ॥ चंद्रादष्टमगोभौमोजन्मकालेयदाभवेत ॥ जीवहन्तामहापापीशीलसत्यविवर्जितः ॥ ८ ॥ चंद्रान्नवमगोभौमोजन्मकाले
यदाभवेत् ॥ लक्ष्मीवाश्वभवेत्पुत्रोवृद्धकालेनसंशयः ॥ ९ ॥ चंद्राद्दशमगोभौमोजन्मकालेयदाभवेत ॥ तस्यद्वारेषुतिष्ठन्तिगजवाजीनसंशयः
॥ १० ॥ चंद्रादेकादशेभौमोजन्मकालेयदाभवेत ॥ राजद्वारेप्रसिद्धःस्याद्यशोरूपसमान्वितः ॥ ११ ॥ चंद्राद्द्वादशगोभौमोजन्मकालेय
दाभवेत् ॥ मातुश्चासुखकारीचसदाकष्टस्यदायकः ॥ १२ ॥ इतिबृहज्जातकेद्वितीयप्रकरणेभौमाध्यायः ॥ ॥ चंद्रात्प्रथमगःसौम्यःसुखरूपंवि
नानरः ॥ दुष्टभाषीमतिभ्रंशीस्थानभ्रष्टोदिनेदिने ॥ १ ॥ चंद्रात्द्वितीयगःसौम्योधनधान्यसमाकुलः ॥ गृहबन्धुधनप्राप्तिःशीतरोगैर्विनश्यति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २ ॥ चंद्रात्सहजगःसौम्यःकुरुतेचार्थसंपदः ॥ राज्यलाभोभवेत्तस्यमहतांसंगमोध्रुवम् ॥ ३ ॥ चंद्राच्चतुर्थगःसौम्यः सर्वदासुखकारकः ॥
मातृपक्षेमहालाभःसुखंजीवतिमानवः ॥ ४ ॥ चंद्रात्पंचमगःसौम्योबुद्धिमांश्चविचक्षणः ॥ रूपवांश्चमहाकामीकुवाक्यंधारयेन्नरः ॥ ५ ॥ चंद्रा
त्षष्ठगतःसौम्यःकृपणःकातरोभवेत् ॥ विवादेचमहाभीरूरोमशोदीर्घलोचनः ॥ ६ ॥ चंद्रात्सप्तमगःसौम्यःस्त्रीणांचवशगोनरः ॥ कृपणश्चधना
ढ्यश्चबह्वायुश्चभविष्यति ॥ ७ ॥ चंद्रादष्टमगेसौम्येदेहेशीतोभविष्यति ॥ राजमध्येप्रसिद्धश्चशत्रूणांचभयंकरः ॥ ८ ॥ चंद्रान्नवमगःसौम्यः
स्वधर्मस्यविरोधकः ॥ अन्यधर्मरतःपुंसोविरोधीदारुणोभवेत् ॥ ९ ॥ चंद्राद्दशमगःसौम्योराजयोगीनरःसदा ॥ राशिकर्मयदाचंद्रःकुटुंबेना
यकोभवेत् ॥ १० ॥ चंद्रादेकादशेसौम्योलाभकारीपदेपदे ॥ वर्षएकादशेपुंसःपाणिग्राहोभविष्यति ॥ ११ ॥ चंद्रात्द्वादशगःसौम्यःसर्वदा
कृपणोभवेत् ॥ तत्सुतस्यजयोनास्तिपराजयग्रहीभवेत् ॥ १२ ॥ इतिबृहज्जातकेद्वितीयप्रकरणेबुधफलम् ॥ चंद्रात्प्रथमगोजीवोजीवयोग्योभ
वेन्नरः ॥ व्याधिनारहितःशूरोनिर्धनोनकदाचन ॥ १ ॥ चंद्रात्द्वितीयगोजीवोराजमान्यःशतायुषी ॥ अत्युग्रश्चप्रतापीचधर्मिष्ठःपापवर्जितः ॥
॥ २ ॥ चंद्रात्तृतीयगेजीवेनारीणांवल्लभोभवेत् ॥ धनवृद्धिःपितुर्गेहेवर्षेसप्तदशेतथा ॥ ३ ॥ चंद्राच्चतुर्थगोजीवःसुखैश्चैवविवर्जितः ॥ मातृपक्षेम
हाकष्टीपरेषांगृहकर्मकृत् ॥ ४ ॥ चंद्रात्पंचमगोजीवोदिव्यदृष्टिर्भवेन्नरः ॥ तेजसोनोनरोनारीह्यत्युग्रश्चमहाधनी ॥ ५ ॥ चंद्राच्चषष्ठगोजीवोह्युदा
सीगृहवर्जितः ॥ मायुवाह्यंभवेत्पुंसांभिक्षाभोक्ताव्ययर्द्धितः ॥ ६ ॥ चंद्रात्सप्तमगोजीवोबहुजीवीव्ययंविना ॥ स्थूलदेहीक्लीबपांडुर्गृहमध्येचनाय
कः ॥ ७ ॥ चंद्रादष्टमगोजीवोदेहरोगीसदानरः ॥ सुतातोपिमहाक्लेशीसुखंस्वप्नेनदृश्यते ॥ ८ ॥ चंद्रान्नवमगोजीवोधर्मिष्ठोधनपूरितः ॥ सुमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्गेसुगतश्चैवदेवगुर्वोश्चसेवकः ॥ ९ ॥ चंद्राद्दशमगोजीवोजन्मकालेयदाभवेत् ॥ पुत्रदारपरित्यागीतपस्वीचभवेन्नरः ॥ १० ॥ चंद्रादेकादशेजी
वोजन्मकालेयदाभवेत् ॥ अश्वारूढोभवेत्पुत्रोराजतुल्योभवेन्नरः ॥ ११ ॥ चंद्रात्द्वादशगोजीवोजन्मकालेयदाभवेत् ॥ स्यात्कुटुंबविरोधीचसु
खंशत्रोर्दशाग्रहे ॥ १२ ॥ इतिबृहज्जातकेद्वितीयप्रकरणेगुरुफलम् ॥ चंद्रात्तुप्रथमःशुक्रोजन्म० ॥ जलेमृत्युर्भवेत्तस्यसन्निपातंहिहिंस्रया ॥ १ ॥
चंद्राद्द्वितीयगःशुक्रोजन्म० ॥ महाधनीतथाराजतुल्योभावीनसंशयः ॥ २ ॥ चंद्रात्सहजगेशुक्रोजन्म० ॥ धर्मिष्ठोबुद्धिमांश्चैवम्लेच्छतोलाभदा
यकः ॥ ३ ॥ चंद्राच्चतुर्थगेशुक्रेजन्म० ॥ कफाधिकोमहाक्षामोवार्द्धक्येधनवर्जितः ॥ ४ ॥ चंद्रात्पंचमगःशुक्रोजन्म० ॥ बहुकन्याभविष्यं
तिधनाढ्योयशवर्जितः ॥ ५ ॥ चंद्राच्चषष्ठगः शुक्रोजन्म० ॥ दुर्व्ययाद्भयकारीचसंग्रामेचपराजितः ॥ ६ ॥ चंद्रात्सप्तमगःशुक्रोजन्म० ॥
पुरुषार्थहीनकारीचशङ्कितश्चपदेपदे ॥ ७ ॥ चंद्रादष्टमगःशुक्रोजन्म० ॥ प्रसिद्धोहिमहायोद्धादाताभोक्तामहाधनी ॥ ८ ॥ चंद्रान्नवमगः
शुक्रोजन्म० ॥ बहुभ्रातातथामित्रोभगिनीबहुलोभवेत् ॥ ९ ॥ चंद्राच्चदशमेशुक्रोजन्म० ॥ मातापित्रोःसुखप्राप्तिर्जीवितंतुबृहद्भवेत् ॥ १० ॥
चंद्रादेकादशेशुक्रोजन्म० ॥ ब्रह्मायुश्चभवेत्पुंसोरिपुरोगविवर्जितः ॥ ११ ॥ चंद्रात्द्वादशगःशुक्रोजन्म० ॥ परदाररतोनित्यंलंपटोज्ञानहीनकः ॥
॥ १२ ॥ इतिबृहज्जातकेद्वितीयप्रकरणेशुक्रफलम् ॥ चंद्राच्चप्रथमेसौरिःजन्म० ॥ प्राणनाशोर्थनाशश्चबंधुनाशस्तथापरे ॥ १ ॥ चंद्राद्द्विती
यगोमंदोजन्म० ॥ मातुश्चकष्टकारीचअजाक्षीरेणजीविति ॥ ॥ २ ॥ चंद्रात्सहजगःशौरिःजन्म० ॥ बहुकन्याभवेत्पुंसउत्पद्यम्रियतेध्रुवम् ॥
॥ ३ ॥ चंद्राच्चतुर्थगोनूनंशनिर्जन्मनिसंभवेत् ॥ महापौरुषकारीचशत्रुहंतानसंशयः ॥ ४ ॥ चंद्रात्पंचमगःसौरिर्जन्म० ॥ स्त्रीस्याच्छ्यामल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्णाचह्यथवाप्रियवादिनी ॥ ५ ॥ रविजःषष्ठगश्चंद्राजन्म० ॥ महाक्लेशीचकष्टीचआयुर्हीनोभवेन्नरः ॥ ६ ॥ चंद्राच्चसप्तमेस्थानेयदाचरविनन्दनः ॥ महाधर्मीचदाताचस्त्रीणांबहुकरग्रहः ॥ ७ ॥ रविजोह्यष्टमेस्थानेचंद्रतोजन्मसंभवः ॥ पितुश्चकष्टकारीचबहुदानेशुभंभवेत् ॥ ८ ॥ चंद्रान्नवमगःसौरिर्जन्म० ॥ यदासुग्धदशाप्राप्तिर्धनहानिर्भविष्यति ॥ ९ ॥ चंद्राद्दशमगःसौरिर्जन्म० ॥ नृपतुल्योभवेद्देहीकृपणोधनपूजितः ॥ १० ॥ चंद्रादेकादशेसौरिर्जन्मल० ॥ देहक्लेशीमहाकष्टीह्यधर्मीचनसंशयः ॥ ११ ॥ द्वादशेभुवनेसौरिश्चंद्राच्चपततेयदि ॥ निर्धनीभिक्षुकश्चैवधर्मेणैवविवर्जितः ॥ १२ ॥ ॥ इतिबृहज्जातकेद्वितीयप्रकरणेशनिराशिभावः ॥ ॥ जन्मकर्मेशुभेधर्मेचंद्राद्यदिपतेत्तमः ॥ जन्मकालेभूपतिश्चवृद्धकालेमहाधनी ॥ १ ॥ षष्ठेचद्वादशेराहुश्चंद्राच्चपतितोयदि ॥ सराजाराजमंत्रीचधनीधान्यसमाकुलः ॥ २ ॥ चतुर्थेसप्तमेराहुश्चंद्राच्चयदिजायते ॥ मातापितामहीकष्टीसदाह्यसुखदायकः ॥ ३ ॥ धनेएकादशेस्थानेचंद्राद्राहुःप्रजायते ॥ धनमानवसंयुक्तःसुखंस्वप्नेनदृश्यते ॥ ४ ॥ पंचमेचयदाराहुश्चंद्राज्जलजसंभवम् ॥ निधनंचापिसिद्धंचआपदश्चपदेपदे ॥ ५ ॥ ॥ इतिबृहज्जातकेप्रकीर्णेराहुफलम् ॥ ॥ अथराश्यायुः ॥ ॥ अश्विनीभरणीकृत्तिकापादेमेषराशिः मौमक्षेत्रेजन्मतोनवपादफलम् ॥ प्रथमेराजवंत १ धनवंत २ विद्यावंत ३ देवगुरुभक्त ४ पंचमेचोर ५ कालभाषाहीन ६ सप्तमेयोगींद्र ७ निर्धन ८ शुभलक्षण ९ । मास १ कष्ट अल्पमृत्युःवर्ष १ वर्ष १३ जलघातवर्ष १८ घातवर्ष ६४ अंगरोगवर्ष ५० चोरलोहडाउपघातयदाशुभग्रहोनिरीक्षितेतदाजीवतिवर्ष ७५ मास २ घटी १५ पल १५ मृत्युःकार्तिकमासेचतुर्थीभौमवासरेभरणीनक्षत्रेदेहंत्यजति ॥ १ ॥ इतिमेषराशिफलम् ॥ कृत्तिकायास्त्रयःपादारोहिणीमृगशिरोर्द्धंवृषराशिः शुक्रक्षेत्रेजन्मतोनव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पादफलम् ॥ प्रथमेयशवंत १ सुतवंत २ रणवंश ३ शुभलक्षण ४ विद्यावंत ५ सौभाग्यवंत ६ कुलमंडन ७ धनधान्यसमर्थ ८ परद्वारचोर ९ । वर्ष ३।६।८।३३।४६।५२।६३ अग्निलोहसांडसर्प्पकष्टदेवदोषघाताएतेअल्पमृत्यवः यदाव्यतिक्रामतितदावर्ष ८५ मास ६ दिन ७ माघमासेशुक्लपक्षेतिथौ ९ शुक्रदिनेरोहिणीनक्षत्रेअर्धरात्रेदेहंत्यजति ॥ २ ॥ इतिवृषराशिफलम् ॥ ॥ मृगशिरोर्द्धंआर्द्रापुनर्वसुपादत्रयंमिथुनराशिः ॥ बुधक्षेत्रेजन्मतोनवपादफलम् ॥ ॥ प्रथमेभाग्यवंत १ निर्धन २ कुत्सितभाषी ३ धनेश्वर ४ भाग्यवंत ५ धनधान्यभोगी ६ चोर ७ महात्मसिद्ध ८ देवगुरुमाननीक ९ कष्ट मास ६ वर्ष ६ अंगरोगवर्ष १० चक्षुःपीडा ११ वर्ष १८ घातवर्ष २४।५३।६३ अल्पमृत्युःयदाशुभग्रहनिरीक्षितोभवतितदाजीवतिवर्ष ८५ पौषमासेकृष्णपक्षेअष्टमीदिनेबुधवारेआर्द्रानक्षत्रेप्रथमप्रहरेदेहंत्यजति ॥ ॥ इतिमिथुनराशिफलम् ॥ ॥ पुनर्वसुपादमेकंपूष्यआश्लेषांतंकर्कराशिः चंद्रक्षेत्रेज०प्रथमेधनवंत १ महीपतिः २ स्वांगमुनीश्वर ३ विद्यावंत ४ धर्मवंत ५ चौर ६ निर्धन ७ देशपति ८ कुलमंडन ९ । अल्पमृत्युदिन ११ कष्टमास ९ वर्ष १ रोगवर्ष ७ जलघातवर्ष ९ अंगरोगवर्ष १२ जलघातवर्ष १६ अंगरोगवर्ष २० लोहघातवर्ष २७।३५ अल्पमृत्युदोषवर्ष ४५ देवदोषवर्ष ५५।६१ अल्पमृत्युराजकष्टअसाध्यरोगअग्निसर्प्पजलघातसांडवाघघातशुभग्रहनिरीक्षितस्तदावर्ष ७० मास ५ दिन ३ फाल्गुनमासेशुक्लपक्षे ४ प्रहरेगोधूलिकवेलायांदेहंत्यजति ॥ ४ ॥ ॥ इतिकर्कराशिफलम् ॥ ॥ मघाचपूर्वाफाल्गुनीउतराफाल्गुनीपादेसिंहराशिःसूर्यक्षेत्रेज०प्रथमेराजमान्य १ धनेश्वर २ तीर्थवासी ३ पुत्रवंत ४ स्वपक्षहीन ५ मातापितातारक ६ राजमान्य ७ धनधान्यसमर्थ ८ निर्धन ९ । चोरिमास ८ तथावर्ष १ कष्टवर्ष १० । १५ अंगरोगवर्ष २५ वर्ष ४५ देवदोषसन्निपातवर्ष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५१ वर्ष ६१ घातअल्पमृत्युर्यदाव्यतिक्रामतितदाजीवतिवर्ष ६५ श्रावणमासेशुक्लपक्षे १० दिनेपूर्वाफाल्गुनीनक्षत्रेरविवारेप्रथमप्रहरेदेहंत्यजति ॥ इतिसिंहराशिफलम् ॥ ॥ उत्तरायास्त्रयःपादाहस्तचित्रार्द्धंकन्याराशिः बुधक्षेत्रेजन्म० प्रथमेनिर्द्धन १ पुत्रहीन २ शत्रुमरण ३ धनयान ४ भोगी ५ पुत्रवंत ६ राजमान्य ७ सर्वसमर्थ ८ पराक्रमी ९ । मातापितागुरुभक्त १० मास ३ वर्ष ३ अंगरोगवर्ष १ वर्ष १३ चक्षुःपीडाज लघातवर्ष २६ अंगरोगदेवपीडावर्ष ३३ लोहघातवर्ष ४३ अंगरोग एतानि वर्षाणिअल्पमृत्युःयदाशुभग्रहनिरीक्षितोभवतितदाजीवतिवर्ष ८४ भाद्रपदमासेशुक्लपक्षे ९ दिनेबुधवारेहस्तनक्षत्रेगोधूलिकवेलायांदेहंत्यजति ॥ ॥ इतिकन्याफलम् ॥ ॥ चित्रार्द्धंस्वातीविशाखापादत्रयंतुला राशिःशुक्रक्षेत्रेजन्मतोनवपादफलम् ॥ प्रथमेधनभोगी १ धनेश्वर २ निर्धन ३ भाषाहीन ४ जातकर्मा ५ परदाराचोर ६ मातापितातारक ७ राजमान्य ८ भाग्यवंत ९ मास ४ कष्टमास १६ अंगरोगवर्ष ४ कष्टवर्ष १६ जलघातवर्ष २१ । ३३ अंगरोग ४१ अंगवृद्धिवर्ष ५१ देवदो षवर्ष ६१ अल्पमृत्युः । यदाशुभग्रहनिरीक्षितोभवतितदाजीवतिवर्ष ८५ वैशाखमासेशुक्लपक्षेतिथि १३ शुक्रवारेशतभिषानक्षत्रेमध्यान्हवेलायां देहंत्यजति ॥ ॥ इतितुलाफलम् ॥ विशाखापादमेकंअनुराधाज्येष्ठांतंवृश्चिकराशिः ॥ भौमक्षेत्रेज० प्रथमेधनेश्वर १ यशवंत २ आगमवंत ३ महांतिक ४ भाषाहीन ४ कुलमंडन ५ धनधान्यसमर्थ ६ विद्यावंत ७ राजमान्य ८ यशवंत ९ मास २ कष्टवर्ष ३ कष्टवर्ष ७ अंगरोगवर्ष ८ जलघातवर्ष १३ वृक्षघातवर्ष ३२ । ३५ अंगरोगलोहघातवर्ष ४५ अंगरोगवर्ष ६३ अल्पमृत्युःयदाशुभग्रहनिरीक्षितस्तदाजीवतिवर्ष ७५ मास २ दिन ७ ज्येष्ठमासेकृष्णपक्षेतिथौ ११ मंगलवारेअनुराधानक्षत्रेप्रथमप्रहरेदेहंत्यजति ॥ ॥ इतिवृश्चिकफलम् ॥ ॥ मूलंचपूर्वाषाढा उत्तरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षाढापादेधनराशिः गुरुक्षेत्रेज०प्रथमेज्ञानवंत १ निर्धन २ नीचकर्मकारक ३ राजमान्य ४ क्रोधी ५ पुत्रवंत ६ कामलंपट ७ धनेश्वर ८ रुधिर विकारी ९ मास ५ वर्ष ३ कष्टवर्ष ९ अंगरोगवर्ष ११ चक्षुःपीडावर्ष १६ जलघातवर्ष २४ वर्ष ३६ अंगरोगवर्ष ४७।५७।६७ तठई सर्पजलघात अल्पमृत्युः । यदाशुभग्रहनिरीक्षितस्तदाजीवतिवर्ष ८५ आषाढमासेशुक्लपक्षेतिथि १ गुरुवारेहस्तनक्षत्रेगोधूलिवेलायांदेहंत्यजाति ॥ ॥ इतिध नूराशिफलम् ॥ ॥ उत्तरायास्त्रयःपादाःश्रवणधनिष्ठार्द्धमकरराशिः ॥ शनिक्षेत्रेज०प्रथमेअंगहीन १ कुरुभक्त २ परदारारत ३ शुभलक्षण ४ दे वांशि ५ पुत्रवंत ६ उत्तम ७ महापति ८ दोऊपक्षतारक ९ धनेश्वर ९ मास ३ कष्टमास १ देवदोषपीडावर्ष ३ अंगरोगवर्ष ५७ देवदोषवर्ष १० अंगरोगअग्निपीडावर्ष ३२ लोहघातवर्ष ३३ कष्टवर्ष ४३ तथा ५१ अल्पमृत्युः । यदाशुभग्रहनिरीक्षितोभवतितदाजीवतिवर्ष ६१ कार्तिकेमासेदे वदोषअनंतअल्पमृत्युर्यस्यव्यतिक्रामतितदाजीवतिवर्ष ८१ शुक्लपक्षेतिथी ५ शुक्रवारेश्रवणनक्षत्रेदेहंत्यजाति ॥ इतिमकरफलम् ॥ धनिष्ठार्द्धशततार कापूर्वाभाद्रपदात्रयःकुंभराशिःशनिक्षेत्रेज० ॥ प्रथमेमध्यम १ श्रीमंत २ कष्टभाषाहीन ३ पुत्रवंत ४ राजमान्य ५ बाबकाबहीन ६ योगींद्र ७ अंग हीन ८ शुभलक्षण ९ दिन ३ कष्टतथादिन ७ अल्पमृत्यु १८ वर्षे ३२ शुभग्रहनिरीक्षितोभवतितदाजीवतिवर्ष ६१ माघमासेशुक्लपक्षेतिथि २ गुरुवा रेउत्तराभाद्रपदानक्षत्रेमृत्युर्भवति ॥ ॥ इतिकुंभफलम् ॥ ॥ पूर्वाभाद्रपदापादमेकंउत्तराभाद्रपदरेवत्यंतंमीनराशिः ॥ जीवक्षेत्रेज० प्रथमे धनवंत १ कालहीन २ लंपट ३ धनवं ४ चोर ५ कपटी ६ निर्धन ७ भाग्यवंत ८ नवमेआपक्लेश ९ वर्ष १८–३३ शुभग्रह निरीक्षितस्तदाजीवतिवर्ष ६१ माघमासशुक्लपक्षतिथि १२ उत्तराभाद्रपदानक्षत्रगुरुवारेप्रातःकालेदेहंत्यजति ॥ ॥ इतिमीनफलम् ॥ ॥ दिक्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१० काल ६ नख २० बाणे ५ भ ८ दृक् २ नखाः २० समयो ६ दिशः १० ॥ मनवो १४ राम ३ वेद ४ श्चमेषाद्यष्टोत्तरंशतम् ॥ १ ॥ जन्मप
त्र्यांयत्रस्थानेग्रहोभवतितत्रतेषांलग्नानांध्रुवांकाःसंमेल्यतदेवायुर्ज्ञेयम् ॥ ॥ इतिलग्नायुः ॥ ॥ अथभावसाधनार्थंसूर्यादिकमध्यमस्पष्टकरणम्॥
॥ ॥ यथोक्तम् ॥ स्पष्टैर्ग्रहैर्विनाकिंचित्निगदंतिकुबुद्धयः ॥ दशाचांतर्दशादीनांफलंयात्युपहास्यताम् ॥ १ ॥ तत्रप्रथमंअयनाशकरणम् ॥
वेदवेदखवह्निभि ३०४४ र्युतेविक्रमवत्सरे ॥ अयनवल्लीभवेत्तस्माद्गतकलिस्तथैवच ॥ २ ॥ गतकलिद्वादशगुणितंचैत्रार्द्धान्मासंसंयुक्तम् ॥
खखशराद्रि ७५०० विभाजितंलब्धंविराशिशेषंत्रिंशद्गुणितम् ३० गतदिनयुतंतेनैवभागलब्धंअंशशेषषष्टि ६० गुणंतेनैवभागलब्धकलाशेषंषष्टि ६०
गुणंतेनैवभागलब्धंविकलाइतिअयनमध्यमंजातम् ॥ अयनमध्यमंस्थाप्यरात्रियान्विकल्पंचिंतनीयम् ॥ ॥ इतिकोर्थः ॥ षडधिकंकेंद्रंविशोध
येत्षड्भिःषडधिकमूनषड्भिरितिकृत्वापश्चाद्रात्रिंस्थाप्य त्रिंशद्गुणिताअंशास्तत्रनियोजयेत् ॥ ॥ इतिप्रकारेणक्रांतिफलज्यो०परिपलआनय
नम् ॥ इतिस्पष्टायनांशानयनम् ॥ ॥ अथदिनमानमिश्रानयनप्रकारः ॥ ॥ स्पष्टार्कोयनभागयुक्तभुजवद्भुक्तक्षतस्तच्चरंधृत्वाभोग्यचरघ्न
बाहुलवतःखाग्न्यु ३० द्धतैस्तैर्युतः ॥ मेषात्वंशखवारिधी ४५ वृणमथोकुर्यात्तुलादौस्फुटंतन्मिश्रंद्विगुणंद्युमानमुदितंरात्रेस्तुषष्ट्युत्तरम् ॥ १ ॥
॥ अथटीका ॥ ॥ स्पष्टसूर्यमाहिंअयनांशजोडीभुजनीअंशकलाजोवैखंडीविचारिजै राशिस्थानशून्यहोइतोप्रथमषंडी ॥ १ ॥ ऊबरैतो
दुजीषंडी २ ऊबरैतोतीजीषंडी ३ लागईस्वस्वदेशकीचरषंडीआवईतीणसुंभुजकीअंशकलागुणीजैकलानई ६० भागलब्धंऊर्ध्वयुतंऊर्ध्वभाग ३
लब्धंगतषंडीमांहीजोडीजईतेफलकहीजैपनैमेषादिक ६ राशिहोईतो ४५ दंडमांहिजोडिजैतुलादिकराशिहोईतो ४५ मांहिहिनकीजौमिश्रप्रमाण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

होई ॥ खवन्हि ३० संत्यजतिमिश्रमध्येशेषंद्विनिघ्नंदिनमानकंचतत् ॥ षष्टी ६० मध्येचविशोधनीयंनैशंप्रमाणंकथितंमुनींद्रैः ॥ १ ॥ मिश्र
मांहि ३० दूरीकरीशेषदूणोकरिजईदिनप्रमाणहोईसाठि ६० मांहिथीदिनमानघटाईजईरात्रिप्रमाणकोई ॥ ॥ अथअयनांशकरणम् ॥ ॥
अथशराब्धियुगैः ४४५ रहितःशकोव्यपहृतःखरसैरयनांशकाः ॥ मधुसितादिकमासगतंप्रतिशरपलैःसहितंकुरुसर्वदा ॥ १ ॥ ॥ अथदिनमा
नानयनम् ॥ ॥ अयनादिकवासररामहतागगनानलबाणशशांकयुताः ॥ परभाजितशून्यरसैर्घटिकामकरादिदिनंकर्कादिनिशा ॥ १ ॥
जोदिनप्रमाणआवइतिणमांहिरात्र्यर्द्धजोडीजेईमिश्रप्रमाणहोई ॥ ॥ अथतात्कालिकग्रहानयनम् ॥ ॥ मिश्रेष्टांतरगुणितायुक्तैर्दिवसेनिशाद
लेप्रथमे ॥ रात्र्यर्धभीष्टांतरहतापरेत्वष्टमिश्रयोगेन ॥ १ ॥ ॥ अस्यटीका ॥ ॥ ग्रहंस्पष्टंकर्मभूमौस्थाप्यपश्चात्मिश्रैर्मिश्रदिनमानप्रमाणघटी
अंतरःकायःयोयस्मात्पततिसतस्मात्पात्यते ॥ जोमिश्रमांहीइष्टघटीकहीजईसूर्योदयसूंजन्मघटीजेहनईतोमिश्रमांहिपडिइतोऋणकहावईमिश्रघटैअनै
इष्टघटीमांहिजोमिश्रपडैतो धनकहावईमिश्रघटीअनइष्टअंतरकीयापछीजिकेघटी पलरह्याछेतिकेस्पष्टग्रहरीतिभुक्तिसेतीमयूरपदाकारगुणीजैपछै
६० भागलब्धऊर्ध्वयुतम् पुनः ६० भागलब्धऊर्ध्वयुतम् पुनः उपरि ६० षष्टिभागलब्धंकलाशेषंविकलाजोमिष्टइष्टातरऋणहुवई
तोग्रहस्पष्टकरीकलाविकलामांहिसुलब्धकलाविकलाऋणकीजई तोमिश्रइष्टातरधनैहुवतातोग्रहस्पष्टकरीकलाविकलामांहिजोडिजई तात्का
लिकग्रहकरतांमिश्रेष्टांतरऋणहुवैतोराहुकेतुमांहिअनैव ऋणग्रहमांहिधनकीजैकहतोजोडीजैजोमिश्रेष्टांतरधनहुवइतोराहुकेतुस्पष्टमांहिअनैवऋग्र
हमांहेऋणकीजई ॥ इतिविशेषः ॥ ॥ इतितात्कालिकग्रहकरणविधिः ॥ ॥ अथभावचक्रानयनम् ॥ ॥ श्रीपतिपद्धत्यनुसारेण ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नत्वातांगुरुदेवतांत्रिसमयज्ञानोद्धृतेःकारणंतत्पादाबुरुहप्रकाशविकसद्बोधोबुधःश्रीपतिः ॥ शिष्यप्रार्थनयाविचार्यसकलान्होरागमार्थान्सुहुर्वक्ष्ये
जातककर्मपद्धतिमहंहोराविदांप्रीतये ॥ १ ॥ ज्ञेयोऽत्रप्रथमंहिजन्मसमयःकार्यादियंत्रैःस्फुटंतत्कालप्रभवाविलग्नसहिताःकार्यास्ततश्चग्रहाः ॥
सिद्धांतोक्तपरिस्फुटापकरणैःस्वैर्वासकृत्कर्मणाभावाःखेटदृशोबलानिचततस्तेषांविचिंत्यानिषट् ॥ २ ॥ वदंतिभावैक्यदलंहिसंधिस्तत्रास्थितंस्या
दबलोग्रहेंद्रः ॥ ऊनेषुसंधेर्गतभावजातामागामिजंचाल्पधिकंकरोति ॥ ३ ॥ भावेशतुल्यंखलुवर्तमानोभावोहिसंपूर्णफलंविधत्ते ॥ भावो
नकेचाप्यधिकेचखेटेत्रिराशिकेनात्रफलंप्रकल्प्यम् ॥ ४ ॥ भावःप्रवृत्तोहिफलप्रवृत्तिःपूर्णफलंभावसमांशकेषु ॥ ह्रासःक्रमाद्भावविरामकालेफल
स्यनाशःकथितोमुनींद्रैः ॥ ५ ॥ जन्मप्रमाणेव्रतबंधचौलनृपाभिषेकादिकरग्रहेषु ॥ एवंहिभावाःपरिकल्पनीयास्तैरेवयोगोत्थफलानियस्मात् ॥
॥ ६ ॥ ॥ इतिभावचक्राध्यायःसमाप्तः ॥ ॥ अथभावकरणम् ॥ ॥ राशयोरविणायुक्तायावंतःस्वोदयान्क्षिपेत् ॥ तावंतोभुक्तिभागादौभो
ग्योदयाश्चतांहरेत् ॥ १ ॥ त्रिंशत्यासंक्षिपेत्तत्रषष्ट्यासंघटिकारवौ ॥ उदयाद्गतनाडीचषष्ट्यूनं ६० षष्टितोधिकम् ॥ २ ॥ शेषंषष्टि ६० गुणंकृत्वापलै
र्युक्तामजोदयः ॥ पात्यात्रिंशद्गुणा ३० शेषाविशुद्धोदयभाजिताः ॥ ३ ॥ आप्तंभागादिकंलब्धंशुद्धांशोदयतांलभेत् ॥ युक्तंस्याद्ग्रहषट्तत्रजाय
तेसप्तमाह्वयम् ॥ ४ ॥ ॥ अथप्रथमलग्नस्पष्टीका ॥ ॥ तात्कालिकसूर्यकर्मभूमिथापीजै तिणमांहेअयनांशघटीपलजोडीजई जोड्या
पीछैतितनीभुक्तराशिहोइ तिणरापलजोडिकरिक्षेपकरिये तेक्षेप अलगोमांडिराखाजइ भोग्यराशिहोइ तिणरापलतीनटामिधरीअंशघटीपलतिण
सेतीगुणीये गुण्यापछेपलानई ६० भागलब्धउपरिजोडीजईपुनःउपरलानई ६० कोलब्धभागउपरिजोडीजई उपरिलानई ३० भागलब्धक्षेपमां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हिजोडीजै क्षेपकुं ६० भागलब्धरविघटिकापलस्वदेशीयकहीजई तियास्वदेशीयघटिकामाहिइष्टघटिकाकहताजन्मघटिकासूर्योदयसुजंतोगइहूई
तिकेजोडीजै जोजडइतई ६० हूतिअधिकहुवइतो ६० दूरीकरणाशेष ६० गुणोकरिपलजोडीजेपछेमेषादिकलग्ननीयारांआपआपणादेशरापलछेते
६० गुणकीधाछै तैमांहिथी पाडीजै ॥ जितनालग्नेरा पलपडैतिननालग्नरापलपाडीजै ॥ शेषरहीसोअशुद्धलग्नतियैतिकेतीसगुणाकीजै पछैजीकेपूठै
६० रेभागलेतांघटीपल ३० रेभागलेतां जिकेअंशरह्याथातिकेअशुद्धलग्नतीसगुणनीयावैतिहांमांहिजोडिजै पछेअशुद्धलग्नतीयैंरांशिकैपलछै तिण
रेभागलीजईलब्धअंशशेष ६० गुणांकीजैघटीपूठैइराषीथीसोजोडिजैपुनःअशुद्धलग्नराफलसूंभागलब्धंघटीशेष ६० गुणाकीजैपररह्याथासोजोडिंदीजे
इवलीअशुद्धलग्नराफलांसुभागदीजेइलब्धंपलअस्यमध्येअयनांशघटीपलहीनकीजईशेषरहईसोप्रथमलग्नस्पष्टकहीजई ॥ ॥ इति प्रथमलग्न
स्पष्टविधिः ॥ ॥ अथस्वदेशीयरविभोग्यपलानयनप्रकारः ॥ तात्कालिकग्रहथापि तिणमांहिअयनांशजोडीजई ॥ अयंसायनःसूर्यः ॥
पश्चात्सायनोंशादित्रिंशन्मध्यातशोधयेत् ॥ शेषंभोग्यांशाःयाराशिप्राप्ताभवतितस्यराशिप्रमाणपलैःस्वदेशैस्त्रिभिःस्थानेगुण्यंतेअंशघटीपलानई
६० भोगलब्धंऊर्ध्वयुतंउपरिलानई ६० भागलब्धंऊर्ध्वयुतंउपरिलानई ३० भागलब्धंरविभोग्यकालस्वदेशीयशेषंविपल अथलंकोदयरविभोग्य
कालानयनम् ॥ तात्कालिकसायनांशसूर्यथापी त्रिंशन्मध्याच्छोधिते शेषभोग्यांशक्तिके लंकोदयलग्नरापलासुंगुणीजै त्रिहुठामेंअंशघटीपलानई
६०भागलब्धंऊर्ध्वयुतंऊपरिलानई ६० भागलब्धंऊर्ध्वयुतंऊपरिलानई ३० भागलब्धंलंकोदयरविभोग्यपलशेषंविपलम् ॥ ॥ अथदशमभावसाधन
विधिः ॥ ॥ तत्रप्रथमंनतानयनम् ॥ ॥ मध्यान्हेनताभावः तत्रस्फुटोरविश्चयःसएवदशमोभावः ॥ मध्यरात्रौनताभावः ॥ तत्रस्पष्टोरविश्चयः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सएवचतुर्थोभावः ॥ २ ॥ यदाउदयकालेजन्मस्यात्तदापूर्वनतंस्यात ॥ यदाअस्तमितेजन्मस्यात्उदयकालिजन्महोइ तिवारइदिनार्द्धतेपूर्वनत
जाणवोअस्तकालेजन्महोइतिवारइदिनार्द्धपश्चिमनतजाणवो अर्द्धरात्रिंतून्नतंसूर्योदयसमैजन्महोईतोजेदिनार्द्धनीघटीपलहोईतेहीजनतकहीजै इति
नतोन्नतानयनम् ॥ यथापुनः । रात्रिशेषगतेवापिदिनार्द्धभयुतंदिनम् ॥ दिनार्द्धंदिनजातेनतत्पूर्वमपरंपरम् ॥ १ ॥ अर्धरात्रिपरंयावत्दिनमध्या
न्नतंभवेत् ॥ रवेःपूर्वकपालंचतदूर्ध्वंपश्चिमंनतम् ॥ २ ॥ प्राक्लंकोदयतःसाध्याउक्ताश्चघटिकाखेः ॥ प्राक्कपालऋणंकुर्याद्धनमपरकपालयोः ॥
॥ ३ ॥ अथनतकीटीका ॥ ॥ (दिनार्द्धकर्मभूमौस्थाप्य) जोदिनार्द्धभीतरिजन्मह्वाहोइतोदिनार्द्धमांहिजन्मकीघटीपलपाडीयै नतहोइ ॥
॥ १ ॥ (पुनःदिनार्द्धउपरांतिसूर्यास्तमनतांइजन्मह्वोहोईतो) जन्मघटीपलमाहिदिनार्द्धपाडिजई नतहोई ॥ २ ॥ (पुनः अस्तमनेंतैलेकरि
अर्द्धरात्रिभीतरिजन्महोईतो) रात्रिगतघटीपलदिनार्द्धमांहिजोडीयै नतहोई ॥ ३ ॥ (पुनःअर्द्धरात्रिउपरांतिजन्महोईतो) बाकीशेषरात्रिज
न्मपावलीदिनार्द्धमांहिजोडीयई ॥ ४ ॥ ॥ इतिचारप्रकारनतः ॥ तीसघटीमांहिथीनतसुंउछीघटीपलतेउन्नतकहिजईअर्द्धरात्रितथाअर्द्धदिन
गतहोईतिवराई नतपूर्ण ० ० ० लिखिजै ॥ लंकोदयमध्यतःसाध्यम् ॥ मध्यंलग्नंहिमध्यंवसुभा २७८ नवनवयमे २९९ त्रिरदा ३२३ चराव
रार्थे १ रात्रिशेषेगतेवाभवतिचसमयेजन्मभूतद्धटीभ्यः ॥ संयुक्तोवासरार्द्धखलुनसघटिकाप्राक्प्रतीच्योभवेयुः ॥ संस्थाप्यास्तेस्फुटसवितुरस्योदये
रिष्टकार्येकार्यालग्नंसषड्भिस्तदपिसगणकैरस्तलग्नंनिरुक्तम् ॥ २ ॥ अथदशमलग्नटीका ॥ तात्कालिकसूर्यकर्मभूमिथापिमध्येअयनांशजोडीजै
ज्जोड्यापछैजैभुक्तराशिहोईतेलंकोदयलग्नकहीजैतेलंकोदयलग्नभुक्त तिणरापलमेषादिदेईकरिजोडीजईतेक्षेपकहीयेहे वहअलगालिखना फेर भो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेष	२७८	मीन
वृषभ	२९९	कुंभ
मिथुन	३२३	मकर
कर्क	३२३	धन
सिंह	२९९	वृश्चिक
कन्या	२२८	तुला

ग्यराशिहोयसोतीनस्थानमेंरखधरिअंशघटीपलसेतीसगुणीजैगुणापछीपलानई ६० भागलब्धउपरिजोडीजेईवलीउपरि ६० भागलब्धउपरिजोडीजैउपरिलानई ३ भागलब्धक्षेपमांहिजोडीजैशेषसुंप्रयोजनहिंक्षेपकुं ६० कोभागदीजईलब्ध रविघटिकापललंकोदईअपरनामराक्षसी हिवईलंकोदयीघटिकामां हिनतऋणकी जईसाधनकी जईजोआधीरातिहू तीलेइनइमाध्यान्ह दिनतांइजोजन्महुवैतोप्राक्कपालकहीजईतोलंकोदयी घठीकामांहेऋणकीजईलंकोदयीघटिका मांहे यदानतःनपततितदा ६० मेलयित्वानतःपात्यः ॥ इतिरहस्यम् ॥ जोमध्यान्हदिनथीउपरांतिआधीरात्रितां ईजन्महुइतोअपरकपालीकहीजैतोलंकोदयीघटिकामांहिनतधनकहतांजोडीजई तत्रचिंतनीयं नतजोड्यांथी ६० हूंतीअधीकहूइतो ६० परहाकाढीजर्मशेष ६० गुणोजईपछैनतरापलांनैलंकोदयरापलरह्याथातिकैजोडीजैतिणमाहि सुंमेषादिलंकोदयालग्नरापलपाडणाजितरापडैतितरापाडीजेशेष ३० गुणागुणिकईजिकेशेष ६० भागदेताकलाविकला ३० देताअंशरह्या थासोजोडीजै ॥ पछेअशुद्धलग्नरापलासुंभागलब्धंअंशशेष ६० गुणाकीजईशेषघटीहुइतिणयुक्तकीजईअशुद्धलग्नरापलसुंभागलब्धंअंशशेष ६० गुणाकीजईशेषघटीहुइतिणयुक्तकीजईअशुद्धलग्नरापलांसुंउंभागलब्धंअंशेशेष ६० गुणाकीजईशेषघटीहुइतिणयुक्तकीजईऽशुद्धलग्नरापलां सउं भागलब्धंघटीशेष ६० गुणाकीजईशेषपलहुइ तिणयुक्तकीजईअशुद्धलग्नरापलासुंभागलब्धंपलअस्यमध्येअयनांशघटीपलपाडीजैदशमलग्नआवई ॥ इतिदशमलग्नस्पष्टीकरणविधिः ॥ प्रथमंचतुर्थकांहि ४ कलत्रात्यामित्रभंमध्यविलग्नतश्च ॥ षड्भंविलग्नाच्चविशोध्यशेषंतत्रिंशमेकंभगुणंनदद्यात

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १ ॥ प्रथमंलग्नंषड्भिःसहितंजायास्थानेस्थाप्यदशमंलग्नंषड्भिःसहितंहिबुकस्थानेस्थाप्य ॥ कोठा १२ थापणा ॥ पहलैकोठैप्रथमलग्नथापणो ॥ दशमइकोठैदशमलग्नथापणो ॥ प्रथमलग्नमांहि ६ राशिजोडकरि ७ कोठैथापणा ॥ दशमलग्नमांहि ६ राशिजोडीकरिचोथहिकोठैथापणा ॥ प्रथम लग्नचोथा ४ कोठामांहिथीपाडणापाड्यांपछैशेषरहइसोतिसकीराशिकौ ३ भागदीजई ॥ लब्धंराशिशेषंत्रिंशद्गुणितंभाग ३ लब्धंअंशशेषंषष्टि ६० गुणितंभाग ३ लब्धंघटीशेषं ६० गुणंभाग ३ लब्धं ॥ पलयेभागपायाराश्यादिप्रथमलग्नसुंजोडीकरिदुसरईकोठैधरणाभीउहीराश्यादिपायाथीसो दूसराकोठासुंजोडिकरितीसरेकोठेधरणा ॥ कोठाच्यारहूवाकोठासातमांहिथीकोठाचौथापाडणापाड्यांतईशेषरह्यैसोकर्मपहिलीभांतिकीपरठईकरणाको ठासातहूवा ७ कोठादशमांहिथीसातमापाडणा ७ पाड्यांतईशेषरहईसोपहिलाकर्मकीभांतिकरणींकोठा १२ एवंहूंआ ॥ इतिभाववा रई १२ करणा ॥ ॥ अथजोडनकीटीका ॥ ॥ वारह १२ संधिपहिलाकोठाअरुदूसराकोठाएकत्रयोज्यः अर्द्धिक्रियतेकृतेसतितनुसंधिः १ दुसरातिसराकोठाजोडिकरिअर्द्धकीजईधनसंधिः ॥ तिसराअरुचौथाकोठाजोडकरि अर्द्धकीजईसहजसंधिः ॥ इमबारमाकोठाअरुपहिलाको ठाजोडीअर्द्धकीजई ॥ व्ययसंधिः ॥ १२ ॥ जोराश्यादिवर्त्योआवैनहिंतोपहिलाकोठाअरुबारमाकोठाएकत्रयोज्यअर्द्धकीजईतनसांधिःपहिलोकोठो अरुदूसरोकोठोजोडीअर्द्धकीजईधनसांधिःकोठासारएकजुक्तिजानना ॥ ॥ इतिभावचक्रानयनम् ॥ ॥ अथविश्वाप्रतिविश्वाकरणाविधिः ॥ ॥ संधीकृताधिकाःखेटाग्रहैश्चनखताडिताः ॥ भावसंध्यंतरेणाप्तंफलंतत्रविशोपकाः ॥ १ ॥ जिसग्रहकाविश्वाकह्यांचाहियेतिसग्रहतात्कालिकपा टाउपरथापीराशि ॥ ३ ॥ तीनकीसंधिभावविचारणा ॥ २ ॥ जोतात्कालिकभावतैनेडोकोईअंशघटीतोतेग्रहभावजाणनोपुनः जोतात्कालिकवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धिकघटितोभावछोडिसंधिमांहिगयो संधिजाणिनैविश्वावर्तिविचारकहणा ॥ पुनःतात्कालिकसंधियदिनहोईतोसंधिमांहिजाणना ॥ पुनःतात्का
लिकसंधितईअधिकहोईतोसंधिउल्लंघिभावमांहिगयोजाणनोनीकैकरितीनराश्याकाभावासंधितीनतात्कालिकअंशअरुभावसंधिकाअंशविचारीभाव
संधिकहणा ॥ सांधिअरुतात्कालिक कर्मभूमौस्थाप्ययोयस्मिन्पततिसतन्मध्ये पात्यःशेषलिप्तापिंडकरई ॥ राशिस्थात्रिंशद्गुणिताअंशास्तत्रनियो
जयेत् ॥ पुनःषष्टि ६० गुणंकृत्वाकलायोज्यःपश्चात् २० गुणीयेफलभी वीसेगुणीयैपलांकु ६० भागलब्धउपरिजढाईकरिधरिराषणापुनःभावसं
धिकअन्तरकरणाशेष ६० गुणाकरिजोधराष्याथातिसनईभागदेणालब्धविश्वाशेष ६० गुणाभीभागउणअंकेदेयणालब्धंप्रतिविश्वा ॥ ॥ अथ
विशेषः ॥ ॥ जेग्रहभाउहोईतोजुवर्त्याआयाथासोविश्वाप्रतिविश्वाजाणणा ॥ जोग्रहसंधिहोईतोजुबर्त्याविश्वाआयाथासोविश्वावीसमसुसोधिवा
॥ बाकीशेषविश्वाप्रतिविश्वाकरणासंधिका ॥ इतिभावचक्रेविश्वानयनम् ॥ ॥ अथद्वादशभावनिरीक्षणाविधिः ॥ ॥ तन्वादयोभावबलं
वदन्तितत्स्वामिसंपूर्णबलैःसमेतः ॥ युक्तेथदृष्टेशुभदृक्युतेचक्रमेणतद्भावविवृद्धिकारी ॥ १ ॥ रूपंतथावर्णविनिर्णयश्चचिन्हानिजातिर्वयसः
प्रमाणम् ॥ सुखानिदुःखान्यपिसाहसंचलग्नेविलोक्यंखलुसर्वमेतत् ॥ २ ॥ स्वर्णादिधातुःक्रयविक्रयश्चरत्नानिकोशोपिचसंग्रहश्च ॥
एतत्समस्तंपरिचिन्तनीयंधनाभिधानेभवनेसुधीभिः ॥ ३ ॥ सहोदराणामथकिङ्कराणांपराक्रमाणामुपजीविनांच ॥ विचारणाजा
तकशास्त्रविद्भिस्तृतीयभावेविनयेनकार्या ॥ ४ ॥ सुहृद्बृहग्रामचतुष्पदोवाक्षेत्राद्यमालोकनकंचतुर्थे ॥ दृष्टेशुभानांशुभयोगतो
वाभवेत्प्रवृद्धिर्नियमेनतेषाम् ॥ ५ ॥ वृद्धिप्रबन्धात्मजमंत्रविद्याविनेयगर्भस्थितिनीतिसंस्थाः ॥ सुताभिधानेभवनेनराणांहोराग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मज्ञैःपरिचिन्तनीयम् ॥ ६ ॥ वैरिव्रातंक्रूरकर्मानयानांचिन्ताशंकामातुलानाविचारः ॥ होरापारावारपारंप्रयातैरेतत्सर्वंशत्रुभावेविचिंत्यम् ॥ ७ ॥
रणाङ्गणंचापिवणिक्क्रियाचजायाविचारोगमनप्रमाणम् ॥ शास्त्रप्रवीणेनविचारणीयंकलत्रभावेकिलसर्वमेतत् ॥ ८ ॥ नद्युत्तारात्पंथवैषम्यदुर्गं
शस्त्रंचायुःसंकटेतेतिसर्वम् ॥ रंध्रस्थानेसर्वथाकल्पनीयंप्राचीनानामाज्ञयाजातकज्ञैः ॥ ९ ॥ धर्मक्रियायाहिमनःप्रवृत्तिर्भाग्योपपत्तिर्विमलंचशी
लम् ॥ तीर्थप्रयाणंप्रणवःपुराणैःपुण्यालयेसर्वमिदंप्रदिष्टम् ॥ १० ॥ व्यापारमुद्रानृपमान्यराज्यंप्रयोजनंचापिपितुस्तथैव ॥ महत्फलाप्तिःख
लुसर्वमेतद्राज्याभिधानेभवनेविचार्यम् ॥ ११ ॥ गजाश्वहेमांबरछत्रजातमान्दोलिकामंगलमंगलानि ॥ लाभोकिलैषामखिलंविचार्यमेतत्तुलाभ
स्यगृहेगृहज्ञैः ॥ १२ ॥ हानिर्दानंव्ययश्चापिदंडोनिर्बंधएवच ॥ सर्वमेतद्व्ययस्थानेचिन्तनीयंप्रयत्नतः ॥ १३ ॥ ॥ इतिद्वादशभावनिरीक्षण
विधिः ॥ ॥ अथग्रहाणांफलानि ॥ ॥ मर्त्यादयःपदार्थाज्ञायंतेयेनजंतूनाम् ॥ तदिदमधुनाप्रवक्ष्येभावाध्यायंविशेषेण ॥ १ ॥ अथप्रथमं
रविफलम् ॥ ॥ सवितरितनुसंस्थेशैशवेव्याधियुक्तोनयनगदसुदुःखीनीचसेवानुरक्तः ॥ नभवतिगृहमेधीदैवयुक्तोमनुष्योभ्रमतिविकलमूर्तिः
पुत्रपौत्रैर्विहीनः ॥ १ ॥ धनगतदिननाथेपुत्रदारैर्विहीनःकृशतनुरतिदीनोरक्तनेत्रःकुकेशः ॥ भवतिचधनयुक्तोलोहतोम्रणसंत्यनभवतिगृहमे
धीमानवोदुःखभागी ॥ २ ॥ सहजभुवनसंस्थेभास्करेभ्रातृनाशःप्रियजनहितकारीपुत्रदाराभियुक्तः ॥ भवतिचधनयुक्तोधैर्ययुक्तःसहिष्णुर्विपुल
धनविहारीनागरीप्रीतिकारी ॥ ३ ॥ विविधजनविहारीबंधुसंस्थोदिनेशोभवतिचमृदुवेत्तागीतवाद्यानुरक्तः ॥ समरशिरसियुद्धेनास्तिभङ्गःकदा
चित्प्रचुरधनकलत्रीपार्थीवानांप्रियश्च ॥ ४ ॥ तनयगतदिनेशोशैशवेदुःखभागीनभवतिधनभागीयौवनेव्याधियुक्तः ॥ जनयतिसुतमेकंचान्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गेहश्चशूरेचपलमतिविलासीक्रूरकर्माकुचेताः ॥ ५ ॥ अरिगृहगतभानौयोगशीलोमतिस्थोनिजजनहितकारीज्ञातिवर्गप्रमोदी ॥ कृशतनुगृहमेधी
चारुमूर्तिर्विलासीभवतिचरिपुजेताकर्मपूज्योदृढांगः ॥ ६ ॥ युवतिभुवनसंस्थेभास्करेस्त्रीविलासीनभवतिसुखभागीचंचलःपापशीलः ॥ उदरसम
शरीरोनातिदीर्घोनन्हस्वोकपिलनयनरूपःपिंगकेशःकुमूर्तिः ॥ ७ ॥ निधनगतदिनेशेचंचलस्त्यागशीलःकिलबुधगणसेवीसर्वदारोगयुक्तः ॥
वितथबहुलभाषीभाग्यहीनोविशीलोरतिविहितकुचैलोनीचसेवाप्रवासी ॥ ८ ॥ ग्रहगतदिननाथेसत्यवादीसुकेशीकुलजनहितकारीदेवविप्रानु
रक्तः ॥ प्रथमवयसिरोगीयौवनेस्थैर्ययुक्तोबहुतरधनयुक्तोदीर्घजीवीसुमूर्तिः ॥ ९ ॥ दशमभुवनसंस्थेतीव्रभानौमनुष्योगुणगणसुखभागी
दानशीलोभिमानी ॥ मृदुलघुशुचियुक्तोनृत्यगीतानुरागीनरपतिरतिपूज्यःशेषकालेचरोगी ॥ १० ॥ बहुतरधनभागीचायसंस्थेदिनेशेनरप
तिगृहसेवीभोगहीनोगुणज्ञः ॥ कृशतनुधनयुक्तःकामिनीचित्तहारीभवतिचपलमूर्तिर्जातिवर्गप्रमोदी ॥ ११ ॥ जडमतिरतिकामीचान्य
योषिद्विलासीविहगगणविघातीदुष्टचेताःकुमूर्तिः ॥ नरपतिधनयुक्तोद्वादशस्थेदिनेशेकथकजनविरोधीजङ्घरोगीकृशाङ्गः ॥ १२ ॥ इति
रविभावफलम् ॥ ॥ अथचंद्रफलम् ॥ ॥ तनुगतकुमुदेशेवित्तपूर्णःसुखीस्याद्बहुतरधनभोगीवीर्ययुक्तःसदेही ॥ भवतिच
यदिनीचश्चंद्रमापापगोवाजडमतिरतिदीनःस्यात्तदावित्तहीनः ॥ १ ॥ धनगतहरिणांकेत्यागशीलोमतिज्ञोनिधिरिवधनपूर्णोचंच
लात्मासुदुष्टः ॥ जनयतिबहुसौख्यंकीर्तिशालीसहिष्णुःसुखकमलविशालीचंद्रतुल्यस्वरूपः ॥ २ ॥ शशिनिसहजसंस्थेपापगेहे
चनित्यंनभवतिबहुभाषीभ्रातृहर्तारिमूर्तिः ॥ भवतिचसुखभोगीसौख्यगेरात्रिनाथेसकलधनविधानंशास्त्रकाव्यप्रमोदी ॥ ३ ॥ बहुतरवसु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्णोरात्रिनाथेचतुर्थेप्रियजनहितकारीयोषितांप्रीतिकारी ॥ सततमिहसरोगीमांसमत्स्यादिभोगीगजतुरगसमेतःक्रीडतेहर्म्यपृष्ठे ॥ ४ ॥ तनयग
तशशांकेवित्तपूर्णःसुखीस्याद्बहुतरसुतयुक्तोवश्यनारीसमेतः ॥ यदिभवतिशशांकेक्षीणपापारिगेहेयुवतिसुखसमूहंपुत्रपौत्रैर्विहीनः ॥ ५ ॥ रिपुग
हगशशांकेक्षीणतानाशकारंनभवतिबहुभोगीव्याधिदुःखस्यदाता ॥ यदिगृहमथतुंगःपूर्णदेहःशशांकोबहुतरसुखदातास्यात्तदामानवानाम् ॥ ६ ॥
विमलवपुषिचंद्रेसप्तमस्थेमनुष्योरुचिरयुवतिनाथोकांचनाढ्यःसुदेही । शशिनिकृशशरीरेपापगेपापदृष्टेनभवतिसुखभागीरोगिपत्नीपतिःस्यात् ॥ ७ ॥
निधनभवनसंस्थेशीतरश्मौनराणांनिधनमचिरकालेपापगेहेददाति ॥ निजभृगुगुरुदेहीसौम्यगेहीचपूर्णोजनयतिबहुदुःखंश्वासकासादिरोगैः ॥
॥ ८ ॥ नवमभवनसंस्थेशीतरश्मौप्रपूर्णेबहुतरसुखभुक्त्याकामिनीप्रीतिकारी ॥ नभवतिधनभागीक्षीणगेनीचगेवाविमलपथविरोधीनिर्गुणोमूढचेताः
॥ ९ ॥ बहुतरधनभागीकर्मसंस्थेहिमांशौविविधधनविधानंपुत्रदारादिपुर्णः ॥ रिपुकुटिलगृहस्थेकासरोगीकृशांगःपितृयुवतिधनाढ्यःकर्महीनोम
नुष्यः ॥ १० ॥ बहुतरधनभोगीचायसंस्थेशशांकेप्रचुरसुखसमेतोदारभृत्यादियुक्तः ॥ शशिनिकृशशरीरेनीचपापारिगेहेनभवतिसुखभागीव्याधि
तोमूढचेताः ॥ ११ ॥ व्ययनिलयविवेशेरात्रिनाथेकृशांगःसततहिमसरोगीक्रोधनोनिर्धनश्च ॥ निजबुधगुरुगेहेदातिकस्त्यागशीलःकृशतनुसुखभो
गीनीचसंगीसदैव ॥ १२ ॥ ॥ इतिचंद्रफलम् ॥ अथभौमफलम् ॥ उदरदशनरोगीशैशवेलग्नभौमेपिशुनमतिकृशांगःपापवित्कृष्णरूपः ॥ भवति
चपलचित्तोनीचसेवीकुचैलीसकलसुखसुहीनःसर्वदापापशीलः ॥ १ ॥ धनगतपृथिवीजेधातुवादीप्रवासीऋणधनकृतचित्तोद्यूतकर्त्तासहिष्णुः ॥
कृषिकरणसमर्थोविक्रमेलग्नचित्तःकृशतनुसुखभागीमानवःसर्वदैव ॥ २ ॥ सहजभवनसंस्थेभूमिजेभ्रातृहर्त्ताकृशतनुसुखभागीतुंगभौमोविलासी ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धनसुखपरहीनोनीचशत्रूच्चगेहेवसतिसकलपूर्णोमंदिरेकुत्सितेच ॥ ३ ॥ जडमतिरतिदीनोबंधुसंस्थेचभौमेनभवतिकुलमार्येबंधुदीनोनदुःखी ॥ भ्रम
तिसकलदेशेनीचसेवानुरक्तःपरवशपरदारोलुब्धचित्तःसदैव ॥ ४ ॥ तनयभवनसंस्थोभूमिपुत्रोमनुष्योभवतितनयहीनःपापशीलोतिदुःखी ॥
यदिनिजगृहतुंगेवर्ततेभूमिपुत्रःकृशकमलनिकेतंपुत्रमेकंददाति ॥ ५ ॥ रिपुगृहगतभौमेसंगरेमृत्युभागीसुतधनपरिपूर्णोतुंगगेसौख्यभागी ॥
रिपुगणपरिदुष्टेनीचगेक्षोणिपुत्रेभवतिविकलमूर्तिःकुत्सितःक्रूरकर्मा ॥ ६ ॥ मुनिगृहगतभौमेनीचसंस्थेरिगेहेयुवतिमरणदुःखंजायतेमानवानाम् ॥
मकरगृहनिजस्थेनान्यपत्नीश्चधत्तेचपलमतिविशालंदुष्टचेतांविरूपाम् ॥ ७ ॥ प्रलयभवनसंस्थेमंगलेक्षीणनीचेव्रजतिनिधनभावंनीरमध्येमनुष्यः ॥
धनकनकचराऽर्कःसर्वदाचैवभोगीकरपदगसुनीलोमृत्युलोकंप्रयाति ॥ ८ ॥ नवमभवनसंस्थेक्षोणिपुत्रेतिरोगीनयनकरशरीरःपिंगलःसर्वदैव ॥
बहुजनपरिपूर्णोभाग्यहीनःकुचैलोविकलजनसुवेशीशीलविद्यानुरक्तः ॥ ९ ॥ दशमगतमहीजेदांतिकःकोशहीनोनिजकुलजयकारीकामिनीचित्त
हारी ॥ जठरसमशरीरोभूमिजीवोपकोपीद्विजगुरुजनभक्तोनातिनीचोनह्रस्वः ॥ १० ॥ सुरजनहितकारीचायसंस्थेचभौमेनृपइवगृहमेधीपीडितः
कोपपूर्णः ॥ भवतिचयदितुंगेलोकसौभाग्ययुक्तोधनकिरणनियुक्तःपुण्यकामार्थलोभी ॥ ११ ॥ परधनग्रहणेच्छुःसर्वदाचंचलाक्षश्चपलमतिविहा
रीहास्ययुक्तःप्रचंडः ॥ भवतिचसुखभागीद्वादशस्थेचभौमेपरयुवतिविलासीसाक्षिकःकर्मपूरः ॥ १२ ॥ ॥ इतिमंगलफलम् ॥ ॥ अथ
बुधफलम् ॥ ॥ तनुगतशशिपुत्रेकान्तिमांश्चातितृष्टोविमलमतिविशालःपंडितस्त्यागशीलः ॥ मितमृदुशुचिभागीसत्यवादीविशालीबहुतरसुख
भागीसर्वकालप्रवासी ॥ १ ॥ भवतिचपितृभक्तःसुस्थितःपापभीरुर्मृदुतनुखररोमादीर्घकेशोतिगौरः ॥ धनगतशशिसूनौसत्यवादीसुहारीबहुत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वसुभागीसर्वकालप्रवासी ॥ २ ॥ साहसीनिजजनैः परियुक्तश्चितशुद्धिरहितोहतसौख्यः ॥ मानवःकुशलतेहितकर्ताशीतभानुतनयेनुजसंस्थे ॥ ३ ॥ बहुतरधनपूर्णोभ्रातृहर्ताचपापेबहुतरबहुपत्नीपूर्णगेहेस्वतुंगे ॥ तरलमतिरलज्जःक्षीणजङ्घःकृशाङ्गःशिशुवयसिचरोगीबंधुसंस्थेकुमारी ॥ ॥ ४ ॥ तनयमन्दिरगेशशिनन्दनेसुतकलत्रयुतः सुखभाजनम् ॥ विकचपङ्कजचारुमुखःसुखीसुरगुरुद्विजभक्तियुतःशुचिः ॥ ५ ॥ अरिनिकेतनवर्तिशशांकजेरिपुकुलाङ्गयदोयदिवक्रगः ॥ यदिचपुण्यगृहेशुभवीक्षितेरिपुकुलंविनिहंतिशुभप्रदः ॥ ६ ॥ तुरगभावगतेहरिणाङ्कजेभवति चंचलमध्यनिरीक्षितः ॥ विपुलवंशभवःप्रमदापतिःसचभवेच्छुभगेशशिवंशजे ॥ ७ ॥ निधनवेश्मनिसत्ययुतःशुभोनिधनदोऽतिथिमंडनएवच ॥ यदिचपापयुतोरिपुगेहगेमदनकाम्यजवेनपतत्यधः ॥ ८ ॥ नवमसौम्यगृहेशशिनन्दनेधनकलत्रयुतेनसमन्वितः ॥ भवतिपापयुतेविपथास्थितः श्रुतिविमन्दकरः शशिजोद्यमी ॥ ९ ॥ गुरुजनेनहितेनिरतोजनीबहुधनोदशमेशशिनंदने ॥ निजभुजार्जितवित्ततुरंगमोबहुधनैर्नियतोमितभाषणः ॥ १० ॥ श्रुतमतिर्निजवंशहितः कृशोबहुधनप्रमदाजनवल्लभः ॥ रुचिरनीलवपुर्गुणलोचनोभवतिचायगतेशशिजेनरः ॥ ११ ॥ भवतिचव्ययगेशशिनन्दनेविकलमूर्तिधरोधनवर्जितः ॥ परकलत्रधनेधनचित्तवान्व्यसनदूरतःकृतकःसदा ॥ १२ ॥ इतिबुधफलम् ॥ ॥ अथगुरुफलम् ॥ विविधवस्त्रविपूर्णकलेवरः कनकरत्नधनःप्रियदर्शनः ॥ नृपतिवंशजनस्यचवल्लभोभवतिदेवगुरौतनुगेनरः ॥ १ ॥ सुरगुरौधनमन्दिरसंश्रितेप्रमुदितोरुचिरः प्रमदापतिः ॥ भवतिमानधनोबहुमौक्तिकैर्गतवसुर्भविताप्रसवान्हिके ॥ २ ॥ सहजमंदिरगेचबृहस्पतौभवतिबंधुगतार्थसमन्वितः ॥ कृपणतामपिगच्छतिकुत्सितेधनयुतोपिसदाधनहानिमान् ॥ ३ ॥ सुहृदताचसुहृज्जनवंदितः सुरगुरौसुतगेहगतेनरः ॥ विपुलशास्त्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मतिः सुखभाजनंभवतिसर्वजनप्रियदर्शनः ॥ ४ ॥ करिहयैश्चकृशाङ्गतनुर्भवेज्जयतिशत्रुकुलंरिपुगेगुरौ ॥ रिपुगृहेयदिवक्रगतेगुरौरिपुकुलाद्भयमा
तनुतेविभुः ॥ ५ ॥ युवतिमंदिरगेसुरयाजकेनयतिभूपतितुल्यसुखंजनः ॥ अमृतराशिसमानवचाः सुधीर्भवतिचारुवपुःप्रियदर्शनः ॥ ६ ॥ विम
लतीर्थकरेचबृहस्पतौनिधनतानमनःस्थिरतायदा ॥ धनकलत्रविहीनकृशःसदाभवतियोगपथेनिरतःपरम् ॥ ७ ॥ सुरगुरौनवमेमनुजोत्तमोभवतिभू
पतितुल्यधनीशुचिः ॥ कृपणबुद्धिरतःकृपणः सुखीबहुधनप्रमदाजनवल्लभः ॥ ८ ॥ दशममंदिरगेचबृहस्पतौतुरगरत्नविभूषितमंदिरः ॥ भवतिनी
तिगुणैर्बुधसंयुतःपरवराङ्गणवर्जितधार्मिकः ॥ ९ ॥ व्रजतिभूमिपतेःसमताधनैर्निजकुलस्यविकारकरः सदा ॥ सकलधर्मरतोर्थसमन्वितोभवति
चायगतेसुरयाजके ॥ १० ॥ शिशुदशाभवनेत्दादिरोगवानुचितदानपराङ्मुखएवच ॥ कुलधनेनसदाकुलदांभिकोभवतिपापगृहेचबृहस्पतौ ॥
॥ ११ ॥ ॥ इतिगुरुफलम् ॥ ॥ अथशुक्रफलम् ॥ ॥ उरसिगेतनुगेभृगुनंदनेभवतिकार्य्यरतः परपण्डितः ॥ विमलशल्यगृहीसदने
रतोभवतिकौतुकहाविधिचेष्टितः ॥ १ ॥ परधनेनधनीधनगेभृगौभवतियोषितिवित्तपरोनरः ॥ रजतसीसधनीगुणशैशवःकृततनुःसुवचाबहुबा
लकः ॥ २ ॥ सहजमंदिरवर्तिनिभार्गवेप्रचुरमोहयुतोभगिनीसुतः ॥ भवतिलोचनरोगसमन्वितोधनयुतःप्रियवाक्चसदंबरः ॥ ३ ॥ भवतिबंधुग
तेभृगुजेनरोबहुकलत्रसुतेनसमावृतः ॥ सुरमतेसुखमध्यवरेगृहेवसनपानविलाससमावृतः ॥ ४ ॥ तनयमंदिरगेभृगुनंदनेभृगुसुतोदुहितावरपूजितः॥
बहुधनोगुणवान्वरनायकोभवतिचापिविलासवतीप्रियः ॥ ५ ॥ भवतिवैकुशलोद्भवपंडितोरिपुगृहेभृगुजेस्तगतेनरः ॥ जयतिवैरिबलंनिजतुङ्गजेभृ
गुसुतेसुखदेकिलषष्ठगे ॥ ६ ॥ युवतिमन्दिरगेवसतेनरोबहुसुतेनधनेनसमन्वितः ॥ विमलवंशभवःप्रमदापतिर्भवतिचारुवपुर्मुदितः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुखी ॥ ७ ॥ निधनसद्मगतेभृगुजेजनोविमलधर्मरतोनृपसेवकः ॥ भवतिमांसप्रियःपृथुलोचनोनिधनमेतिचतुर्थवयेपिवा ॥ ८ ॥ विमलतीर्थपरीक्षतनुःसुखीसुखरद्विजवर्णरतःशुचिः ॥ निजभुजार्जितभाग्यमहोत्सवोभवतिधर्मगतेभृगुजेनरः ॥ ९ ॥ दशममन्दिरगेभृगुवंशजेबधिरबन्धुयुतःसचभोगवान् ॥ वनगतोपिचराज्यफलंभेत्समरसुन्दरवेषसमन्वितः ॥ १० ॥ लभनभागवतेभृगुनन्दनेवरगुणावहितोप्यनलव्रतः ॥ मदनतुल्यवपुःसुखभाजनंभवतिहास्यरतिःप्रियदर्शनः ॥ ११ ॥ निजमितेव्ययवर्तिनिभार्गवेभवतिरोगयुतःप्रथमेनरः ॥ तदनुदंभपरायणचेतनःकृशबलोमालिनःसहितसदा ॥ १२ ॥ ॥ इतिशुक्रफलम् ॥ ॥ अथशनिफलम् ॥ ॥ सततमल्पगतिर्मदपीडितस्तपनजेतनुजेखलुचाधमः ॥ भवतिहीनकचःकृशविग्रहोनिजसुत्दद्रिपुसद्मनिमानवः ॥ १ ॥ धननिकेतनवर्त्तिनिभानुजेभवतिवाक्यसहःसधनान्वितः ॥ चपललोचनसंचयनेरतोभवतिचौरपरोनियतंसदा ॥ २ ॥ सहजमन्दिरगेतपनात्मजेभवतिसर्वसहोदरनाशकः ॥ तदनुकूल्यनृपेणसमोनरःस्वसुतपुत्रकलत्रसमन्वितः ॥ ३ ॥ बंधुस्थितोभानुसुतोनराणांकरोतिबंधोर्निधनंचरोगी ॥ स्त्रीपुत्रभृत्येनविनाकृतश्चग्रामान्तरेचासुखदःसवक्री ॥ ४ ॥ शनैश्चरेपंचमशत्रुगेहेपुत्रार्थहीनोभवतीहदुःखम् ॥ तुङ्गेनिजेमित्रगृहेचपङ्क्तौपुत्रैकभागीभवतीतिकश्चित् ॥ ५ ॥ नीचोरिपोर्नीचकुलक्षयंचषष्ठंशनिर्गच्छतिमानवानाम् ॥ अन्यत्रशत्रून्विनिहंतितुङ्गीपूर्णार्थकामाजनतांददाति ॥ ६ ॥ विश्रामभूतांविनिहंतिजायांसूर्यात्मजःसप्तमगश्चरोगान् ॥ धत्तेपुनर्दंभधरांगहीनंमित्रस्यवंशोनुवितासुत्दच्च ॥ ७ ॥ शनैश्चरेचाष्टमगेमनुष्योदेशान्तरेतिष्ठतिदुःखभागी ॥ चौर्यापराधेनचनीचहस्तेपंचत्वमाप्नोत्यथनेत्ररोगी ॥ ८ ॥ धर्मस्थपंगुर्बहुदंभकारीधर्मार्थहीनःपितृवंशकश्च ॥ मदानुरक्तोनिधनीचरोगीपापिष्ठभार्यापरहीनवीर्यः ॥ ९ ॥ शनैश्चरेकर्मगृहेस्थितेपिमहाधनीनृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यजनानुरक्तः ॥ प्राप्तप्रवासेनृपसद्मवासीनशत्रुवर्गाद्भयमेतिमानी ॥ १० ॥ सूर्यात्मजेचायगतेमनुष्योधनीविमृश्यौबहुभोग्यभागी ॥
शीतानुरागीमुदितःसुशीलःसबालभावेभवतीतिरोगी ॥ ११ ॥ व्ययेशनौपंचगणाधिनाथोगदान्वितोहीनवपुःसुदुःखी ॥ जंघाव्रणीक्रूरमतिः
कृशांगोवधेरतःपक्षिगणस्यनित्यम् ॥ १२ ॥ इतिशनिफलम् ॥ ॥ अथराहुफलम् ॥ ॥ रोगीसदादेवरिपौतनुस्थेकुलेचधारीबहुजल्पशीलः ॥
रक्तेक्षणःपापरतःसुधर्मारतःसदासाहसकर्मदक्षः ॥ १ ॥ राहौधनस्थेकृतचौरवृत्तिःसदाविलिप्तोबहुदुःखभागी ॥ मत्स्येनमांसेनसदाधनीचसदा
वसेन्नीचगृहेमनुष्यः ॥ २ ॥ भ्रातुर्विनाशंप्रददातिराहुस्तृतीयगेहेमनुजस्यदेही ॥ सौख्यंधनंपुत्रकलत्रमित्रंददातितुङ्गीगजवाजिभृत्यान्
॥ ३ ॥ राहौचतुर्थेधनबंधुहीनोग्रामैकदेशेवसतिप्रकृष्टः ॥ नीचानुरक्तःपिशुनश्चपापीपुत्र्यैकभागीकृशयोषिदासाम् ॥ ४ ॥ राहुःसुतस्थः
शशिनानुगोहिपुत्रस्यहर्ताकुपितःसदैव ॥ गेहान्तरेसोपिसुतैकमात्रंदत्तेप्रमाणंमलिनंकुचैल ॥ ५ ॥ षष्ठेस्थितःशत्रुविनाशकारीददातिपुत्रं
चधनानिभोगान् ॥ स्वर्भानुरुच्चैरखिलाननर्थान्हंत्यन्ययोषिद्गमनङ्करोति ॥ ६ ॥ जायास्थराहुर्धनहानिजायांददातिनार्योविविधांश्चभो
गान् ॥ पापानुरक्ताङ्कुटिलासुशीलांददातिशेषैर्बहुभिर्युतश्च ॥ ७ ॥ राहुःसदाचाष्टममंदिरस्थोरोगान्वितंपापरतंप्रगल्भम् ॥ चोरंकृशङ्कापुरुषंधनाढ्यं
मायामतीतंपुरुषङ्करोति ॥ ८ ॥ धर्मस्थितेचंद्ररिपौमनुष्यश्चंडालकर्मापिशुनःकुचैलः ॥ ज्ञातिप्रमोदेनिरतश्चदीनःशत्रोःकुलाद्भीतिमुपैतिनित्यम्
॥ ९ ॥ कामातुरःकर्मगतेचराहुःपरार्थलोभीसुखरश्चदीनः ॥ म्लानोविरक्तःसुखवर्जितश्चविहारशीलश्चपलोतिदुष्टः ॥ १० ॥ आयस्थितेसोमरिपौम
नुष्योदान्तोभवेन्नीलवपुःसुमूर्तिः ॥ वाचाल्पयुक्तोपरदेशवासीशास्त्रज्ञवेत्ताचपलोनिलज्जः ॥ ११ ॥ रिपुस्थितेसोमरिपौनराणांधर्मार्थहीनोबहुदुःख

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तप्तः ॥ कान्ताविमुक्तश्चविदेशवासीसुखैश्चहीनःकुनखीकुवेशः ॥ १२ ॥ इतिराहुफलम् ॥ ॥ अथद्विग्रहीयोगफलम् ॥ ॥ स्त्रीशःकूटकक
र्माचदुर्विनीतःक्रियादृढः ॥ विक्रियोलघुचेताश्चचन्द्रसूर्यसमागमे ॥ १ ॥ सूर्यचन्द्रौ ॥ सूर्यमङ्गलसंयोगेतेजस्वीपापमानसः ॥ मिथ्यावादीच
मूर्खश्चबंधुनिष्ठोबलीनरः ॥ २ ॥ सूर्यमंगलौ ॥ विद्वानार्योराजमान्यःसेवाशीलःप्रियंवदः ॥ यशस्वीचस्थिरद्रव्योबुधसूर्यसमागमे ॥ ३ ॥
सूर्यबुधौ ॥ नृपमान्योधर्मनिष्ठोमित्रवानर्थवानपि ॥ उपाध्यायोतिविख्यातोयोगेजीवार्कयोर्भवेत् ॥ ४ ॥ सू.बृ. ॥ शस्त्रप्रहारखण्ड्यश्चरङ्गक्षेत्रे
तिदुर्लभः ॥ स्त्रीसङ्गलब्धबंधश्चसक्तःशुक्रार्कसङ्गमे ॥ ५ ॥ ॥ सू.शु. ॥ ॥ विद्वानपिक्रियानिष्ठोधातुज्ञोवृद्धचेष्टितः ॥ प्रनष्टसुतदारश्चश
निसूर्यसमागमे ॥ ६ ॥ सू.श. ॥ चन्द्रमङ्गलसंयोगेरक्तपीडातुरोभवेत् ॥ मृद्धर्मधातुशिल्पीचधनीशूरोरणेभवेत् ॥ ७ ॥ चं.मं. ॥ स्त्रीसंसक्त
सुरूपश्चकायेचनिपुणोनरः ॥ धनीगुणीहास्यवक्त्रोविद्वान्स्याद्धार्मिकान्वये ॥ ८ ॥ चं.बु. ॥ देवद्विजार्चासक्तश्चबंधुमान्यकरोधनी ॥ दृढप्री
तिःसुशीलश्चजीवचंद्रसमागमे ॥ ९ ॥ ॥ चं. बृ. ॥ कुशीलोवक्रपाचैववृषलःकलहप्रियः ॥ अल्पवस्त्रादिसंयुक्तःशशिभार्गवसंगमे ॥ १० ॥
चं.शु. ॥ गजाश्वपालोदुःशीलोवृद्धस्त्रीरमणोनरः ॥ वेश्याधनोल्पपुत्रश्चशनिचन्द्रसमागमे ॥११॥ चं.श. ॥ भूपुत्रबुधसंयोगेनिर्धनोविधवापतिः॥
स्त्रीदुर्भगःकणप्रीतःस्वर्णलोहप्रकीर्णकः ॥ १२ ॥ मं.बु. ॥ मेधावीशिल्पशास्त्रज्ञःश्रुतज्ञोवाग्विशारदः ॥ अश्वप्रियःप्रधानश्चजीवमंगलसंगमे ॥१३॥
मं.बु. ॥ गुणप्रधानोगुणकोद्यूतानृतरतःशठः ॥ परदाररतोमान्यःशुक्रमङ्गलसङ्गमे ॥ १४ ॥ मं.शु. ॥ वाग्मींद्रजालदक्षत्वंविधर्माकलहप्रियः ॥
विष्वघ्नश्चप्रपंचाढ्योमन्दमङ्गलसङ्गमे ॥ १५ ॥ मं.श. ॥ बुधस्यगुरुणायोगेनृत्यवाद्यविचक्षणः ॥ धैर्येयुक्तःपण्डितश्चसुखीभवतिमानवः ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बु.बृ. ॥ बुधभार्गवयोर्योगेनयज्ञोबहुशिल्पवित् ॥ धनीसुवाक्योवेदज्ञोगीतज्ञोहास्यलालसः ॥ १७ ॥ बु.शु. ॥ क्षीणोगमनशीलश्चनिरुपायोजग
त्कलिः ॥ शुभवाक्यःकार्यदक्षोभानुसूनुबुधान्वये ॥ १८ ॥ बु.श. ॥ गुरुभार्गवसंयोगेदिव्यरोमामहाधनी ॥ धर्मास्तिकप्रमाणज्ञोविद्याजीवीच
जायते ॥ १९ ॥ बृ.शु. ॥ वृत्तिसिद्धिश्चशूरश्चयशस्वीनगराधिपः ॥ श्रेणिसेनाभिमुख्यश्चगुरुमन्दान्वयेनरः ॥ २० ॥ बृ.शु. ॥ शुक्रेणचशनेर्योगे
मत्तःपशुपतिर्नटः ॥ दासदारेणदक्षश्चक्षुराशिल्पादिशल्यवित् ॥ २१ ॥ ॥ इतिद्विग्रहीयोगः ॥ ॥ यन्त्रास्यकूटकुशलोसृग्वेदनापीडितोतिशू
रश्च ॥ आदित्यचन्द्रभौमैरेकस्थैर्जायतेनतवाक् ॥ १ ॥ सू०चं०मं० ॥ विद्याधनरूपयुतःकाव्यकथाकविसभाप्रियःसधनः ॥ नृपसेवकःप्रियवा
गेकस्थेसूर्यचंद्रबुधे ॥ २ ॥ सू०चं०बु० ॥ धर्मपरोनृपसचिवोदृढमेधामानकृच्चबंधूनाम् ॥ देवद्विजार्चनरतोरविशशिजीवैःसहैकस्थैः ॥ ३ ॥
॥ सू०चं०बृ० सुवपुःक्षिपतारिणोनरपतिसुभगःसदाप्रवरतेजाः ॥ रविशशिशुक्रैःसहितैर्भवतिनरोदंतविकृतश्च ॥ ४ ॥ सू०चं०शु० ॥ धर्मपरोविग
तधवोगजाश्वपरिपालकःसुकर्मरतः ॥ रविरवितनशशाङ्कैरेकस्थैर्विगतशीलश्च ॥ ५ ॥ सू०चं०श० ॥ भानुभौमबुधैर्योगेख्यातःसाहसिकोनरः ॥
निष्ठुरोगतलज्जश्चधनस्त्रीपुत्रमण्डितः ॥ ६ ॥ सू० मं० बु० ॥ जीवसूर्यकुजैर्योगेप्रचण्डःसत्यभाषणः ॥ राजमंत्रीचनिर्वापिसुवा
क्योनिपुणोभवेत् ॥ ७ ॥ सू० मं० बृ० ॥ शुक्रभौमार्कसंयोगेसुभगोनयनातुरः ॥ कुशीलोवत्सलोदक्षोविषयासक्तमानसः ॥ ८ ॥
॥ सू० मं० शु० ॥ शनिसूर्यकुजैर्योगेमूर्खोगोधनवर्जितः ॥ रोगार्तःस्वजनैर्हीनोविकलःकलहाकुलः ॥ ९ ॥ सू० मं० श० ॥ बुधजीवार्क
संयोगेनेत्ररोगीमहाधनी ॥ शास्त्रशस्त्रकलाविज्ञोलिपिकर्ताभवेन्नरः ॥ १० ॥ सू० बु० बृ० ॥ शुक्रसूर्यबुधैर्योगेगुरुवर्गैर्निराकृतः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतिशस्तोदिशोयातिस्त्रीहेतोस्तप्तमानसः ॥ ११ ॥ सू०बु०शु० ॥ शनिसूर्यबुधैर्योगेदुराचारःपराजितः ॥ बंधुभिश्चपरित्यक्तोद्विदोषीजायते
नरः ॥ १२ ॥ श०सू०बु० ॥ मंदजीवार्कसंयोगेपुत्रमित्रकलत्रवान् ॥ निर्भयोनृपतिद्वेष्टास्वेष्टबंधुर्भवेन्नरः ॥ १३ ॥ श०बृ०र० ॥ चन्द्र२
चान्द्रकुजैर्योगेनीचाचारश्चपापकृत् ॥ आजीवितक्रियोलोकेबंधुहीनश्चजायते ॥ १४ ॥ चं०मं०बु० ॥ चंद्रजीवकुजैर्योगेस्त्रीलोलोवर्णसंयुतः ॥
कान्तश्चसङ्गतस्त्रीणांचन्द्रतुल्यमुखोभवेत् ॥ १५ ॥ चं०मं०बृ० ॥ चंन्द्रशुक्रकुजैर्योगेदुःशीलःपापनिःसुतः ॥ सदाभ्रमणशीलश्चशीतभीतोपि
जायते ॥ १६ ॥ चं०मं०शु० ॥ शनिचन्द्रकुजैर्योगेबालेस्यात्मृतमातृकः ॥ क्षुद्रावलोकविद्विष्टोविषमोजायतेनरः ॥ १७ ॥ चं०मं०श० ॥
जीवचन्द्रबुधैर्योगेतेजस्वीधनवानपि ॥ पुत्रमित्रादिसंयुक्तोवाग्मीख्यातश्चकीर्तिमान् ॥ १८ ॥ चं०बु०बृ० ॥ बुधेन्दुभार्गवैर्योगेविद्ययालंकृतो
नरः ॥ सेव्योधनातिलोभीचनीचाचारश्चजायते ॥ १९ ॥ चं० शु० बु० ॥ बुधेन्दुमंदसंयोगेप्राज्ञोभूपतिपूजितः ॥ अत्युच्चोविपुला
ङ्गश्चवाग्मीभवतिमानवः ॥ २० ॥ चं० बु० श० ॥ शुक्रजीवेंदुसंयोगेसाध्वीपुत्रश्चपंडितः ॥ साधुःसर्वकलाभिज्ञःसुभगोजायतेनरः ॥
॥ २१ ॥ शु० बृ० चं० जीवेंदुमंदसंयोगेनीरोगःस्त्रीगतोनरः ॥ शास्त्रार्थविज्ञःसर्वज्ञोग्रामपत्तनपालकः ॥ २२ ॥ चं० गु० श० ॥
शनिशुक्रेंदुसंयोगेलिपिकर्ताचवेदवित् ॥ पुरोहितकुलोत्पन्नोभवेत्पुस्तकवाचकः ॥ २३ ॥ चं० शु० श० ॥ जीवसौम्यबुधैर्योगेसुकविर्यु
वतिप्रियः ॥ परोपकारकृत्क्षीरोगांधर्वकुशलोभवेत् ॥ २४ ॥ मं० बु० बृ० ॥ भृगुभौमबुधैर्योगेविकलांगश्चचंचलः ॥ अकुलीनःसदोत्साही
तृप्तश्चमुखरोनरः ॥ २५ ॥ शु० मं० बु० ॥ बुधमंदकुजैर्योगेप्रवासीनेत्ररोगवान् ॥ प्रेष्योवदनरोगीचहास्यलुब्धोभवेन्नरः ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मं० बु० श० ॥ जीवकाव्वकुजैर्योगेदिव्यनारीयुतःसखी ॥ सर्वानंदकरोलोकेजायतेनृपतेःप्रियः ॥ २७ ॥ मं० बृ० शु० ॥ जीवमंद
कुजैर्योगेकृत्ताङ्गोराजपूजितः ॥ नीचाचारोनिर्धनश्चभवेन्मित्रैर्विगर्हीतः ॥ २८ ॥ मं० बृ० श० ॥ भृगुमंदकुजैर्योगेदुःशीलायाःपतिःशुभः ॥
प्रवासशीलोदुःखीचजातकोजायतेसदा ॥ २९ ॥ मं० शु० श० ॥ बुधेज्यभृगुसंयोगेसुतनुर्नृपपूजितः ॥ जितारिर्दीर्घकीर्तिश्चसत्यवादीभ
वेन्नरः ॥ ३० ॥ बु० बृ० शु० ॥ बुधार्किजीवसंयोगेसुचारोबहुभोगवान् ॥ धनैश्वर्ययुतःप्राज्ञःसुखधैर्ययुतोभवेत् ॥ ३१ ॥ बु० बृ० श० ॥
मंदशुक्रबुधैर्योगेसुखरःपारदारिकः ॥ असत्त्यागीकलाभिज्ञःस्वदेशनिरतोभवेत ॥ ३२ ॥ बु० शु० श० ॥ मंदेज्यशुक्रसंयोगेराजाभवतिकी
र्तिमान् ॥ नीचवंशेपिसंभूतःशीलयुक्तोनृपोभवेत् ॥ ३३ ॥ श० बृ० शु० ॥ प्रायःपापैर्युतेचंद्रेमातुर्नाशोरवौपितुः ॥ शुभग्रहैःशुभंवाक्यंमि
श्रितैर्मिश्रितंफलम् ॥ ३४ ॥ शुभास्त्रयोग्रहायुक्ताःकुर्वंतिसुखिनंनरम् ॥ पापास्त्रयोदुःखितंचदुर्विनीतंविगर्हितम् ॥ ३५ ॥ ॥ इतित्रिग्रही
योगः ॥ ॥ चंद्रचांद्रिकुजार्काणांयोगेलिपिकरोनरः ॥ तस्करोमुखरोवाग्मीमायावीकुशलोभवेत् ॥ १ ॥ र० चं० मं० बु० ॥ भौमभास्करचं
द्रेज्यसंयोगेनिपुणोधनी ॥ तेजस्वीगतशोकश्चनीतिज्ञश्चभवेन्नरः ॥२॥ र०चं०मं०बृ० ॥ सूर्येंदुभौमशुक्राणांयोगेविज्ञोर्थसंग्रही ॥ सुखीपुत्रकलत्रीच
वाग्वृत्तिर्मनुजोभवेत् ॥ ३ ॥ र० चं० मं० शु० ॥ अर्कार्किशशिभौमानांयोगेमूर्खश्चनिर्धनः ॥ ह्रस्वोविषमदेहश्चभिक्षावृत्तिर्भवेन्नरः ॥ ४ ॥ र.चं.
मं०श० ॥ सोमसौम्यार्कजीवानांयोगेशिल्पकरोधनी ॥ सौवर्णिकाप्लुताक्षश्चरोगहीनश्चजायते ॥ ५ ॥ र. चं. बु. बृ० ॥ चंद्रार्कबुधशुक्राणांसंयोगे
सुभगोनरः ॥ ह्रस्वश्चराजमान्यश्चवाग्मीचविकलोभवेत ॥ ६ ॥ र.चं.बु.शु. ॥ अर्कार्किचान्द्रचंद्राणांयोगेभिक्षाशनोनरः ॥ नियुक्तःपितृमातृभ्यां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विकलाख्यश्चनिर्धनः ॥ ७ ॥ चं० र. बु, श, ॥ सूर्यचंद्रेज्यशुक्राणाँसंबन्धेराजपूजितः ॥ जलारण्यमृगस्वामीनरःस्यान्निपुणः सुखी ॥ ८ ॥ र. चं. बृ. शु. ॥ सूर्यचन्द्रार्किजीवानामन्यस्यवनिताप्रियः ॥ बहुवित्तःसुतःक्षीणःसमयाक्षश्चजायते ॥ ९ ॥ र. चं. बृ. श. ॥ सितासितखींदूनांयोगेचात्यन्तदुर्बलः ॥ वनितासदृशाचारोभीरुरग्रेसरोनरः ॥ १० ॥ चं.र.शु.श. ॥ बुधार्ककुजजीवानांयोगेसूत्रकरोनरः ॥ परदाररतःशूरोदुःखीचक्रधरोभवेत् ॥ ११ ॥ बु. र. मं. बृ. ॥ रविशुक्रकुजेन्दूनामन्वयेपारदारिकः ॥ निर्लज्जोदुर्जनश्चौरोविषमाङ्गोनरोभवेत् ॥ १२ ॥ र. चं. मं.शु. ॥ अर्कार्किबुधभौमानांयोगेयोद्धाकविर्जनः ॥ मंत्रीचभूपतिस्तीक्ष्णोनीचाचारोपिजायते ॥ १३ ॥ र. मं. बु. श. ॥ भौमार्कबुधशुक्राणांयोगेपूज्योधनीमतः ॥ सुभगोनृपमान्यश्चनरोभवतिनीतिमान् ॥ १४ ॥ र.मं.बु.शु. ॥ भान्वार्किभौमजीवानामैक्येचगणनायकः ॥ सौन्मादोनृपमान्यश्चसिद्धार्थोजायतेनरः ॥ १५ ॥ र.मं.बृ.श. ॥ मंदमार्तण्डशुक्रैरैःसंयुक्तैर्जायतेनरः ॥ लोकद्विष्टःसमाख्यातोनीचाचारोजडाकृतिः ॥ १६ ॥ र.मं.शु.श. ॥ जीवशुक्रबुधार्काणांयोगेबहुमतिर्नरः ॥ धनीसुखीचसिद्धार्थःसुहृष्टश्चप्रजायते ॥ १७ ॥ र. बु.बृ.शु. ॥ अर्कार्किबुधदेवेज्यैरेकराशिस्थितैर्नरः ॥ मातृभ्रात्रोःकलहकृत्स्त्रीबाचारोनिरुद्यमः ॥ १८ ॥ र.बु.श.बृ. ॥ शुक्रसौरिबुधार्काणांयोगेमित्रयुतःशुचि ॥ मुखरःसुभगःप्राज्ञोजायतेचसुखीनरः ॥ १९ ॥ र. बु. शु. श. ॥ सूर्यसौरिसितेज्यानांसंबंधेलोभवान्सुखी ॥ कविःकारुकनाथश्चराजप्रीतोभवेन्नरः ॥ २० ॥ र.बृ.शु.श. ॥ चंद्रचांद्रिकुजेज्यानांयोगेशास्त्रविचक्षणः ॥ नरेंद्रश्चमहामात्योमहाबुद्धिर्नरोभवेत् ॥ २१ ॥ चं. मं. बु. गु. ॥ भौमेन्दुबुधशुक्राणामन्वयेबंधकीपतिः ॥ निद्रालुःकलहीवाचौबंधुद्वेषीजनोभवेत् ॥ २२ ॥ चं. मं. बु. शु. ॥ भौमेंदुबुधसौरीणांयोगेशूरकुलोद्भवः ॥ पुत्रमित्रकलत्रीच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विमातृपितृकोजनः ॥ २३ ॥ चं.मं.बु.श. ॥ चन्द्रारगुरुशुक्राणांयोगेसाहसिकोभवेत् ॥ विकलांङ्गोधनीपुत्रीमानीप्राज्ञोपिजायते ॥ २४ ॥ चं.मं.
बृ.शु. ॥ भौमेंदुमंदजीवानामन्वयेबधिरोधनी ॥ सोन्मादःस्थिरवाक्यश्चशूरोविज्ञोभवेन्नरः ॥ २५ ॥ चं. मं. बृ. श. ॥ चंद्रारशुक्रमंदानांमलिनःकु
लटापतिः ॥ सोद्वेगःसर्पतुल्याक्षःप्रगल्भोजातकोभवेत् ॥ २६ ॥ चं. मं. शु, श. ॥ विद्वान्द्विमातृपितृकःसद्भूतोधनयुतोतिसुभगश्च ॥ भवति
नरोविगतारिर्बुधशनिगुरुभार्गवैःसहितैः ॥ २७ ॥ बु. श. बृ. शु. ॥ जीवशुक्रबुधेन्दूनामन्वयेसुभगोधनी ॥ विमातृपितृकःप्रोक्तअर्तारिर्जा
यतेनरः ॥ २८ ॥ चं०बु०बृ०शु० ॥ मंदेज्यचंद्रचांद्रीणांयोगेबंधुप्रियःकविः ॥ तेजस्वीराजमंत्रीचयशोधर्मयुतोनरः ॥ २९ ॥ चं०बु०बृ०श० ॥
चन्द्रेज्यसितसौरीणामन्वयेपारदारिकः ॥ प्राज्ञोनिर्द्रव्यबंधूनांस्थूलभार्योनरोत्तमः ॥ ३० ॥ चं०बृ०शु०श० ॥ बुधारभृगुजीवानांयोगेस्त्रीकलहप्रियः॥
धनीसुशीलोनीरोगोलोकपूज्योनरोभवेत् ॥ ३१ ॥ मं० बु० बृ० शु० ॥ भौमेज्यसौम्यसौरीणांयोगेशूरश्चनिर्द्धनः ॥ सत्यशौचव्रतेविद्वान्दी
नोवाग्मीनरोभवेत् ॥ ३२ ॥ मं०बु०गु०श० ॥ मौल्येनपुष्टिर्योद्धाचबुधारयमभार्गवैः ॥ ख्यातोलोकेदृढांगश्चसारमेयेरुचिर्भवेत् ॥ ३३ ॥
बु. मं. शु. श. ॥ भौमेज्यशनिशुक्राणांयोगेस्याद्वासनातुरः ॥ परदाररतोमानीकितवोजायतेनरः ॥ ३४ ॥ मं. गु. शु. श. मेधावीशास्त्र
निरतःकामेसक्तोविधेयसत्यश्च ॥ बुधजीवशुक्रसौरैःसहस्थितोतीव्रसंयोगे ॥ ३५ ॥ बु. बृ. शु. श. ॥ ॥ इतिचतुर्ग्रहीफलम् ॥ ॥ बहु
प्रपंचीदुःखीचजायाविरहतापितः ॥ सूर्याद्यैर्जीवपर्यंतैर्नरःस्यात्पंचविग्रहैः ॥ १ ॥ र.चं.मं.बु.बृ. ॥ गतसत्योबंधुहीनःपरकर्मरतोनरः ॥ क्लीबस्यचस
खासूर्यभौमेंदुबुधभार्गवैः ॥ २ ॥ र.चं.मं.बु.शु. ॥ स्यादल्पायुश्चविकलोदुःखीसुतविवर्जितः ॥ अर्कार्किबुधचंद्रारयोगेबंधनभागपि ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चं. र. मं. बु. श. ॥ ॥ जात्यन्धोबहुदुःखीचपितृमातृविवर्जितः ॥ नागप्रीतोनरोभौमभानुचन्द्रेज्यभार्गवैः ॥ ४ ॥ र. चं. मं. बृ. शु. ॥ परद्रव्यहरोयोद्धापरतापकरःखलः ॥ समर्थोजायतेमंदचंद्रजीवार्कभूसुतैः ॥ ५ ॥ र. चं. मं. बृ. श. ॥ मानाचारधनैर्हीनःपरदाररतोनरः ॥ एकस्थैर्जायतेभानुभौमेन्दुशनिभार्गवैः ॥ ६ ॥ र. चं. मं. शु. श. ॥ राजमंत्रीभूरिवित्तोयंत्रज्ञोदंडनायकः ॥ ख्यातोजनेयशस्वीचजीवार्केन्दुज्ञभार्गवैः ॥ ७ ॥ र. चं. बु. बृ. श. ॥ परान्नभोजीसोन्मादःप्रियतप्तश्चवंचकः ॥ उग्रोभीरुनरःसूर्यशनिचंद्रेज्यचंद्रजैः ॥ ८ ॥ र. चं. बु. बृ. श. ॥ धनपुत्रसुखैर्हीनोमृत्युसाहीचलोमशः ॥ दीर्घोभवतिचंद्रार्कबुधशुक्रशनैश्चरैः ॥ ९ ॥ र. चं. बु. शु. श. ॥ इंद्रजालरतोवाग्मीचलचित्तोंगनाप्रियः ॥ प्राज्ञश्चदक्षोनिर्भीतःशुक्रेज्यार्केंदुसूर्यजैः ॥ १० ॥ र. चं. बु. शु. श. ॥ स्फीतोबहुहयःकामीनरोऽशोकीचभूपतिः ॥ बुधार्ककुजशुक्रेज्यैःसुभगोभूपतेःप्रियः ॥ ११ ॥ र. मं. बु. बृ. शु. ॥ भिक्षाभोगीचरोगीचनित्योद्विग्नोमलीमसः ॥ जीर्णोनरोभानुभौमशनिजीवबुधैर्भवेत् ॥ १२ ॥ र. मं. बु बृ. श. ॥ बहुबंधनभोगार्त्तोविद्वाँल्लोकेषुपूजितोभवति ॥ श्रोत्रविकलशरीरःकुजशुक्रबुधशशिमंदैःस्यात् ॥ १३ ॥ चं. मं. बु. शु. श. ॥ व्याधिभिर्ग्रस्तकरणःस्थानभ्रष्टोविभूषितः ॥ नरःस्याद्विकलःशुक्रमंदार्कबुधभूसुतैः ॥ १४ ॥ र. मं. बु. शु. श. ॥ विज्ञोबिलेपारदेचधातुयंत्ररसायने ॥ नरःप्रसिद्धोभूपुत्ररविजीवसितासितैः ॥ १५ ॥ र. मं. बु. शु. श. ॥ साधुकल्याणहीनश्चधनविद्यासुखान्वितः ॥ बहुपुत्रोनरोजीवभौमेन्दुबुधभार्गवैः ॥ १६ ॥ चं. मं. बु. बृ. शु. परान्नयाचकोविप्रोमलिनस्तिमिरामयि ॥ नरोभवतिभौमेन्दुजीवशुक्रशनैश्चरैः ॥ १७ ॥ चं. मं. बृ. शु. श. ॥ दुर्भगोमलिनोमूर्खःप्रेतःक्लीबश्चनिर्धनः ॥ नरोभवतिचन्द्रेज्यशुक्रसौरिमहीसुतैः ॥ १८ ॥ चं. मं. बृ. शु. श. ॥ बहुमित्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रिपक्षश्चदुःशीलःपरपीडकः ॥ मानीनरःसोमसौम्यशुक्रमंदधरासुतैः ॥ १९ ॥ चं. मं. बु. शु. श. ॥ राजमंत्रीराजतुल्योलोकपूज्योगणाधिपः ॥ चन्द्रचन्द्रजमन्देज्यभृगुपुत्रैर्नरोभवेत् ॥ २० ॥ चं. मं. बु. शु. श. ॥ अलसस्तामसोनित्यंसोन्मादोराजवल्लभः ॥ निद्रातुरोनरोभौमबुधजीवार्किभार्गवैः ॥ २१ ॥ मं. बु. बृ. शु. श. ॥ इतिपंचग्रहीफलम् ॥ ॥ विद्याधर्मधनैर्युक्तोबहुभोगीचभाग्यवान् ॥ सूर्याद्यैःशुक्रपर्यन्तैःख्यातोभवति षड्ग्रही ॥ १ ॥ र. चं. मं. बु. बृ. श. ॥ परकार्यकरोदाताशुद्धात्माचंचलाकृतिः ॥ षड्भिर्ग्रहैर्विनाशुक्रंरमतेविजयीजनः ॥ २ ॥ र. चं. मं. बु. बृ. श. ॥ संशयीसुभगोमानीख्यातोयुद्धेरिमर्दकः ॥ विनाजीवंग्रहैःषड्भिर्विनोदेरमतेजनः ॥ ३ ॥ र. चं. मं. बु. शु. श. ॥ आर्याप्रियोरणोत्साहीविभ्रमःक्रोधलोभवान् ॥ अर्कार्किचन्द्रभौमेज्यभार्गवैःसुभगोनरः ॥ ४ ॥ र. चं. मं. बृ. शु. श ॥ कलत्रहीनोनिर्द्रव्योराजमंत्रीक्षमायुतः ॥ रवीन्दुबुधजीवोर्किभृगुभिःसुभगोनरः ॥ ५ ॥ र. चं. बु. बृ. शु. श. ॥ धनीमंत्रीशुचिस्तन्द्रीबहुभार्योनृपप्रियः ॥ विनासूर्यग्रहैःषड्भिःप्रतापीजायतेनरः ॥ ६ ॥ चं. मं. बु. बृ. शु. श. ॥ परदाररतःकुष्टीस्थानभ्रष्टोनिराकृतिः ॥ मूर्खश्चोरश्चसूर्यारबुधेंदुशनिभार्गवैः ॥ ७ ॥ र. चं. मं. बु. शु. श. ॥ परकर्मकरोनीचोभोगीस्याच्छ्वासकासवान् ॥ निंद्योनरःसूर्यसोमभौमजीवसितार्किभिः ॥ ८ ॥ र. मं. चं. बृ. शु. श. ॥ प्रायोदरिद्रोमूर्खश्चषड्भिर्वापञ्चभिर्ग्रहैः ॥ अन्योन्यदर्शनात्तेषांफलमेतत्प्रकीर्तितम् ॥ ९ ॥ ॥ इतिषड्ग्रहीफलम् ॥ ॥ ॥ अथ केंद्रायुः ॥ ॥ केंद्रांशसंख्यांत्रिगुणींविधायराह्वारसंख्याँककृतोविहीनम् ॥ आयुःप्रमाणंकथितंमुनींद्रैश्चिरंतनैर्ज्योतिषिकैःस्मृतानि ॥ ॥ १ ॥ केंद्रस्थानस्थितानंकान्त्रिगुणीकृतोयावान्पिंडस्तावद्वर्षसंख्यायुः ॥ यदिकेन्द्रमध्येराहुशनिमङ्गलाः भवंतितत्केंद्रांकान्संमील्यशेषं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिगुणीकार्यम् ॥ ॥ इतिजन्मपत्रीपद्धतौपंचाङ्गफलभावचक्रानयनभावाध्यायद्वित्रिचतुःपंचग्रहीषड्ग्रहीफलाध्यायःप्रथमः ॥ १ ॥ ॥
॥ अथभवनेशफलम् ॥ ॥ प्रणिपत्यपरंज्योतिःसर्वंचजगतीतलम् ॥ तमःप्रशमनंवक्ष्येजन्मशास्त्रप्रदीपकम् ॥ १ ॥ लग्नाधिपतिर्लग्नेनीरो
गंदीर्घजीवितङ्करुते ॥ अतिबलमदनपतिंवाभूलाभसमन्वितंलाभम् ॥ २ ॥ लग्नपतिर्धनभुवनेधनवन्तंविपुलजीवितंकुरुते ॥ अतिबलमदन
पतिंवाभूलाभंवासुधर्मतान्तनुते ॥ ३ ॥ सहजगतोलग्नपतिःसद्बंधुप्रवरमित्रपरिकलितम् ॥ धर्मरतन्दातारंशूरंसबलङ्करोतिनरम् ॥ ४ ॥ लग्ने
शेतुर्यगतेनृपप्रियंप्रचुरजीवितंकुरुते ॥ स्निग्धपितरंपित्रोर्भक्तमबहुभोजनङ्करुते ॥ ५ ॥ पंचमगेलग्नपतौसुतसप्ताङ्गमीश्वरंविदितम् ॥ बहुजी
वितंसुगीतंसुकर्मनिरतंसुतंकुरुते ॥ ६ ॥ रिपुभवनेलग्नेशेनीरोगंभूमिलाभंच ॥ सबलंकृपणंधनिनमरिघ्नंसुकर्मपक्षान्वितंकुरुते ॥ ७ ॥ प्रथम
पतौसप्तमगेतेजस्वीशीतवान्भवेत्पुरुषः ॥ तद्भार्यापिसुशीलातेजःकलितासुरूपाच ॥ ८ ॥ लग्नपतावष्टमगेकृपणोधनसंचकस्तुदीर्घायुः ॥
क्रूरखेचरेकाणःसौम्यैःपुरुषोभवेत्सौम्यः ॥ ९ ॥ मूर्तिपतिर्यदिनवमेतदाभवतिप्रचुरबांधवःसुकृती ॥ सममित्रस्तुसुशीलःसुकृतीख्यातः
सुतेजस्वी ॥ १० ॥ प्रथमेशोदशमस्थोनृपलाभोपण्डितःसुशीलश्च ॥ गुरुमात्रपूजनमतिर्नृपप्रसिद्धोभवति ॥ ११ ॥ एकादशस्थतनुपः
सजीवितंसमन्वितंविदितम् ॥ तेजःकलितंकुरुतेपुरुषंलग्नंस्यादितिकदापि ॥ १२ ॥ द्वादशमेमूर्तिपतौकटुकवत्कर्मपरोऽशुभोनीचः ॥
मानीसहगोत्रीभिर्विदेशगोदत्तभुक्तधनः ॥ १३ ॥ ॥ इतिप्रथमभवनेशफलम् ॥ ॥ द्रव्यपतिर्लग्नगतःकृपणंव्यवसायिनंसुकर्माणम् ॥
धनिनंश्रीपतिविहितंकरोतिनरमतुलभोगभुजम् ॥ १४ ॥ व्यवसायीचसुलाभीउत्पन्नभुगलीककारकोनीचः ॥ आलिककृद्विदितोपूर्णोद्वेगी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धनपतौधनगे ॥ १५ ॥ धनपेसहजगतेबंधोर्भेदनावर्जितेक्रूरे ॥ सौम्येराजविरोधोभूतनयेतस्करःपुरुषः ॥ १६ ॥ तुर्यगतेद्रविणपतौपि
तृलाभकरःसदोदयः ॥ दीर्घायुःक्रूरेष्वपिअथवामरणंविनिर्देश्यम् ॥ १७ ॥ तनयकमलविलासीकर्मणिकष्टतरंप्रसिद्धंच ॥ कृपणंवृषनिधानंसुत
पतेर्धनपतिःकुरुते ॥ १८ ॥ षष्ठगतोद्रविणपतिर्धनसंग्रहतत्परंरिपुघ्नम् ॥ भूलाभिनंसुखचरैःपापैर्धनवर्जितंपुरुषम् ॥ १९ ॥ धनपेनचसप्तम
गेगेहश्रेष्ठाचिताविलासवती ॥ धनसंग्रहणीभार्याक्रूरेखेचरेभवेद्वंध्या ॥ २० ॥ धनपेष्टमभुवनस्थेअष्टकपालीचात्मकोघातकःपुरुषः ॥ उत्प
न्नभुग्विलासीवरधनहिंसीभवतिदैवपरः ॥ २१ ॥ धनगेधर्मगृहस्थेसौम्येदानप्रसिद्धवाग्भवति ॥ क्रूरेदारिद्रीभिक्षुकःकुटुंबवृत्तिस्तथामनुजः ॥
॥ २२ ॥ दशमगृहगेधनपेनरेंद्रमान्योभवेन्नृपालक्ष्मीः ॥ सौम्यगृहगेचमातुर्मनुजः पितृपालकोभवति ॥ २३ ॥ एकादशमःखेचरव्यवहारे
श्रीपतिःख्यातः ॥ लोकौघप्रतिपालनरतंख्यातंचनरंभवेज्जातम् ॥ २४ ॥ द्रविणपतौव्ययलीनेपुरुषंकृपणंधनवर्जितंक्रूरे ॥ सौम्येलाभालाभंख्या
तन्नरंभवेज्जातम् ॥ २५ ॥ ॥ इतिधनभवनेशफलम् ॥ सहजपतिर्लग्नगतेवाग्वादीलंपटःस्वजनभेदी ॥ सेवापरःकुमित्रःकूटकरःप्रोच्यतेपुरुषः ॥
॥ १ ॥ धनगृहगेसहजेशेभिक्षुर्निधनोऽल्पजीवितोमनुजः ॥ बंधुविरोधीक्रूरेसौम्येपुनरीश्वरःखचरैः ॥ २ ॥ सहजगतःसहजपतिःसमत्वंसुहृदंशुभः
स्वजनम् ॥ देवगुरुपूजनरतंनृपलाभपरंनरंकुरुते ॥ ३ ॥ भ्रातृपतौमातृपतौपितृबंधुसहोदरेषुसुखभोगी ॥ मात्रासहवैरकरःपितृवित्तस्यभक्षकःपुरुषः
॥ ४ ॥ दुश्चिक्यपतौसुतगेसुखबान्धवसुतसहोदरैःपाल्यः ॥ दीर्घायुर्भवतिनरःपरोपकारैकनिरतमतिः ॥ ५ ॥ षष्ठगतेसहजपतौबंधुविरोधीचनयनरो
गीच ॥ भूलाभंभवतिभृशंकदाचिदपिरोगसंकलितः ॥ ६ ॥ सप्तमगेसहजेशेनरस्यभार्याभवेत्सुशीलाच ॥ सौभाग्यवतीयुवतिःक्रूरादेवरगृहेयाति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ७ ॥ भ्रातृपतिरष्टमगःसहजंनृपसोदरंनरंकुरुते ॥ क्रूरेबहुव्यंगिनमपिजीवतियद्यष्टवर्षाणि ॥ ८ ॥ धर्मगतेसहजपतौक्रूरेबंधुभिस्तथासौम्यैः ॥
सहबान्धवसुकृतीसोदरभक्तोभवेन्मनुजः ॥ १ ॥ दुश्चिक्येदशमगतेनृपपूज्योमातृबन्धुपितृभक्तः ॥ उत्तमबोधोबन्धुषुविनिश्चितोजायतेजातः ॥
॥ १० ॥ लाभस्थःसहजेशःसुबान्धवंराजशालिनङ्कुरुते ॥ कुरुतेबन्धुषुसेवाविधायिनंभोगानिरतंच ॥ ११ ॥ व्ययगेदुश्चिक्येशेमित्रविरोधातिबन्धु
संतापी ॥ दूरेवासितबन्धुर्विदेशगामीनरोभवेज्जातः ॥ १२ ॥ ॥ इतिद्वादशभवनेसहजेशफलम् ॥ ॥ तुर्यपतिर्लग्नगतःपितृपुत्रयोःस्नेहंमि
थःकुरुते ॥ उत्तमेपितृपक्षौवैरिकलितंपितृनाम्नासुप्रसिद्धञ्च ॥ १ ॥ पातालपेधनस्थेक्रूरखगेपितृविरोधकृच्छुभङ्कुरुते ॥ पितृपालकःप्रसिद्धःपिताभुन
क्तिनतुतल्लक्ष्मीम् ॥ २ ॥ तुर्येशेसहजस्थेपितृमातृवेदकंनरंकुरुते ॥ पित्रासहकलहकरँपितृबान्धवघातकङ्कुरुते ॥ ३ ॥ तुर्यगतेतुर्यपतौपितरि
क्षितिपाधिपनाथमानकरः ॥ विदितःपितृलाभकरोभवतिसुधर्माधनीधनपः ॥ ४ ॥ सुतपेतुर्यगृहेशेपितृसंलाभँयश्चदीर्घायुः ॥ भवतिकृतिप्रसिद्धः
ससुतःसुतपालकश्चैव ॥ ५ ॥ हिबुकपतौसुतसंस्थेमातुरर्थविनाशकःशिशुर्जातः ॥ पितृदोषरतःसौम्येधनवंचकस्तनयः ॥ ६ ॥ अंबुपतौसप्तमगे
क्रूरंसुखरंसुखान्नपालयति ॥ सौम्यैःपालयतिपुनःकुजयुक्ताङ्कुजकवीकुरुतः ॥ ७ ॥ छिद्रगतेतुर्यपतिःक्रूरंरोगान्वितन्दरिद्रंवा ॥ दुष्कर्मपरंमृत्युःप्रि
यमथवामानवङ्कुरुते ॥ ८ ॥ सुकृतेतुर्यपतौपितर्यसंगीसमस्तविद्यावान् ॥ पितृधर्मसंग्रहपरःपितृनिरपेक्षोभवेन्मनुजः ॥ ९ ॥ पातालपेंबरगतेपापे
सुतोमातरंत्यजतिश्रयते ॥ कन्यादयितःसौम्यैःपुनरन्यसेवाकृत्पुरुषः ॥ १० ॥ एकादशेतुर्यपतौधर्मीपितृपालकःसुकर्माच ॥ पितृभक्तोभव
तिपुनः प्रचुरायुर्व्याधिरहितश्च ॥ ११ ॥ द्वादशगेतुर्यपतौमृतपितरौवाविदेशगोवाच्यः ॥ पुत्रस्यपापखेचरेअल्पपितुर्जन्मनिनिर्देश्यः ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इतिद्वादशचतुर्थभुवनेशफलम् ॥ ॥ लग्नगतेपञ्चमपेप्रसिद्धस्तोकतनयपरीकलितम् ॥ शास्त्रविदंवेदविदंसुकर्मनिरतङ्करुते ॥ १ ॥ पञ्चमप
तिर्धनस्थेक्रूरेखेचरेधनेप्सितङ्करुते ॥ गीतादिकलाकलितंनष्टभुजंस्थानकप्रचुरम् ॥ २ ॥ तनयपतिःसहजगतोबन्धुजनेसुविदितङ्करुते ॥ सुतंतदी
यस्तनयापरिपालयंतितद्बन्धुः ॥ ३ ॥ सुतपःपातालगतःपितृकर्मणांप्रतिपालितंपित्रा ॥ जननीभुक्तिंकुरुतेक्रूरैस्तुविरोधिनंपितृभिः ॥४॥ तनयग
तस्तनयपतिर्मतिमन्तंमानितंवचनंकुरुते ॥ सुतकलिताप्रकटजननंविख्यातंमानवङ्करुते ॥ ५ ॥ पंचमपतिरहितगतःशस्त्रप्रतिमांगसंभवंहीनम् ॥
रोगधनंधनरहितंक्रूरःखचरःकरोतिनरम् ॥ ६ ॥ तनयपतौसप्तमगेस्वसुताःसुभगाश्चदेवगुरुभक्ताः ॥ प्रियवादिनीसुशीलानरस्यननुजायतेदयिता
॥ ७ ॥ सुतपेनिधनगृहस्थेकटुवाङ्निस्त्रपोयदाभवति ॥ चण्डःशब्दाव्यंगीसहजातनयाभवंतितथा ॥ ८ ॥ सुकृतगतस्तनयपतिःसुबोधविद्याक
विःसुगीतज्ञः ॥ नृपपूजितःसुरूपंनाटकरसिकंनरङ्करुते ॥ ९ ॥ सुतपतिरंबरहीनोनृपकर्मणांनृपाकलितभावम् ॥ सत्कर्मरतंप्रवरंजननीसुखकृत्सुतं
ङ्करुते ॥ १० ॥ सुतनाथेलाभस्थेशूरःसुतवान्सत्यकृतासंगी ॥ गीतादिसुकलाकलितोनृपभाजीजायतेजातः ॥ ११ ॥ पञ्चमपेद्वादशगेक्रूरसुताविहि
तशुभःसुसुतः ॥ सुतसंतापपरःस्याद्विदेशगमनोभवेन्मनुजः ॥ १२ ॥ ॥ इतिपञ्चमभवनेशफलम् ॥ ॥ षष्ठेशोलग्नगतोनीरुक्सबलःकुटुंब
कष्टकरः ॥ बहुपक्षोरिपुहन्ताभवतिनरःखेचरवचनरतः ॥ १ ॥ शत्रुपतौद्रविणस्थेदुष्टश्चतुरोहिसंग्रहिपरेष्टः ॥ स्थानप्रवरोविदितोव्याधिततनुःसुह
द्वित्तघ्नः ॥ २ ॥ षष्ठपतिःसहजस्थःकुरुतेसलोककष्टकरः ॥ निजजनकमारणकष्टंसंग्रामतस्तस्य ॥ ३ ॥ षष्ठाधिपतिस्तुतुर्येपितृतनयौवैरिणौमिथःकु
रुते ॥ सरुक्पितासोथसुतालक्ष्मींलभतेनरःसुचिरम् ॥ ४ ॥ रिपुभवनगेपितृतनयौवैरिणोस्मृतिःसुततः ॥ क्रूरेशुभेचनिर्द्धनः पदवीदुष्टश्चतत्फलति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ५ ॥ रिपुभवनेरिपुस्थेनीरुक्वैरीसुखीकृपणः ॥ नहिजन्मतोपिसीदतिस्थानकवासीचभवतिनरः ॥ ६ ॥ अहितपतौसप्तमगेक्रूरेभार्या
विरोधिनीचण्डी ॥ सन्तापकरीत्वथसौम्येर्वंध्यावागर्भनाशपरा ॥ ७ ॥ शनिर्ग्रहणिकारुजोनिषधराद्धरानन्दनादबुधश्चविषदोषतःसपदिमृ
त्युरेणाङ्कतः ॥ रवेर्मृगपतेर्वधात्प्रकटमष्टमात्षष्ठपाद्गुरोरुपरिदुष्टधीर्नयनदोषवाञ्छुक्रतः ॥ ८ ॥ शत्रुपतिर्यदिनवमःक्रूरःखचरस्तदाभवेखंजः ॥
बन्धुविरोधीशास्त्रंनमन्यतेयावकःपुरुषः ॥ ९ ॥ अरिपेदशग्रहस्थेक्रूरेमातरिरिपुस्तदापुष्टः ॥ धर्मसुतपालनमतिर्मातुर्दोषीभवेद्वैरी ॥ १० ॥
वैरिपतौलाभगतेक्रूरेमणंविपक्षतोभवति ॥ वैरीतस्करकृतहानिःस्याच्चतुष्पदालभ्यभवान्मनुजः ॥ ११ ॥ षष्ठपतौद्वादशगेचतुष्पदाद्रव्यहा
निकरः ॥ गमनागमनंलक्ष्मीहादेवपरोभवति ॥ १२ ॥ ॥ इतिषष्ठभुवनेशफलम् ॥ ॥ दयितेशोलग्नगतःस्तोकंनिस्नेहमन्यतरभा
र्यम् ॥ भोगभुजंरूपयुतञ्जनयतिदयितादलितवित्तम् ॥ १ ॥ जायापतौधनस्थेदुष्टादयितासुतेप्सितोभवति ॥ वित्तंकलत्रकरेसचतत्दयिता
करोविसङ्गश्च ॥ २ ॥ सप्तमपेसहजगतेआत्मबलोत्साहवत्सलोदुःखी ॥ देवरवृतासुरूपागृहिणीक्रूरासुहृद्वृहगा ॥ ३ ॥ जायेशेतुर्यस्थेलो
लःपितृपैरिसाधिकस्नेही ॥ अव्यक्तादुर्वाक्यातद्भार्यापालयेत्पिता ॥ ४ ॥ सप्तमपतौसुतस्थेसौभाग्ययुतःसुतान्वितः पुरुषः ॥ प्रियसाहसदुष्ट
मतिस्तत्तनयःपालयेद्दयिताम् ॥ ५ ॥ रिपुग्रहगःकान्तेशःप्रिययासहवैरिणंसरुक्भायम् ॥ दयितासङ्गीक्षयिणंक्रूरःकुरुतेचमृत्युपदम् ॥ ६ ॥
सप्तमपतिःसप्तमगेपरमायुःप्रीतवत्सलःपुरुषः ॥ निर्मलशीलसमेतस्तेजस्वीजायतेजातः ॥ ७ ॥ सप्तमपतिर्निधनगतोगणिकासुरतःकरग्रहणरतः ॥
नित्यञ्चिन्तायुक्तोमनुजःकिलजायतेदुःखी ॥ ८ ॥ सुकृतगतेसप्तमपतौतेजोवाञ्छीलवान्प्रियोप्येवम् ॥ क्रूरेषण्ढविरूपोलग्नेशोवीक्षणपुंबलः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ९ ॥ सप्तमपेदशमस्थेनृपदोषीलंपटःकपटचित्तः ॥ क्रूरोदुःखार्त्तःस्याच्छ्वश्रवशगोभवेत्पुरुषः ॥ १० ॥ लाभस्थेजायेशेभक्तारूपान्वितासुशीलाच ॥ दयितापरिणीतास्यान्नरस्यतनुर्जायतेसततम् ॥ ११ ॥ सप्तमपेद्वादशगेगृहबन्धानारस्तिकाभवेद्भार्या ॥ सालोलादुष्टयुतादूराच्चलतिचतस्यपुरुषस्य ॥ १२ ॥ ॥ इतिसप्तमभुवनेशफलम् ॥ ॥ अष्टमपतौलग्नगतेबहुविघ्नोदीर्घरोगभृत्स्तेनः ॥ नष्टोरुवादनिरतोलक्ष्मींलभतेनृपतिवचसा ॥ १ ॥ निधनपतौधनलाभेऽल्पजीवितौरवेखान्नरश्चचोरः ॥ क्रूरेसौम्येतिशुभङ्किमुक्षितिपालतोमरणम् ॥ ॥ २ ॥ अष्टमपतौतृतीयेबन्धुविरोधीसुहृद्विरोधीच ॥ व्यंगोदुर्वाक्लोलःसोदरसहितोभवत्यथवा ॥ ३ ॥ निधनेतुर्यगतेपितृरिपुःपितृमतोलक्ष्मीम् ॥ पितृपुत्रयोश्चयुद्धंजनकोरोगान्वितोभवति ॥ ४ ॥ छिद्रपतौतनयस्थेक्रूरेसुतविरतःशुभेशुभः ॥ जातोपिनैवजीवतिजीवेदथकितवकर्मरतः ॥ ५ ॥ छिद्रेशेरतिसङ्गतेदिनकरेभूभृद्विरोधीयुरौत्वंगेसीदतिदृष्टिरोगकलितःशुक्रेसरोगीविधौ ॥ भौमेकोपयुतोबुधेहिभवभृत्तुंगार्तिभूमिःशनौकष्टंराहुबुधेचशुक्रशशिभृत्सौम्येक्षितेनैवकिम् ॥ ६ ॥ मृत्युपतौसप्तमगेदुरुदररुक्कुशीलवल्लभोदुष्टः ॥ क्रूरोभार्याद्वेषीकलत्रदोषान्मृतिंलभते ॥ ७ ॥ निधनपतौनिधनगतेव्यवसायीव्याधिवार्जितेनीरुक् ॥ कितवकलाकलितवपुःकितवकुलेजायतेविदितः ॥ ८ ॥ मृतिनाथेनभस्थेनिःसंगीजीवघातकःपापी ॥ निर्बंधुर्निःस्नेहीपूज्योविमुखेसुखेव्यंगः ॥ ९ ॥ कर्मगतेनिधनेशेनृपकर्मानावकर्मनिरतश्च ॥ अलसःक्रूरेखचरेतनयोवानजीवतिनमाता ॥ १० ॥ लाभस्थेमृत्युपतौबाल्येदुःखीसुखीभवतिपश्चात् ॥ दीर्घायुःसौम्येखगेपापेऽल्पायुर्नरोभवति ॥ ११ ॥ व्ययसंस्थितेष्टमेशेक्रूरखात्तस्करःशठोनिर्घृणः ॥ आत्मगतिर्व्यंगवपुर्मृतिस्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काकादिभिर्भक्ष्यः ॥ १२ ॥ ॥ इतिअष्टमभुवनेशफलम् ॥ ॥ लग्नगतेनवमपतौदेवान्गुरून्मन्यतेमहाशूरः ॥ कृपणःक्षितिपतिकर्मास्वल्प
ग्रासीभवतिमतिमान् ॥ १ ॥ नवमपेधनगतेवृषतोविदितःसुशीलवान्सत्यः ॥ सुकृतीवदनव्यङ्गश्चतुष्पदापन्नपीडगतः ॥ २ ॥ सहजगतेसुकृ
तपतौरूपस्वीबन्धुवत्सलःपुरुषः ॥ बन्धुस्त्रीरणकृद्यदिजीवतिबन्धुभिःसदासहितः ॥ ३ ॥ सुकृतेशेहिबुकस्थेपितृभक्तःपितृयात्रादिकेविदितः ॥
विदितःसुकृतीपुरुषःपितृकर्मारतमतिर्भवति ॥ ४ ॥ सुकृतगृहपेसुतस्थेसुकृतीदेवपूजनेनिरतः ॥ वपुषासुन्दरमूर्तिःसुकृतसमेताःसुबहवः ॥ ५ ॥
शत्रुप्रणतिपरायणधर्मकलितङ्कलाविकलकार्यम् ॥ दर्शननिंदानिरतंसुकृतपतिःषष्ठगःकुरुते ॥ ६ ॥ नवमपतौसप्तमगेसत्यवतीसुवदनासुरू
पाच ॥ शीलश्रीयुतदयितासुकृतयुताजायतेनियतम् ॥ ७ ॥ दुष्टोजंतुविधातीगृहबंधुविवर्जितःसुकृतरहितः ॥ नवमेशेनिधनगतेक्रूरेषण्ढः
साविज्ञेयः ॥ ८ ॥ सुकृतगतःसुकृतपतिःसुबंधुभिःप्रीतमतुलनवममत्वम् ॥ दातारंदेगुरोःस्वजकलत्रादिषुयुक्तम् ॥ ९ ॥ नृपकर्माणंशूरंमातापि
त्रोश्चपूजकंपुरुषम् ॥ धर्मख्यातङ्कुरुतेसुकृतपतिर्गगनगृहशीलः ॥ १० ॥ दीर्घायुर्धर्मपरोधनेश्वरःस्नेहलोनृपतिलाभी ॥ सुकृतंख्यातीसुसु
तःसुकृतविभोलाभभुवनस्थे ॥ ११ ॥ द्वादशगेसुकृतेशेमानीदेशान्तरेसुरूपश्च ॥ विद्यावाञ्छुभखेटेक्रूरेचभवेद्गतिधूर्तः ॥ १२ ॥ ॥ इति
नवमभुवनेशफलम् ॥ ॥ दशमपतौलग्नगतेमातरिवैरीपितुर्भक्तः ॥ दुष्टगतेचतातेखलुपरपुरुषरताभवतिमाता ॥ १ ॥ वित्तस्थेगगनपतौमात्रा
पालितोसुतोभवतिलोभी ॥ मातरिदुष्टोनितरांस्वल्पग्रासीश्रुतसुकर्मा ॥ २ ॥ मातुस्वजनविरोधीसेवानिरतोनकर्मणिसमर्थः ॥ मातु
लकपालितःस्याद्दशमपतौसहजभुवनस्थे ॥ ३ ॥ व्योमपतौतुर्यगतेसुखेपिरतःसदाचारः ॥ भक्तश्चपितरिमातरिनृपमानीजायतेपुरुषः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुभकर्मकोविडंबीनृपलाभीगीतवाद्यनिरतःस्यात् ॥ गगनपतौतनयगतेपालयतिचतंसुतंमाता ॥ ५ ॥ अंबरपेरिपुसंस्थेशत्रुभयात्कातरःकलह
शीलः ॥ कृपणःकृपयाहीनोनरोनरोगीभवतिलोके ॥ ६ ॥ सुतवतीशुभरूपसमन्वितानिजपतिपालनलालसा ॥ भवतितस्यशुभङ्करुतेसदा
प्रियतमावरयेद्दयितागते ॥ ७ ॥ पुष्करपतिरष्टमगःक्रूरंशूरंमृषान्वितन्दुष्टम् ॥ मातरिसंतापकरंजनयतितनुजीवितङ्कितवम् ॥ ८ ॥ शुभ
शीलःसद्बंधुः सन्मित्रोपशमपेनवमलिने ॥ तन्मातापिसुशीलासुकृतवतीसत्यवचनरता ॥ ९ ॥ गगनपतिर्गगनगतोजनयतिजननीसुखप्रदं
पुरुषम् ॥ जननीकुलविपुलसुखंप्रकटनघठनाकनीयांसम् ॥ १० ॥ मातोद्यतभर्तारंतथाचसुतभक्तिताभवेत्सुखिता ॥ दीर्घायुर्मातृसुखः
पुरुषोलाभस्थितोंबरपे ॥ ११ ॥ मात्रोज्झितोनिजबलःशुभकर्मानृपतिकर्मरतचेताः ॥ व्योमपतौव्ययसंस्थेदेशान्तरगतश्चपापखगे ॥
॥ १२ ॥ ॥ इतिदशमभुवनेशफलम् ॥ ॥ अल्पायुर्बलकलितःशूरोदाताजनप्रियःसुभगः ॥ लाभपतौलग्नगतेतूलाद्दोषान्मतिर्लभते ॥
॥ १ ॥ वित्तगतेलाभपतावुत्पन्नभुगल्पभोजनोल्पायुः ॥ अष्टमकपालेरोगःक्रूरेसौम्येचधनाकुलितः ॥ २ ॥ बन्धुश्रीपालनकःसुबन्धवो
बन्धुवत्सलःसुभगः ॥ लाभेशेसहजगतेबंधूनांरिपुकुलच्छेत्ता ॥ ३ ॥ तुर्यस्थेलाभेशेदीर्घायुःपितरिभक्तिभाक्भवति ॥ समयैककर्मनिरतः
स्वधर्मरतोलाभवान्मनुजः ॥ ४ ॥ लाभपतिःपुत्रगतःपितृपुत्रस्नेहलंभिथःकुरुते ॥ तुल्यगुणश्चपरस्परंस्वल्पायुर्जायतेपुरुषः ॥ ५ ॥
षष्ठगतेलाभपतौसुदीर्घरोगीसुवैरिकलितश्च ॥ तस्करहस्तान्मृत्युःक्रूरेदेशान्तरगतस्य ॥ ६ ॥ सप्तमगेलाभेशेतेजस्वीशीलसंपदःपदवीः ॥
दीर्घायुर्भवतिनरस्तथैकदयितापतिर्नित्यम् ॥ ७ ॥ एकादशपेष्टमगेऽल्पायुर्भवतिसुरोगीच ॥ जीवन्मृत्युश्चतुरोदुःखीभवतिनरःसौम्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नृपसुकृतःसुसेवोदक्षःशुक्रेणसुनफायाम् ॥ ५ ॥ निपुणमतिर्ग्रामपुरैर्नित्यंसंत्याजितोधनसमृद्धः ॥ सुनफायांरवितनयेक्रियासुयुक्तोभवेन्मलिनः
॥ ६ ॥ ॥ इतिसुनफायोगफलम् ॥ ॥ अथअनफाफलम् ॥ ॥ चोरःस्वामीदृग्भ्यःस्ववशीमानीरणोत्कंठः ॥ क्रोधात्संपत्साध्यःस्व
तनुःकुजोनफायांप्रगल्भ्यश्च ॥ १ ॥ गंधर्वोलेख्यपटुःकविःप्रसक्तानृपाप्तसत्कारः ॥ रुचिरसुभगोनफायांप्रसिद्धकर्माविबुधश्चभवेत् ॥ २ ॥ गांभीर्यः
सन्मेधाचानुयुतोबुद्धिमान्नृपाप्तवशगः ॥ अनफायांत्रिदशगुरौयातःशक्तोविर्भवति ॥ ३ ॥ युवतीनामतिसुभगःप्रणयाक्षितपस्यागोपिताकुंतः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ कनकसमृद्धश्चपुमाननफायांभार्गवेभवति ॥ ४ ॥ निस्तीर्णभृज्जनेशोगृहीतवाक्यश्चतुष्पदसमृद्धः ॥ दुर्बलतायाभोगाद्गुणसहितःपुत्रवान्त्र
विजे ॥ ५ ॥ ॥ इतिअनफायोगफलम् ॥ ॥ आमृतकोबहुवित्तोनिपुणोनिशठोगुणाधिकोलुब्धः ॥ वृद्धस्त्रीप्रसक्तःकुलाग्रणीःशशिनिभौम
बुधमध्ये ॥ १ ॥ ख्यातःकर्मसुकितवोबहुधनवैरस्त्वमर्षणोधृष्टः ॥ आरक्तकःशुक्रगुर्वोर्मध्यगतशशिनिसंग्राही ॥ २ ॥ उत्तमसुरतोबहुसंचय
कारकोव्यसनसक्तः ॥ क्रोधीपिशुनोरिपुमान्यमादयोस्यादुरधरायाम् ॥ ३ ॥ धर्मरतःशास्त्रज्ञोवाक्पटुःसर्ववर्द्धनसमृद्धः ॥ त्यागयुतोविख्या
तोगुरुबुधमध्यस्थितेचंद्रे ॥ ४ ॥ देशेदेशेगच्छतितत्रतपोनास्तिविद्ययासहितः ॥ चंद्रेन्येषांपूज्यःस्वजनविरोधीज्ञमंदयोर्मध्ये ॥ ५ ॥ प्रियवा
क्सुभगःकांतःप्रवृत्तगोयदिसुकृतवान्नृपतिः ॥ सौख्यःशूरोमंत्रीबुधसितयोर्मध्यगेचाहिमकिरणे ॥ ६ ॥ धृतमेधःस्थैर्ययुतोनीतिज्ञःकनकरत्नपरि
पूर्णः ॥ ख्यातोनृपकृत्यकरोगुरुसितयोर्दुर्धरायोगे ॥ ७ ॥ सुखनयविज्ञानयुतःप्रियवाक्कविद्वान्धुरंधरोमर्त्यः ॥ ससुतोधनीसुरूपश्चंद्रोगुरुभार्ग
वेतुलांतरगे ॥ ८ ॥ वृद्धचरितःखलाढ्योनिपुणस्त्रीवल्लभोधनसमृद्धः ॥ नृपसत्कृतंबहुज्ञंकुरुतेचंद्रःशनिसितयोः ॥ ९ ॥ ॥ इतिदुर्धरा
योगफलम् ॥ ॥ अथकेमद्रुमफलम् ॥ ॥ केमद्रुमेभवतिपुत्रकलत्रहीनोदेशांतरेव्रजतिदुःखदाभितप्तः ॥ ज्ञातिप्रदोदनिरतोमुखरः
कुचैलोनीचःसदाभवतिभीतियुताश्चिरायुः ॥ १ ॥ ॥ यथारत्नकोशेउक्तम् ॥ ॥ कुलेनित्यभोगधनभुग्धनसहनाढ्यस्सागान्वितो
धुरंधरांप्रभवेत्सुभृत्यः ॥ केमद्रुमेमलिनदुःखितनीचतेक्षोनिस्वश्चतत्रनृपतेरपिवंशजातः ॥ २ ॥ ॥ अथकेमद्रुमेभंगमाह ॥ ॥ हित्वार्क
सुनफायुजीदुरधरास्वांत्योभवेत्स्थैर्ग्रहैःशीतांशोःकथितोन्यथातुबहुभिःकेमद्रुमोत्थैःपरैः ॥ केंद्रेशीतकरेथवाग्रहयुतेकेमद्रुमोनेपितेकेचित्केंद्रनवां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शकेष्वितिवदंत्युक्तिःप्रसिद्धानते ॥ १ ॥ ॥ इतिरत्नकोशे ॥ ॥ पुनःकेमद्रुमभंगः ॥ ॥ कुमुदगहनबंधुर्वीक्षमाणःसम
स्तैर्गगनगृहनिवासैर्दीर्घजीवीचिरायुः ॥ फलमशुभसमुत्थंयच्चकेमद्रुमोक्तंसभवतिनरनाथःसार्वभौमोजितारिः ॥ १ ॥ पूर्णःशशीयदिभवेच्छुभ
संस्थितोवासौम्यामरेज्यभृगुनंदनसंयुतश्च ॥ पुत्रार्थसौख्यजनकःकथितोमुनींद्रैःकेमद्रुमेभवतिमंगलसुप्रसिद्धिः ॥ २ ॥ अथसुनफादयोयोगास्ते
कथमुत्पद्यंतेतदाह ॥ ॥ श्रीलघुजातकात् ॥ ॥ रविवर्ज्यद्वादशगैःसुनफांचन्द्राद्वितीयगैः ॥ सुनफायाउभयस्थितैर्दुर्द्धराकेमद्रमसंज्ञितावा
च्याः ॥ १ ॥ ॥ एतेयोगाश्चंद्रादुत्पद्यंते ॥ ॥ अथसूर्याद्वेशिवोशियोगमाह ॥ ॥ सूर्याद्व्ययगेवोशिर्द्वितीयगैश्चन्द्रवर्जितैर्वेशिः ॥ उभ
यस्थितैर्ग्रहगणैरुभयचरीनामतःप्रोक्तः ॥ १ ॥ मन्ददृक्स्थिरवचनंपरिभूरिश्रमंनतोर्द्धतनुम् ॥ कथयतिगणिताधिपतिर्वेशिसुमत्थंत्वधोदृष्टिम्
॥ २ ॥ बहुसंचयंयदिनुसदृक्वोशौपुरुषोभवेद्गुरोर्जातः ॥ भीरुःकायाद्विलग्नोलघुचेष्टोभृगुसुतोपराधीनः ॥ ३ ॥ परतर्कितोदरिद्रोमृदुर्विनी
तोबुधोविगतलज्जः ॥ मातृघ्नःक्षितिपुत्रोपरोपकारीनरोवोशौ ॥ ४ ॥ परदारश्चन्द्रेचवृद्धाकारोघृणीभवेन्मनुजः ॥ संजातोनरोवोशौयोगे
शनैश्चरेणसंयुक्ते ॥ ५ ॥ ॥ इतिवोशियोगफलम् ॥ ॥ उच्चेष्टवचाःस्मृतिमान्योगयुतोनिरीक्षतेतिर्यक् ॥ पूर्वशरीरेपृथुलोतुच्छगतिः
सात्विकोवेशौ ॥ १ ॥ धृतिसत्यबुद्धियुक्तोभवतियुरुर्वेशिगोवनेशूरः ॥ ख्यातोगुणवानार्यःशूरोभार्गवेपुरुषः ॥ २ ॥ प्रियभाषांरुचिरतनु
र्वेशःस्याद्बाबुधेपराज्ञकृत् ॥ संग्रामेविख्यातोभूमिसुतेसूतगुणवानपिख्यातः ॥ ३ ॥ वणिक्कलाऽवभावःस्यात्परद्रव्यापहारकः ॥ गुरुद्वेषीश
निःसूर्योसोमेवेशिशनैश्चरे ॥ ४ ॥ ॥ इतिवेशियोगफलम् ॥ ॥ सर्वसहःसुसमदृक्समकायःसुस्थितोनिपुणसत्वः ॥ नात्युच्चःपरिपूर्ण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्रीवोभवेदुभयचर्याणाम् ॥ १ ॥ सुभगोबहुभृत्यजनोबंधूनामाश्रयोनृपतितुल्यः ॥ नित्योत्साहीहृष्टोभुनक्तिभोगानुभयचर्यायाम् ॥ २ ॥
॥ इतिसूर्ययोगाः ॥ ॥ अथान्येपियोगालिख्यन्ते ॥ षष्ठाष्टमेद्वादशेचद्वितीयेचयदाग्रहाः ॥ सिंहासनाख्ययोगोयंराजसिंहासनंविशेत् ॥ १ ॥
॥ इति सिंहासनयोगः ॥ ॥ अष्टमस्थायदाक्रूराःसौम्यालग्नेस्थिताग्रहाः ॥ ध्वजयोगोत्रजातस्तुसपुमान्नायकोभवेत् ॥ २ ॥ ॥ इतिध्वज
योगः ॥ ॥ त्रिकोणेसप्तमेलग्नेभवन्तिचयदाग्रहाः ॥ हंसयोगंविजानीयात्स्ववंशस्यैवपालकः ॥ ३ ॥ ॥ इतिहंसः ॥ एकादशेयदासर्वे
ग्रहाःस्युर्दशमेपिच ॥ लग्नस्यसंमुखेवापिकारिकापीरकीर्तिता ॥ ४ ॥ उत्पन्नःकारिकायोगेनीचेपिनृपतिर्भवेत् ॥ राजवंशससमुत्पन्नोराजा
तत्रनसंशयः ॥ ५ ॥ लग्नतश्चान्यतोवापिक्रमेणपतिताग्रहाः ॥ एकावलीसमाख्यातामहाराजोभवेन्नरः ॥ ६ ॥ ॥ इतिएकावली ॥ ॥
चतुर्थकेन्द्रसंज्ञेषुसौम्याःपापग्रहस्थितौ ॥ चतुःसागरयोगोयंराज्यदोधनदोभवेत् ॥ १ ॥ ॥ अथापरःप्रकारः ॥ ॥ कर्कटेमकरेमेषेतुलायां
चग्रहेस्थिते ॥ चतुःसागरयोगःस्यात्सर्वारिष्टनिषूदनः ॥ १ ॥ चतुःसिंधौनरोजातोबहुरत्नसमन्वितः ॥ गजवाजिधनैःपूर्णोधरणीशोभवेन्नरः
॥ १८ ॥ ॥ इतिचतुःसागरयोगः ॥ ॥ चतुर्थेष्वपिकेंद्रेषुक्रूराःसौम्यायदाग्रहाः ॥ क्रूरैःपृथ्वीपतिर्विद्यात्सौम्यैर्लक्ष्मीपतिर्भवेत् ॥ १ ॥ मृगप
तिरजलग्नेभानुकेन्द्रेत्रिकोणेव्ययनिधनसुसंस्थे ८ चन्द्रकर्केवृषेभाः ॥ उभययदिचदृष्टयाजीवशुक्रोथवस्याद्भवतिह्यमरयोगेसर्वारिष्टोविनाशः ॥१२॥
॥ इतिअमरयोगः ॥ ॥ शुक्रेघटे ११ कुजेमेषेसुस्थोदेवपुरोहितः ॥ तदाराजाभवेन्नूनंचापःसौम्यतिदिङ्मुखः ॥ १३ ॥ ॥ इतिचापयोगः ॥
कर्कटेमिथुनेमीनेकन्यायांचापगेग्रहे ॥ दण्डयोगःसमाख्यातोराज्ञामास्पदकारकः ॥ ४ ॥ दण्डेचजातःपृथुपुण्यभागीएकातपत्रीभवतिक्षितीशः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेजोमयःसिंहपराक्रमश्चसंसेव्यमानोगुरुपात्रवृन्दैः ॥ १५ ॥ ॥ अथापरप्रकारेणहंसयोगः ॥ ॥ मेषेघटेचापतुलामृगालौमध्यग्रहेहंसइतिप्र
सिद्धः ॥ सर्वैश्चपूर्णोनृपतेश्चपूज्योहंसोद्भवोराजसमोमनुष्यः ॥ १ ॥ ॥ इतिजातकचन्द्रिकायांहंसः ॥ ॥ धनेव्ययेतथालग्नेशेषस्थानेषुसं
स्थिताः ॥ वापीयोगोभवेदेवमुदितःपूर्वसूरिभिः ॥ ५९ ॥ दीर्घायुःस्यादात्मवंशप्रधानःसौख्योपेतोत्वन्तधरोनरोहि ॥ चंचद्वाक्यस्तन्मतःपुण्यवापी
वापीयोगेयःप्रसूतःप्रतापी ॥ ६० ॥ ॥ इतिवापीयोगः ॥ ॥ ३६ ॥ लग्नाच्चतुर्थात्स्मरतःखमध्याच्चतुर्ग्रहस्थैर्गगनेंबरेंद्रैः ॥ क्रमेणयूपश्चश
रश्चशक्तिर्दंडःप्रदिष्टःखलुजातकज्ञैः ॥ ६१ ॥ धीरोदारोयज्ञकर्मानुसारोनानाविद्यासद्विचारोनरोच्चः ॥ यस्योत्पत्तौवर्ततेयूपयोगोयागोलक्ष्म्याजा
यतेतस्यनित्यम् ॥ ६२ ॥ इतियूपयोगः ॥ ३७ ॥ हिंस्रोत्यंतंतुल्यदुःखैःप्रतप्तःप्राप्तानन्दःकाननान्तेशरज्ञः ॥ मर्त्योयोगेयःशरेजातजन्मास्त्रीरंभा
ख्यातस्यनक्वापिसौख्यम् ॥ ६३ ॥ ॥ इतिशरयोगः ॥ ३८ ॥ ॥ नीचैरुच्चैःप्रीतकृत्सालसश्चसौख्यैरर्थैर्वर्जितोदुर्बलश्च ॥ वादेयुद्धेतस्यबुद्धि
र्विशालाशालासौख्यस्याल्पताशक्तियोगे ॥ ६४ ॥ ॥ इतिशक्तियोगः ॥ ३९ ॥ ॥ दीनोहीनोन्मत्तसंजातसौख्योद्वेष्योद्वेगीगोत्रजैर्जात
वेदः ॥ कांतापुत्रैरर्थपुत्रैर्विहीनोहीनोबुद्ध्यादण्डयोगेतुजन्मा ॥ ६५ ॥ इतिदण्डयोगः ॥ ४० ॥ ॥ लग्नाच्चतुर्थात्स्मरतःखमध्यात्सप्तर्क्षगैर्नेर
थकूटसंज्ञः ॥ छत्रंधनुश्चापगृहप्रवृत्तानौपूर्वकैर्योगइहार्द्धचंद्रः ॥ ६६ ॥ ख्यातोलुब्धोभोगसौख्यैर्विहीनःस्यान्नौयोगेलब्धजन्मामनुष्यः ॥ क्लेशी
शश्चंचलःस्वांतवृत्तिस्तोयोद्भूतेधनधान्येनतस्य ॥ ६७ ॥ इतिनौयोगः ॥ ४१ ॥ ॥ दुर्गारण्यावासशीलश्चमल्लाभिल्लप्रीतिर्निर्धनोनिंद्यकर्मा ॥
धर्माधर्मज्ञानहीनश्चदुष्टःकूटप्राप्तोत्पत्तिरेवंमनुष्यः ॥ ६८ ॥ इतिकूटयोगः ॥ ४१ ॥ ॥ प्राज्ञोराज्ञांकार्यकर्तादयालुःपूर्वेपश्चात्सर्वसौख्यैरुपेतः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्योत्पत्तौछत्रयोगोपलब्धिर्लब्धिःस्याच्चेच्छत्रसच्चामराद्यैः ॥ ६९ ॥ ॥ इतिछत्रयोगः ॥ ४२ ॥ श्रीजातकाभरणे ॥ ॥ आद्येभागेचांतिमे
जीवितस्यसांख्योपेतःकनकाद्रिप्रचारः ॥ योगेजातःकार्मुकेसोतिदुष्टोगर्वोन्मत्तोत्पत्तिकृत्कार्मुकास्त्रः ॥ ७० ॥ ॥ इतिकार्मुकयोगः ॥ ४३ ॥
भूमीपालप्राप्तचंचत्प्रतिष्ठःश्रेष्ठःसेनाभूषणाथांबराद्यैः ॥ चेदुत्पत्तौयस्ययोगोर्द्धचंद्रश्चंद्रःसस्यादुत्सवार्थंजनानाम् ॥७१॥ इतिअर्द्धचंद्रयोगफलम् ॥४४॥
॥ ततोर्द्धनाड्यैकग्रहांतरणेस्युःस्थानषट्केगगनेचरेन्द्राः ॥ चक्राभिधानश्चसमुद्रनामायोगावितीहाकृतिजाश्चविंशत् ॥ ७२ ॥ श्रीमद्रोयोत्यं
तजातप्रतापोभूपोभूपोपायनैरर्चितःस्यात् ॥ योगेजातःपुरुषोयस्तुचक्रेचक्रेपृथ्व्याःशालिनीतस्यकीर्तिः ॥ ७३ ॥ ॥ इतिचक्रयोगः ॥ ४५ ॥
दाताधीरश्चारुशीलोदयालुःपृथ्वीपालप्राप्तसाम्यप्रकामम् ॥ योगेजातोयःसमुद्रेसधन्योधन्योवंशस्तेननूनंनरेण ॥ ७४ ॥ ॥ इतिसमुद्रयोगः ॥
॥ ४६ ॥ ॥ येयोगाःकथिताःपुराबहुतरास्तेषामभावेभवेद्दौलग्नैकगतिर्युगांद्रिग्रहगैःशूलस्त्रिगेहोपगैः ॥ केदारश्चचतुर्षुसर्वखचरैःपाशस्तुपंचस्थि
तैःषट्संस्थैकदामनिकाचसप्तगृहगैर्वीणोतिसंख्याइमे ॥ ७५ ॥ विद्यासदौदार्यसामर्थ्यहीनाःनानायासानित्यजातप्रयासाः ॥ एषांयोगःसंभवेद्गोल
नामानामासत्यप्रीतयोऽनीतयस्ते ॥ ७६ ॥ ॥ इतिगोलनामायोगः ॥ ४७ ॥ ॥ पाखण्डेनाखण्डितप्रीतिभाजोनिर्लज्जाःस्युर्धर्मकर्मप्रयुक्तः ॥
पुत्रैरर्थैःसर्वथातेवियुक्तायुक्तायुक्तज्ञानशून्यायुगाख्ये ॥ ७७ ॥ ॥ इतियुगयोगः ॥४८॥ ॥ युद्धेवादेतत्पराक्रूरचेष्टाःक्रूराःस्वांतेनिष्ठुरानिर्द्धनाश्च ॥
योगोयेषासूतिकालेहिशूलःशूलप्रायास्तेजनानांभवंति ॥ ७८ ॥ इतिशूलयोगः ॥ ४९ ॥ चापोपेताश्चार्यवंतोविनीताःकृशौत्सौक्याश्चोपका
रादराश्च ॥ योगेकेदारस्थानरास्तेनधीराचाराश्चापीरतेषांविशेषात् ॥ ७९ ॥ ॥ इतिकेदारयोगः ॥ ५० ॥ दीनाकारास्तत्पराश्चापकारेबंधेना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्त्ताभूरिजल्पाःसदंभाः ॥ नानानर्थापाशयोगप्रजाताजातारण्यप्रीतयःस्युर्मनुष्याः ॥ ८० ॥ ॥ इतिपाशयोगः ॥ ५१ ॥ ॥ जातानन्दोनन्द
नाब्धैःसुधीरोविद्वान्भूपःकोपसंजाततोषः ॥ चंचच्छीलौदार्यबुद्धिःप्रशस्तःशस्तःसूतौदामिनीयस्ययोगः ॥ ८१ ॥ ॥ इतिदामिनीयोगः ॥
॥ ५२ ॥ ॥ अर्थोपेतःशास्त्रपारंगताश्चसंगीतज्ञापोषकाःस्युर्बहूनाम् ॥ नानासौख्यैरन्वितास्तुप्रवीणावीणायोगेप्राणिनांजन्मयेषाम् ॥ ८२ ॥
॥ इतिवीणायोगः ॥५३॥ ॥ प्रोक्तैरेतैर्नामसौख्यैश्चयोगाःस्यात्सर्वेषांप्राणिनांजन्मकामम् ॥ तस्मादेतेत्यंतयंत्रादपूर्वाःपूर्वाचार्यैर्जातकेसंप्रदिष्टाः ॥
॥ ८३ ॥ उत्पातकेकृशतनुर्निशिवाथदृश्येदृश्येदिवासिरिगर्भयशोदकश्च ॥ एवंस्थिताःसमफलःपृथिवीपतित्वंजातोनयायकुरुतेपरिपूर्णमूर्तिः ॥ १ ॥
॥ इतिचन्द्रयोगः ॥ ५४ ॥ इतिश्रीजातकाभरणोक्तनाभसयोगाःप्रोक्ताः ॥ ५५ ॥ वामवामेग्रहाःसर्वेसूर्यादीनांमुनिस्तथा ॥ दारिद्रयोगंजानीया
न्नात्रकार्याविचारणा ॥ ८४ ॥ इतिदरिद्रयोगः ॥ ५६ ॥ ऋतुरेतश्चसंपर्काज्जायतेविषमागतिः ॥ करसंपुटमादायवंध्याभवनिश्चितम् ॥ ८५ ॥
॥ इतिकरसंपुटयोगः ॥ ५७ ॥ इतिश्रीपंचमहापुरुषादियोगान्मिलित्वाअष्टषष्टि ६८ योगाउक्ताःअग्रेअन्योपि ॥ मूलत्रिकोणस्वगृहोच्चसंस्थानभश्च
राःकेंद्रगतामिथःस्युः ॥ तेकारकाख्याःकथितामुनींद्रैर्विज्ञेयप्राज्ञांभुवनेविशेषाः ॥ ८६ ॥ प्रालेयरश्मिर्यदिमूर्तिवर्तीस्वमंदिरस्थोनिजतुंगजातः ॥
कुजार्कजार्कामरराज्यपूज्याःपरस्परंकारकसंज्ञिताश्च ॥ ८७ ॥ शुभग्रहेलग्नगतेंबरांतु १० । ४ स्थितोग्रहःकारकसंज्ञकःस्यात् ॥ तुंगात्रिकोणस्वगृहां
शयातास्तेपोहमानेतपनोविशेषात् ॥ ८८ ॥ नीचान्वयेयद्यपिजातजन्ममंत्रीभवेत्कारकखेचराढ्यैः ॥ राजान्वयेयस्ययदिप्रसूतिर्भूमीपतित्वंसक
थंनयाति ॥ ८९ ॥ वेशिस्थितोयस्यशुभोनवेगोलग्नंविलग्नंचलवेस्वकीये ॥ केंद्राणिसर्वाणिचसंग्रहाणितस्यालयेश्रीकुरुतेविलासम् ॥ ९० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केंद्रस्थितायुरुविलग्नकजन्मनाथामध्येचयस्यनितरांवितरंतिभाग्यम् ॥ शीर्षोदयोभ्युदयभेषुगताभवंयुरारं तमध्यमविरामफलप्रदास्ते ॥ ९१ ॥ ॥ इ
तिकारकयोगः ॥ ६९ ॥ ॥ संस्थाविलग्नेप्यथसप्तमेचपतङ्गसुख्यास्तुग्रहानितान्तम् ॥ वदन्तियोगंशकटाख्यसंज्ञंजातोनरःस्याच्छकटोपजिवी
॥ ९२ ॥ ॥ इतिशकटयोगः ॥ ७० ॥ ॥ युग्मेयुग्मेभवेत्रीणिह्येकैकञ्चत्रिषुस्थितम् ॥ नन्दायोगःसविज्ञेयश्चिरायुश्चसुखप्रदः ॥ ९३ ॥
इतिनन्दायोगः ॥ ७१ ॥ लग्नेचजीवोयुगगेभृगुश्चद्यूनेचसौम्योदशमेमहीजः ॥ केंद्रेत्वमीचारुफलप्रदाःस्युःसर्वार्थदाताइतिप्रसिद्धः ॥ ९४ ॥
इतिदातारयोगः ॥ ७२ ॥ घटेमेषेनरे ३ चापेतुलायांसिंहगेग्रहे ॥ राजहंसोभवेद्योगोराज्यास्पदसुखप्रदः ॥ ९५ ॥ इतिराजहंसयोगः ॥
॥ ७३ ॥ सिंहासनेचहंसेचदंडेयोगेमरुध्वजे ॥ चतुःसागरयोगेचचिह्निपुच्छोमहाफलम् ॥ ९६ ॥ तुलामकरमेषाद्यलग्नेबाह्यथवाक्वचित् ॥ सिं
हासनेचडमरौचिह्निपुच्छःसशस्यते ॥ ९७ ॥ मृगेकर्केचपुच्छःस्याद्राजहंसोसुखप्रदः ॥ कुंभेचमन्मथेचैवचिह्निपुच्छोभिधीयते ॥ ९८ ॥ मृ
गेकर्कध्वजेपुच्छाकन्यालौवृषभेझषः ॥ चिह्निपुच्छोभवेद्योगश्चतुःसागरगोचरे ॥ ९९ ॥ योगोदितफलंपुच्छःकरोतिद्विगुणंफलम् ॥ तेनयोगा
धियोगोयंलग्नेपिकस्यचिन्मते ॥ १०० ॥ घटशून्येनृपसचिवोगोमहिषीहयगजैर्युक्तः ॥ नीतिज्ञोबहुपुत्रोलग्नेपिचसम्मतंकेषु ॥ १०१ ॥
इतिचिह्निपुच्छयोगः ॥ ७४ ॥ चन्द्राष्टमेचक्रसंज्ञार्कार्किशुक्रागृहेविधौ ॥ केमद्रुमेचसंपूर्णेयोगोलालाटिकोमतः ॥ १०२ ॥ आजन्मतोभवतिकारग्र
हैःप्रसिद्धःशिल्पादिकर्मकुशलासुशलाकृतिश्च ॥ भूर्यात्मजोविलभतेविविधामलब्धींजन्मांतरेपिनजहातिललाटयोगे ॥ १०३ ॥ इतिललाटी
योगः ॥ ७५ ॥ राहुणासहितश्चंद्रःसपापोगुरुवीक्षितः ॥ महापातकयोगोयंयदिशुक्रसमोभवेत् ॥ १०४ ॥ इतिमहापातकयोगः ॥ ७६ ॥ भौमे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नदृश्यतेलग्नंलग्नंपश्यतिभास्करः ॥ गुरुशुक्रौनदृश्येतेबलीवर्देनहन्यते ॥ १०५ ॥ इतिबलीवर्दहंतायोगः ॥ ७७ ॥ आयस्थानगतेचन्द्रेचन्द्रस्थाने गतेरवौ ॥ हठेननागेविज्ञेयःपंचरात्रौविशेषतः ॥ १०६ ॥ इतिहठदन्तायोगः ॥ ७८ ॥ मदनयोर्यदायोगोलग्नेचराहुदर्शने ॥ वृक्षस्थंमरणंतस्य यदिशुक्रसमोभवेत् ॥ १०७ ॥ इतिवृक्षहन्तायोगः ॥ ७९ ॥ षष्ठस्थानगतेशुक्रेतनुस्थानगतेकुजे ॥ नासाच्छेदकरोयोगोवदामिमुनिरुत्तमः ॥ १०८ ॥ इतिनासाच्छेदयोगः ॥ ८० ॥ मन्देचदृश्यतेचन्द्रोलग्नेचरविभार्गवौ ॥ शुभग्रहानपश्यन्तिकर्णच्छेदोनसंशयः ॥ १०९ ॥ ॥ इ तिकर्णच्छेदयोगः ॥ ८१ ॥ ॥ कविनासहितोमंदोगुरुणासहितःकविः ॥ शुभग्रहानपश्यंतिपादखंजोभवेन्नरः ॥ ११० ॥ इतिपादखंजयोगः ॥ ८२ ॥ लग्नाच्चसप्तमस्थानेशन्यर्केराहुसंस्थिते ॥ सर्पेणपीडितस्योक्ताशय्यायांस्वपतोपिच ॥ १११ ॥ इतिसर्पहंतायोगः ॥ ८३ ॥ गुरुस्था नगतेसौम्येशनिस्थानेगतेकुजे ॥ पंचविंशतिवर्षेचवनेव्याघ्रेणहन्यते ॥ ११२ ॥ ॥ इतिव्याघ्रहंतायोगः ॥ ८४ ॥ शुक्रस्थानेगतेचंद्रेशुक्रस्थाने गतेशनौ ॥ अष्टविंशतिवर्षेचह्यसिघातेनमृत्युदः ॥ ११३ ॥ इतिअसिघातयोगः ॥ ८५ ॥ धर्मस्थानगतेभौमेशन्यर्कराहुसंयुते ॥ शुभग्रहानपश्यंति शरक्षेपेणेहन्यते ॥ ११४ ॥ ॥ इतिशरक्षेपहंतायोगः ॥ ८६ ॥ रविणासहितोभौमःशनिर्वाजीवसंस्तुतः ॥ अष्टाविंशतिवर्षेचब्रह्मघातिनसंशयः ॥ ॥११५ ॥ इतिब्रह्मघातीयोगः ॥ ८७ ॥ रविस्थानगतेचंद्रेगुरुस्थानसमायुतः ॥ सागरेचस्थितेलग्नेपंचापत्यविनाशकृत् ॥ ११६ ॥ इतिपंचापत्यविना शयोगः ॥ ८८ ॥ ॥ अथदोलायोगः ॥ ॥ मीनेमेषेचचापेचस्थितेस्थानत्रयेगृहे ॥ दोलासंज्ञकयोगःस्याद्राज्यदोऽयमुदाहृतः ॥ ११७ ॥ सन्मानदानगुणपात्रपरीक्षितोवाकलानिधिःकौशलगीतनृत्यः ॥ मंत्रीश्वरोदाससभाविवेकीकेन्द्रस्थितेपापविवर्जितेगुरौ ॥ ११८ ॥ इतिदोलायोगः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ८९ ॥ ॥ अथपदकविच्छेदयोगः ॥ ॥ लग्नस्थानगतेभौमःशन्यर्कराहुवीक्षितः ॥ योगःपदकविच्छेदोयदिशुक्रसमोभवेत् ॥ ११९ ॥
॥ इतिपदकविच्छेदयोगः ॥ ९० ॥ क्रेन्द्रस्थानगतेभौमैंसहिकेयेचसप्तगे ॥ तदानित्यंविजानीयादस्मान्मृत्युस्तदाभवेत् ॥ २० ॥ ॥ इतिइच्छतो
मृत्युयोगः ॥ ९१ ॥ लग्नात्सप्तमशीतांशुःपापाष्टशुभलग्नगः ॥ लग्नस्थितोयदाभानुःसमांतेम्रियतेशिशुः ॥ १२१ ॥ ॥ इतिमातृपितृहायोगः ॥
इतिचतुरशीतियोगाःशास्त्रान्तरादवलोक्यलिखिताः ॥ ॥ अथाग्रेराजयोगप्रकरणंलिख्यते ॥ ॥ लग्नंलग्नपतिर्बलान्वितवपुःकेन्द्रत्रिकोणेशिवे
पृच्छाजन्मविवाहयानतिलकेकुर्यान्नृपतिर्ध्रुवम् ॥ सच्छीलंविभवान्वितंगजरुजंमुक्तातपत्रान्वितंजातोनिम्नकुलेविभूतिपुरुषंशंसन्तिगर्गादयः ॥ १ ॥
एकःशुक्रोजननसमयेलाभसंस्थेचकेन्द्रेजातोवैजन्मराशौयदिसहजगतेप्राप्यतेवैत्रिकोणे ॥ विद्याविज्ञानयुक्तोभवतिनरपतिर्विश्वविख्यातकीर्तिर्दा
नीमानीचशूरोहयगुणसहितःसद्वैद्यैःसेव्यमानः ॥ २ ॥ दशमुखभुवननाथःकेन्द्रकोणेधनस्थेबलिपतिबलयानेप्रस्तासिंहासनेषु ॥ सभवतिनरनाथो
विश्वविख्यातकीर्तिर्मदगलितकपोलैसद्गजैःसेव्यमानः ॥ ३ ॥ एकोपिकेन्द्रभवननवपञ्चमेवाभास्वान्मयुखविमलीकृतादिग्विभागः ॥ निःशेषदो
षमपहृत्यशुभप्रसूतंदीर्घायुषंविगतरोगभयंकरोति ॥ ४ ॥ चन्द्रःपश्येद्यदादित्यंबुधःपश्येन्निशापतित् ॥ अस्मिन्योगेतुयोजातःसभवेद्वसुधाधिपः
॥ ५ ॥ यदिभवतिचकेन्द्रीयामिनीनाथएवप्रददतिप्रियभार्यापुत्रिणींवासुरूपात् ॥ धनकनकसमृद्धिंमाणिकंहीररत्नैरचयतिमृगयाभिश्चन्दनैश्चर्चि
ताङ्गम् ॥ ६ ॥ शुक्रोयस्यबुधोयस्ययस्यकेन्द्रेबृहस्पतिः ॥ दशमोंगारकोयस्यसजातःकुलदीपकः ॥ ७ ॥ हयरथनरनागैरत्नसम्यक्फलानांजलधि
तटनिवासीरत्नतुल्यंचधान्यम् ॥ बहुजनकिलइष्टासत्यवादीप्रसूतोभवतियदिचकेन्द्रीदैत्यकोणेबुधस्य ॥ ८ ॥ किंकुर्वंतिग्रहाःसर्वेयस्यकेन्द्रीबृह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्पतिः ॥ मत्तमातङ्गयूथानांभिनत्त्येकोपिकेसरी ॥ ९ ॥ एकएवसुरराजपुरोधाःकेन्द्रगोथनवपंचमगोवा ॥ लाभगोभवतियत्रविलग्नेतत्रशेष
खचरैरबलैःकिम् ॥ १० ॥ भवतिवदनमूर्तिर्वल्लभःकामिनीनासकलजनसमर्थोदीर्घजन्माविहाय ॥ ध्वजविषयगुणज्ञोद्रव्यमुख्यःप्रधानःसधनकनक
पूर्णोदैत्यपोयस्यकेन्द्रे ॥ ११ ॥ धनवान्प्राज्ञःशरोमंत्रीवादण्डनायकःपुरुषः ॥ दशमस्थेरवितनयेवृन्दपुरग्रामनेतावा ॥ १२ ॥ तुलाकोदण्ड
मीनस्थोलग्नस्थोपिशनैश्चरः ॥ करोतिभूपतेर्जन्मवंशेचनृपतिर्भवेत् ॥ १३ ॥ दिव्यस्त्रीवरकांचनांबरगतामाधारलक्ष्मीमयःशास्त्रंकौतुकगीतनृत्य
रसताव्यापारदीक्षागुरुः ॥ पुत्रभ्रातृजनान्वितःस्थिरमतिःकर्तातिप्रीत्यान्वितोजीवःकेन्द्रयदाभवेन्निजसुखीसत्कर्मकारीनरः ॥ १४ ॥ आकाशमन्दि
रगतस्तनुपःस्वगेहेकुर्यान्नृपंनृपतिचक्रवरैःसुसेव्यः ॥ सैन्यंप्रतापहतनाहतशत्रुपक्षंशक्रोयथासुरगणैश्चविराजमानः ॥ १५ ॥ उपचयगृहसंस्थो
३।६।१०।११ जन्मदोयस्यचंद्रःस्वगृहमथनवांशेकेंद्रजातश्चसौम्याः ॥ सकलबलवियुक्तश्चैवपापाभिधानंसभवतिनरनाथःशक्रतुल्योबलेन ॥
॥ १६ ॥ विद्याकलागुणविराजितकामधेनुर्भोगैःपरंयुवतिभिर्जितकामराजः ॥ देशाधिपत्यपुरपत्तनगजश्रियांतोमीनेसतोसकलमंडलदीप्तदीक्षैः ॥
॥ १७ ॥ कामेजकन्येरिपुरंध्रसंस्थेकेन्द्रत्रिकोणेव्ययगेचराहुः ॥ कामीचशूरोबलवान्सभोगीगजाश्वछत्रंबहुपुत्रताच ॥ १८ ॥ मृगपतिवृषकन्या
कर्कटस्थेचराहुर्भवतिविपुललक्ष्मीराजराज्याधिपोवा ॥ हयगजनरनौकामेदिनीपंडितश्चसभवतिकुलदीपोराहुतुङ्गोनराणाम् ॥ १९ ॥ केन्द्रत्रिको
णेबुधजीवशुक्रादृष्टानराणांयदिजन्मकाले ॥ धर्मार्थविद्यायशकीर्तिलाभःशान्तःसुशीलःसनराधिपःस्यात् ॥ २० ॥ भृगुसुतसुरपूज्यश्चंद्रमाकेन्द्रव
र्तीबहुसुखधनवृद्धिःकर्मसाध्यंनराणाम् ॥ रविसुतशशिपुत्रेभानुजीवेत्रिकोणेक्षितिसुतदशमेषुराजयोगावदंन्ति ॥ २१ ॥ केन्द्रत्रिकोणेषुभवंतिसौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्यादुश्चिक्यलाभारिगताश्चपापाः ॥ यस्यप्रयाणेप्यथजन्मकालेध्रुवंभवेत्तस्यमहीपतित्वम् ॥ २२ ॥ लाभेत्रिकोणेयदिशीतरश्मिःकरोत्यवश्यंक्षितिपा
लतुल्यम् ॥ कुलद्वयानन्दकरंनरेंद्रंज्योत्स्नाहिदीपस्तमनाशकारी ॥ २३ ॥ शत्रुस्थानेयदाजीवोलाभस्थानेशशीभवेत् ॥ गृहमध्येसजातश्चविख्यातः
कुलदीपकः ॥ २४ ॥ लग्नाधिपोवाजीवोवाशुक्रोवायत्रकेंद्रगः ॥ तस्यपुंसश्चदीर्घायुःसभवेद्राजवल्लभः ॥ २५ ॥ दशमेबुधसूर्यौचभौमराहूचषष्ठगौ ॥
राजयोगोऽत्रयोजातःसपुमान्नायकोभवेत ॥ २६ ॥ आदौजीवःशनिश्चांतेगृहमध्येनिरन्तरम् ॥ राजयोगंविजानीयात्कुटुंबबलमुत्तमम् ॥ २७ ॥
सहजस्थोयदाजीवोमृत्युःस्थानेयदासितः ॥ निरन्तरगृहंमध्येराजाभवतिनिश्चितम् ॥ २८ ॥ जीवोवृषेसुधारश्मिर्मिथुनेमकरेकुजः ॥ सिंहेभवति
सौरिश्चकन्यायांबुधभास्करौ ॥ २९ ॥ तुलायामसुराचार्योराजयोगोभवेदयम् ॥ अत्रयोगेसमुत्पन्नोमहाराजोभवेन्नरः ॥ ३० ॥ अष्टमेद्वादशेवर्षेय
दिजीवतिमानवः ॥ सार्वभौमस्तदाराजाजायतेविश्वपालकः ॥ ३१ ॥ एकोजीवोयदालग्नेसर्वेयोगास्तदाशुभाः ॥ दीर्घजीवोमहाप्राणोजातको
नायकोभवेत् ॥ ३२ ॥ धनेशुक्रोऽथभौमश्चमीनेजीवस्तुलाबुधः ॥ नीचस्थौशनिचंद्रौचराजयोगस्तदाध्रुवम् ॥ ३३ ॥ अस्मिन्योगेचयोजातः
सराजाधनवर्जितः ॥ दाताभोक्ताचविख्यातोमान्योमण्डलनायकः ॥ ३४ ॥ मीनेशुक्रोबुधश्चांतेधनेराहुस्तनौरविः ॥ सहजेचभवेद्भौमोराज
योगोऽभिधीयते ॥ ३५ ॥ सहजेचयदाजीवोलाभस्थानेचचंद्रमाः ॥ सराजागृहमध्यस्थोविख्यातःकुलदीपकः ॥ ३६ ॥ शुभग्रहाःशुभ
क्षेत्रेभवंतियदिकेंद्रगाः ॥ तदाशुभानिकर्माणिसकरोतिहिजातकः ॥ ३७ ॥ उच्चस्थानगताःसौम्याःकेंद्रस्थानेभवंतिचेत् ॥ ध्रुवंराज्यंभवे
त्तस्ययदिनीचसुतोभवेत ॥ ३८ ॥ स्वक्षेत्रस्थोयदाजीवोबुधःसौरिश्चचेद्भवेत ॥ तस्यजातस्यदीर्घायुःसंपत्तिश्चपदेपदे ॥ ३९ ॥ मीनेबृह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्पतिःशुक्रश्चन्द्रमाश्चयदाभवेत् ॥ तस्यजातस्यराज्यंस्यात्पत्नीचबहुपुत्रिणी ॥ ४० ॥ पञ्चमस्थोयदाजीवोदशमस्थश्चचन्द्रमाः ॥
सराजवान्महाबुद्धिस्तपस्वीचजितेंद्रियः ॥ ४१ ॥ सिंहेजीवतुलाकीटश्चापेषुमकरेपिच ॥ ग्रहायदातदाजातोदेशभोगीभवेन्नरः ॥ ४२ ॥ तुलाको
दण्डमीनस्थोलग्नसंस्थोपिचेच्छनिः ॥ करोतिभूपतेर्जन्ममहापुण्यानुभावतः ॥ ४३ ॥ विद्यास्थानेयदासौम्याःकर्कस्थानेचचन्द्रमाः ॥ धर्मस्थाने
यदासौम्याराजयोगस्तदाभवेत् ॥ ४४ ॥ मकरेचघटेमीनेवृषेमिथुनमेषयोः ॥ ग्रहास्तदाचविख्यातोराजाभवतिमानवः ॥ ४५ ॥ बुधभार्गवजीवा
र्कियुक्तोराहुश्चतुष्टये ॥ कुरुतेकमलारोग्यपुत्रमानादिकंफलम् ॥ ४६ ॥ चतुर्थभुवनेशुक्रोगुरुचंद्रधरासुताः ॥ रविसौरियुतास्संतिराजाभवतिनिश्चि
तम् ॥ ४७ ॥ अष्टमेचव्ययेक्रूरोमध्येचक्रूरसौम्यकौ ॥ राजयोगास्त्रयोजातामहाभूपोभविष्यति ॥ ४८ ॥ लग्नेसौरिस्तथाचंद्रस्त्रिकोणेजीवभास्करौ ॥
कर्मस्थानेभवेद्भौमोराजयोगोभिधीयते ॥ ४९ ॥ नवमेचयदासूर्यःस्वगृहस्थोभवेत्तदा ॥ तस्यजीवतिनोभ्रातायदिकोपिनृपैःसमः ॥ ५० ॥ द्वित्रि
तुर्येसितेषष्ठेकर्मण्यपियदाग्रहाः ॥ राजयोगंविजानीयाज्जातस्तुच्छकुलेपिचेत् ॥ ५१ ॥ लग्नेक्रूरेव्ययेसौम्योधनेक्रूरश्चजायते ॥ राजयोगत्रयंजातं
भूपतिर्भवतिस्फुटम् ॥ ५२ ॥ लग्नेक्रूरोव्ययेक्रूरोधनेसौम्योयदाभवेत् ॥ सप्तमेभवतिक्रूरःपरिवारक्षयंकरः ॥ ५३ ॥ धनेचंद्रश्चशुक्रश्चमेषेजीवोयदाभ
वेत् ॥ दशमेराहुशुक्रौचराजयोगोभिधीयते ॥ ५४ ॥ सिंहेजीवोथकन्यायांभार्गवोमिथुनेशनिः ॥ स्वक्षेत्रेहिबुकेभौमःसपुमान्नायकोभवेत् ॥ ५५ ॥
शनिचंद्रौचकन्यायांसिंहेजीवोघटेतमः ॥ मकरेचकुजस्तत्रजातःस्याद्विश्वपालकः ॥ ५६ ॥ शुक्रोजीवोरविर्भौमश्चापेमकरकुंभयोः ॥ मीनेचवत्स
रेत्रिंशेसमर्थःसर्वकर्मसु ॥ ५७ ॥ कर्मलग्नेजीवशुक्रौलाभेचंद्रजभार्गवौ ॥ मेषेभानुश्चजातोयोयोगेस्मिन्नृपतिर्भवेत ॥ ५८ ॥ कर्मस्थानेयदाजी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वोबुधःशुक्रस्थथाशशी ॥ सर्वकर्माणिसिद्ध्यंतिराजमान्योभवेन्नरः ॥ ५९ ॥ षष्ठेष्टमेपंचमेवानवमेद्वादशेतथा ॥ सौम्यक्रूरग्रहैर्योगेराजमान्योनसंशयः ॥ ६० ॥ पंचमेचपदाषष्ठेचाष्टमेनवमेक्रमात् ॥ भौमराहुसितार्काःस्युर्जातकःकुलपालकः ॥ ६१ ॥ लग्नेसौरिस्तथाचंद्रश्चाष्टमेभार्गवोयदा ॥ जायतेऽत्रनृपोयोगेमानीभूरिप्रियःसदा ॥ ६२ ॥ मिथुनस्थोयदाराहुःसिंहस्थोभूमिनंदनः ॥ अत्रयोगेनरोजातोनृपोश्वगजनायकः ॥ ६३ ॥ चापार्द्धेशशिनायुक्तोयदिसूर्यःप्रजायते ॥ लग्नेचसबलोमंदोमकरेचकुजोभवेत् ॥ ६४ ॥ अत्रयोगेसमुत्पन्नोमहाराजोभवेन्नरः ॥ दूरादेवनमंत्यस्य प्रतापैश्चरणौनृपाः ॥ ६५ ॥ उच्चाभिलाषकःसूर्यस्त्रिकोणस्थोयदाभवेत् ॥ अपिनीचकुलेजातोराजास्याद्धनपूरितः ॥ ६६ ॥ धनस्थानेयदाशुक्रो दशमेचबृहस्पतिः ॥ षष्ठेचसिंहिकापुत्रोराजाभवतिविक्रमे ॥ ६७ ॥ चतुर्ग्रहायदैकत्रयदिसौम्याभवंतिहि ॥ भ्रातृधीधर्मलग्नाद्यैराजयोगोभवेदयम् ॥ ६८ ॥ सर्वैर्ग्रहैर्यदाचंद्रोविनाहेलिंनिरीक्ष्यते ॥ षष्ठाष्टमेसंस्थितश्चसदीर्घायुर्नराधिपः ॥ ६९ ॥ नवमेपंचमेस्थानेचतुर्थेचयदाग्रहाः ॥ आदौजाता श्चनश्यन्तिपश्चाज्जातश्चजीवति ॥ ७० ॥ विवाहितायामन्यस्यामेकपुत्रोभवेत्तदा ॥ विख्यातोभुवनत्यागीसदीर्घायुर्महीपतिः ॥ ७१ ॥ कन्याया श्चयदाराहुःशुक्रोभौमःशनिस्तथा ॥ तत्रजातस्यजायेतकुबेरादधिकंधनम् ॥ ७२ ॥ लग्नेमीनोजीवशुक्रौमेषेर्कोमकरेकुजः ॥ दासवंशेपिजातोसौ राजाछत्रधरोभवेत् ॥ ७३ ॥ भ्रातृस्थानेयदाजीवोलाभस्थानेयदाशशी ॥ सलोकेगृहमध्यस्थोजायतेकुलदीपकः ॥ ७४ ॥ दशमस्थौबुधादित्यौ षष्ठेराहुधरासुतौ ॥ राजयोगास्त्रयोजाताःसपुमान्नायकोभवेत् ॥ ७५ ॥ चतुर्ग्रहैरेकगृहेचसंस्थैर्धीधर्मदुश्चिक्यतनुस्थितेर्वा ॥ पासश्चजातःक्षिति पालतुल्योभवेन्नरेंद्रोऽथसमुद्रपारगः ॥ ७६ ॥ सुरगुरुशशियुक्तेकर्कटेलग्नसंस्थेभृगुतनयबलिष्ठःकेंद्रजातोथशेषैः ॥ शिवसहजरिपुस्थैर्यस्यजन्मन्त्रि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योगेनियतामितियदायुश्चक्रवर्तीधनेशः ॥ ७७ ॥ तुलेमीनमेषवृषेदैत्यपुत्रोभवेद्राजमानीकलाकौतुकीच ॥ त्रयंपुत्रजातंचिरंजीवितंचभवेद्वत्सरेव
न्हियुग्मे २३ चभुंक्ते ॥ ७८ ॥ लग्नाधिपतिःकेन्द्रेबलपरिपूर्णःकरोतिपरमर्द्धिम् ॥ गोपालकुलेपिजातंकिंपुनरिहनृपतिसंभूतम् ॥ ७९ ॥ रविस्तृ
तीयेभृगुनन्दनःसुखेबुधद्वितीयेयदिपञ्चमेस्थितः ॥ ननीचराशौनचखांतवेश्मगौभवेन्नरेंद्रस्त्रिसमुद्रपालकः ॥ ८० ॥ यदिभवतिचकेंद्रेधर्मगेस्वोच्चसं
स्थेसुतभवनगतश्चेद्वाक्पतिर्जन्मकाले ॥ सभवतिनरनाथःसार्वभौमोजितारिःशशिबुधभृगुपुत्रैरन्वितोवीक्षितोवा ॥ ८१ ॥ विलग्ननाथःखलजाश्चसं
स्थाःसुहृद्गृहेमित्रदशापतिःस्थितः ॥ करोतिसर्वपृथिवीतलस्यदुर्वारवैरिघ्नमहोदयंशुभम् ॥ ८२ ॥ लग्नंविहायकेन्द्रेसकलकलापूरितोनिशानाथः ॥
विदधातिमहीपालंविक्रमबलवाहनोपेतम् ॥ ८३ ॥ स्वौच्चैःस्वकीयभुवनेक्षितिपालतुल्योलग्नेऽर्कजेभवतिदेशपुराधिनाथः ॥ दारिद्र्यदुःखपरपीडि
तएवलोकोशेषेषुसर्वजननिंद्यशरीरचेष्टः ॥ ८४ ॥ लग्नेउच्चपदोगतेदिनपतिश्चंन्द्रेधनस्थेभृगौदुश्चिक्येतमसंयुतेसुखगतेजीवेव्ययस्थेबुधे ॥ लाभे
सूर्यसुतेहिशत्रुभुवनेजातेकुलेभूपतेर्जातोऽयंमनुजःसदानृपगणेसम्राट्पदंगच्छति ॥ ८५ ॥ उच्चाभिलाषीसवितात्रिकोणेशशीतथाजन्मनियस्य
जन्तोः ॥ सस्यातिपृथ्वीबहुरक्तपूर्णाबृहस्पतिः कर्कटकेयदिस्यात् ॥ ८६ ॥ सर्वेप्याकाशवासास्फटिकविशलताकाशकार्पासभेशोलग्नंसंवीक्ष्य
माणोनरपतितिलकंतंसमुत्पादयंति ॥ नीयंतेस्यप्रशस्त्यैजलदनिभमथश्वेतमानंयशोभिर्विभ्राणंशेसुशंकांमधुमथनमतोभद्रमालार्पितश्रीः ॥ ८७ ॥
सर्वैर्गगनभ्रमणैर्दृष्टेलग्नेभवेन्महीपालः ॥ बलिभिःसौख्यार्थयुतोविगतभयोदीर्घजीवीच ॥ ८८ ॥ चतुर्थेभुवनेशुक्रोदशमेचधरासुतः ॥ रवि
सौरिर्भवेद्युक्तोराजाभवतिनिश्चितम् ॥ ८९ ॥ मिथुनेऽजेवृषेमीनेकुंभेचमकरेग्रहाः ॥ योयोगेऽस्मिन्नरोजातोजायतेगजमानवान् ॥ ९० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जीवनिशाकरसूर्याःपंचमनवमतृतीयगात् ॥ लग्नायदिभवतितदाराजाकुबेरतुल्योधनप्रसवैः ॥ ९१ ॥ सिंहेजीवस्तुलाकीटधनुर्मकरकेषुच ॥ ग्रहाश्चान्येयदाजातोदेशभोगीभवेन्नरः ॥ ९२ ॥ स्वगृहेचभवेत्सूर्यस्तुलायाञ्चभवेत्सितः ॥ मिथुनेतिष्ठतिसौरीराजयोगःप्रजायते ॥ ९३ ॥ षष्ठेचपञ्चमेचैवनवमेद्वादशेतथा ॥ सौम्याक्रूरग्रहायोगाराजमान्यःसकण्टकः ॥ ९४ ॥ त्रिकोणकोणेबुधजीवशुक्रास्त्रिषट्दशेसोमसुतेर्कपुत्रे ॥ जायास्थितेचेत्परिपूर्णचन्द्रेनूनंसजातोनृपतेःसमानः ॥ ९५ ॥ लग्नेसौरिस्तथाचंद्रश्चाष्टमेभुवनेसितः ॥ राजमान्योमहाकामीभोगपत्नीजनस्तथा ॥ ९६ ॥ धनेशुक्रश्चभौमश्चमीनेजीवोघटेबुधः ॥ नीचचन्द्रोसूर्ययुक्तोराजयोगोऽभिधीयते ॥ ९७ ॥ अस्मिन्योगेनरोजातोराजाविभववर्जितः ॥ दानभोगादिविख्यातःसामान्यःसभवेन्नरः ॥ ९८ ॥ मीनशुक्रेबुधश्चान्ते १२ लग्नेसूर्यःशशीधने ॥ सहजेचभवेद्राहूराजयोगः प्रचक्षते ॥ ९९ ॥ मीनेजीवस्तथाशुक्रश्चंद्रमाश्चयदाभवेत् ॥ तस्यजातस्यराज्यंस्यात्पत्नीचबहुपुत्रिका ॥ १०० ॥ आयस्थानेयदासौम्यःक्रूरस्थानीयचंद्रमाः ॥ कर्मस्थानेपुनःसौम्यस्तदाराज्यंविधीयते ॥ १ ॥ आदौजीवःपंचमेचदशमेचंद्रमाभवेत् ॥ राजमान्यामहाबुद्धिस्तेजस्वीचातितेजसः ॥ २ ॥ ॥ इतिचतुरशीतिराजयोगप्रकरणम् ॥ ॥ अथारिष्टयोगाः ॥ ॥ सूर्याच्चनवमेतातश्चन्द्रेमाताचतुर्थगः ॥ भौमस्यतृतीयेभ्राताबुधेचतुर्थमातुलः ॥ ३ ॥ गुरोःपञ्चमतःपुत्रोभृगुःसप्तमतोस्त्रियः ॥ शनेरष्टमतोमृत्युर्यदाक्रूरो भवेन्नरः ॥ ४ ॥ ॥ अथ द्वादशभवनविचारः ॥ ॥ सूर्योभौमस्तथाराहुःशनिर्मूर्तौयदान्वितः ॥ संतापोरक्तपीडाचसौम्यैःसर्वनिरोगतः ॥ ५ ॥ भौमक्षेत्रेयदाजीवोजीवक्षेत्रेचभूसुतः ॥ द्वादशेवत्सरेमृत्युर्बालकस्यनसंशयः ॥ ६ ॥ धनस्थानेयदाभौमःशनैश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रसमन्वितः ॥ सहजेचभवेद्राहुर्वर्षमेकंसजीवति ॥ ७ ॥ चतुर्थेचयदाराहुःषष्ठेचंद्रोष्टमेपिवा ॥ सद्यश्चैवभवेन्मृत्युःशंकरोयदिरक्षति ॥ ८ ॥
अष्टमस्थोनिशानाथःकेंद्रेपापेनसंयुतः ॥ चतुर्थेचयदाराहुर्वर्षमेकंसजीवति ॥ ९ ॥ लग्नेव्ययेधनेक्रूरोयदामृत्यौचजायते ॥ विष्टयामार्गबंधः
स्याद्द्वादशाष्टमवत्सरे ॥ १० ॥ सप्तमेभवनेभौमोअष्टमेभार्गवोयदा ॥ नवमेभवनेसूर्यअल्पायुस्तस्यकथ्यते ॥ ११ ॥ ॥ धनेक्रूरःस्वभव
नेक्रूरःपातालगौयदा ॥ दशमेभुवनेक्रूरःकष्टंजीवतिजातकः ॥ १२ ॥ स्मरेव्ययेचसहजेमध्येक्रूरेयदाग्रहाः ॥ तदाजातस्यबालस्यशरीरेकष्ट
मादिशेत् ॥ १३ ॥ लग्नस्थानेयदाभौमोद्वादशेचयदागुरुः ॥ शुक्रःशत्रुगृहेयस्यमासमेकंसजीवति ॥ १४ ॥ क्षीणचंद्रेगतेलग्नेक्रूरग्रहनिरी
क्षिते ॥ द्वितीयेद्वादशेभौमेमासमेकंसजीवति ॥ १५ ॥ मूर्तिसप्तमयोःक्रूराःपापव्ययाद्वितीयगाः ॥ चतुर्थेचयदाराहुःसप्ताहान्म्रियतेतदा ॥
॥ १६ ॥ षष्ठाष्टमेपिचंद्रःसद्योमरणायपापसंदृष्टः ॥ अष्टाभिःशुभदृष्टोवर्षैर्मिश्रैस्तदर्द्धेन ॥ १७ ॥ द्वादशस्थोयदासौरिर्लग्नसंस्थश्चभूसुतः ॥
चतुर्थःपौरिकेयश्चह्यष्टमासान्सजीवति ॥ १८ ॥ शुभलग्नेयदाजीवोह्यष्टमेचशनैश्चरः ॥ रंध्रसंस्थेचपापेचसद्योमृत्युप्रदोभवेत् ॥ १९ ॥
चतुर्थेनवमेसूर्येअष्टमेचबृहस्पतौ ॥ द्वादशेचशशाङ्केचसद्योमृत्युकरोभवेत् ॥ २० ॥ शशिसूर्यसितेकेंद्रेसंयुक्तश्चंद्रमार्किणा ॥ हन्तिवर्षद्व
येनैवजातकंशिष्टभावितः ॥ २१ ॥ गुरुर्मंदग्रहेवक्रीमंदगेबुधभास्करे ॥ ईप्सितङ्कुरुतेमृत्युंमन्देचैकादशेध्रुवम् ॥ २२ ॥ सूर्यमन्दगृहेशुक्रोयु
रुणाचविलोकितः ॥ नवभिर्मारयत्येनंवर्षैर्जातंनसंशयः ॥ २३ ॥ सूर्येणसहितश्चंद्रोबुधगृहगतःसदा ॥ नवीक्षितश्चसौम्येननववर्षेणमृत्युदः ॥
॥ २४ ॥ बुधःसूर्येदुसंयुक्तोवीक्षितोपिशुभैर्ग्रहैः ॥ वर्षैरेकादशैस्तेनमारयत्येवनिश्चितम् ॥ २५ ॥ लग्नादष्टमगोराहुःशनिःसूर्यावलोकितः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निरीक्षितःशुभैःकुर्यादष्टद्वादशभिःक्षयम् ॥ २६ ॥ धनेराहुर्बुधःशुक्रःसौरिःसूर्योयदास्थितः ॥ तत्रजातोभवेन्मृत्युर्मृतेपितरिजायते ॥ २७ ॥ व्ययेराहुःसौरिसौम्योजीवोलग्नेचपञ्चमे ॥ अत्रयोगेचयोजातोजातमात्रःसनश्यति ॥ २८ ॥ जीवार्कराहुभौमाःस्युश्चत्वारःक्रूरवेश्मगाः ॥ सप्तमे चग्रहेशुक्रोदेहकष्टकराःसदा ॥ २९ ॥ गुह्यस्थानेयदाभौमोराहुःसौरिसमन्वितः ॥ नृपपीडाभवेत्तस्यस्वासनेनैवतिष्ठति ॥ ३० ॥ चतुर्थेराहु सौरार्काःषष्ठेचंद्रोबुधःकुजः ॥ भार्गवश्चात्रयोजातःसगृहस्यक्षयङ्करः ॥ ३१ ॥ एकपापोष्टमस्थोपिशत्रुक्षेत्रेयदाभवेत् ॥ पापेनवीक्षितोवर्षा न्मारयत्येवबालकम् ॥ ३२ ॥ भौमभास्करमन्दाश्चशत्रुक्षेत्रेऽष्टमेयदा ॥ यमेनरक्षितोप्येषवर्षमात्रंसजीवति ॥ ३३ ॥ वक्रीशनिर्भौमगेहेकेंद्रे षष्ठेऽष्टमेपिवा ॥ कुजेनबलिनादृष्टोहन्तिवर्षद्वयेशिशुः ॥ ३४ ॥ शनिराहुकुजैर्युक्तःसप्तमेनवमेशशि ॥ सप्तमेदिवसेहन्तिमासेवासप्तमेशि शुः ॥ ३५ ॥ लग्नस्थश्चयदाभानुःपंचमस्थोनिशाकरः ॥ अष्टमस्थायदापापास्तदाजातोनजीवति ॥ ३६ ॥ लग्नपःपापसंयुक्तोलग्ने वापापमध्यगे ॥ लग्नात्सप्तमगःपापस्तदाचात्मवधोभवेत ॥ ३७ ॥ क्रूरक्षेत्रेयदाजीवोलग्नेशोस्तंगतोभवेत् ॥ अकर्माचतदाजातःसप्त वर्षाणिजीवति ॥ ३८ ॥ अष्टमेचयदासौरिर्जन्मस्थानेचचन्द्रमाः ॥ मन्दश्चोदररोगीचगात्रहीनश्चजायते ॥ ३९ ॥ शनिक्षेत्रेय दाभानुर्भानुक्षेत्रेयदाशनिः ॥ द्वादशेवत्सरेमृत्युस्तस्यजातस्यजायते ॥ ४० ॥ बुधभौमौयदालग्नेषष्ठस्थानेथवास्थितौ ॥ तस्कर श्चौरकर्मास्याद्धस्तपादौचनश्यतः ॥ ४१ ॥ षष्ठेष्टमेवामूर्तौचशत्रूक्षेत्रेयदाबुधः ॥ चतुर्वर्षेभवेन्मृत्युर्बालकस्यनसंशयः ॥ ४२ ॥ अष्टमस्थोयदाराहुःकेंद्रस्थानेचचंद्रमाः ॥ सद्यएवभवेन्मृत्युर्बालकस्यनसंशयः ॥ ४३ ॥ चतुर्थस्थोयदाराहुःषष्ठाष्टमगृहेशशिः ॥ विंशत्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिवसैर्मृत्युर्बालकस्यनसंशयः ॥ ४४ ॥ सप्तमेनवमेराहुःशत्रुक्षेत्रेयदाभवेत ॥ षोडशेवत्सरेमृत्युर्बालकस्यनसंशयः ॥ ४५ ॥ द्वादशस्थोय
दाचंद्रःपापःस्यादष्टमेगृहे ॥ एकमासेभवेन्मृत्युस्तस्यबालस्यनिश्चितम् ॥ ४६ ॥ जन्मस्थानेयदाराहुःषष्ठस्थानेचचंद्रमाः ॥ अपस्मारस्तदारो
गोबालकस्याहिजायते ॥ ४७ ॥ भार्गवेणयुतश्चंद्रःषष्ठाष्टमगतोभवेत ॥ मंदाग्न्युदररोगीचहीनांगोपिचबालकः ॥ ४८ ॥ षष्ठाष्टमेयदाचंद्रोबु
धयुक्तश्चतिष्ठति ॥ विषदोषेणबालस्यतदामरणमुच्यते ॥ ४९ ॥ भानुनासंयुतश्चंद्रःषष्ठाष्टमयुतोभवेत ॥ गजदोषेणमृत्युर्वासिंहदोषेणवाभवेत्
॥ ५० ॥ एकोपियदिमूर्तौस्याज्जन्मकालेयदाभवेत ॥ स्थानहीनोभवेद्बालोवृत्तिर्दुष्टासदापुनः ॥ ५१ ॥ लग्नेष्टमेयदाराहुश्चंद्रोवायदिदृश्यते ॥
दशाहैर्जायतेतस्यबालस्यमरणंध्रुवम् ॥ ५२ ॥ लग्नाच्चनवमेसूर्यःसूर्यपुत्रेतथाऽष्टमे ॥ एकादशेभार्गवेचमासमेकंनजीवति ॥ ५३ ॥ नव
मेदशमेचन्द्रःसप्तमेचयदासितः ॥ पापेपातालसंस्थेचवंशच्छेदकरोनरः ॥ ५४ ॥ शत्रुक्षेत्रेऽष्टमेषष्ठेद्वितीयेद्वादशेरविः ॥ सजीवतिषट्वर्षाणिबा
लकोनात्रसंशयः ॥ ५५ ॥ शत्रुक्षेत्रेऽष्टमेमूर्तौबुधःषष्ठेप्रजायते ॥ बालोजीवतिवर्षाणिचत्वारिनात्रसंशयः ॥ ५६ ॥ एकादशेतृतीयेचनवमेपंचमे
गुरौ ॥ शत्रुक्षेत्रेवृद्धस्थानेभवेत्पंचाशदष्टायुः ॥ ५७ ॥ नवमेपंचमेवापिरिपुक्षेत्रेबृहस्पतिः ॥ तदाषट्त्रिंशद्वर्षाणिजीवतेनात्रसंशयः ॥ ५८ ॥ मित्र
क्षेत्रैकादशमेदशमेवायदागुरुः ॥ शत्रुक्षेत्रेयदाशुक्रोद्वितीयेद्वादशेभवेत् ॥ एकविंशतिवर्षायुर्जायतेबालकोध्रुवम् ॥ ५९ ॥ शत्रुक्षेत्रेष्टमेषष्ठेद्वितीयेद्वा
दशेशनिः ॥ अष्टदिनान्यष्टमासाअष्टवर्षाणिजीवति ॥ ६० ॥ चंद्रक्षेत्रेयदाभौमेजायतेमनुजःसदा ॥ रक्तपित्तेनहीनाङ्गोनानाव्याधिसमन्वितः ॥
॥ ६१ ॥ चन्द्रक्षेत्रेयदाचांद्रिर्जायतेयस्यजन्मनि ॥ सजातःक्षयरोगीस्यात्कुष्ठादिभिरुपद्रुतः ॥ ६२ ॥ राहौचकेंद्रगेमृत्युःपापानांदृष्टिसंयुते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संवत्सरेतुदशमेषोडशेतुविशेषतः ॥ ६३ ॥ चंद्रःसप्तमभुवनेशनिभौमराहुसंयुतोभवति ॥ यदासप्तमदिवसेमृत्युःसप्तममासेनसन्देहः ॥ ६४ ॥
भौमक्षेत्रेयदाजीवोषष्ठेष्टमेचचन्द्रमाः ॥ षष्ठेष्टमेभवेन्मृत्युरक्षकोयदिशङ्करः ॥ ६५ ॥ जन्मसप्तमभेसौरिरष्टमेयदिचंद्रमाः ॥ ब्रह्मपुत्रोयदाजातः
सोपिपुत्रोनजीवति ॥ ६६ ॥ षष्ठाष्टमेयदाचंद्रोरविर्भवतिसप्तमः ॥ पितृमातृधनंहंतिमासमेकंनजीवति ॥ ६७ ॥ द्वादशेजीवशुक्रौच
जन्मतोराहुरेवच ॥ सप्तमेचयदासौरिर्वर्षमेकंनजीवति ॥ ६८ ॥ भौमेदिवाकरेछिद्रेजातःशत्रुगृहेयदि ॥ सनरोम्रियतेवश्यंयमोमासेनरक्षकः
॥ ६९ ॥ यदालग्नेग्रहःक्रूरोषष्ठाष्टमेपिचंद्रमाः ॥ तदासद्योभवेन्मृत्युर्जातकस्यनसंशयः ॥ ७० ॥ चतुर्थेपियदाराहुःकेंद्रेभवतिचंद्रमाः ॥ विं
शद्वर्षेभवेन्मृत्युर्जातकस्यनसंशयः ॥ ७१ ॥ सप्तमस्थोयदाराहुर्जन्मकालेयदातदा ॥ दशवर्षैर्भवेन्मृत्युरमृतंयदिपीयते ॥ ७२ ॥ लग्नेष्टमेयदारा
हुश्चंद्रोवायदिपश्यति ॥ जातकस्यतदामृत्युर्यदिशक्रेणरक्षितः ॥ ७३ ॥ दशमेपियदाभौमउच्चशत्रुगृहेस्थितः ॥ जातकस्यभवेन्मृत्युर्मातुश्चैवनसं
शयः ॥७४॥ लग्नस्थितोयदाभानुःपंचमस्थोनिशापतिः ॥ लग्नेष्टमेस्थिताःपापास्तदाजातोनजीवति ॥७५॥ लग्नात्सप्तमशीतांशुःपापाष्टमेषुलग्नगः ॥
लग्नस्थितोयदाभानुर्मासेनम्रियतेशिशुः ॥ ७६ ॥ धनेगुरुःसैंहिकेयोभौमःशुक्रश्चसप्तमे ॥ अष्टमेरविचन्द्रौचम्लेच्छःस्याद्यवनेस्थितः ॥ ७७ ॥ लग्न
स्थानेयदाभौमअष्टमेचदिवाकरः ॥ सौरिश्चतुर्थभुवनेतदाकुष्टीभवेन्नरः ॥ ७८ ॥ धर्मस्थानेयदापापालग्नात्पापश्चतुर्थगः ॥ कर्मस्थानगतोराहु
स्तदाम्लेच्छोभवेद्ध्रुवम् ॥ ७९ ॥ व्ययेभवनगेचंद्रेवामचक्षुर्विनश्यति ॥ यदासूर्योद्वितीयस्थस्तदाह्यंधंसमादिशेत् ॥ ८० ॥ सिंहलग्ने
यदाजन्मशनिर्मूर्तौयदाभवेत् ॥ चक्षुर्हीनोभवेद्बालःशुक्रेजन्माधकोभवेत् ॥ ८१ ॥ होरायाद्वादशेराशौस्थितोयदिदिवाकरः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करोतिदक्षिणेकाणंवामनेत्रेचचंद्रमाः ॥ ८२ ॥ स्वस्थानेलग्नतःक्रूरःक्रूरःपातालगःपुनः ॥ दशमेभुवनेक्रूरोकष्टंजीवतिजातकः ॥ ८३ ॥ अस्मि
न्योगेनयोजातोमातुर्दुःखकरोभवेत् ॥ यदिजीवेदसौजातोमातृपक्षक्षयंकरः ॥ ८४ ॥ क्रूरक्षेत्रेभवेत्सूर्यःकन्यायांक्रूरसंस्थितः ॥ क्रूरक्षेत्रेभवेद्राहुः
कष्टंजीवतिजातकः ॥ ८५ ॥ शुक्रेचवाक्पतौबुद्धेनीचेराहुसमन्विते ॥ चंद्रमाश्चनपश्येतसोपिबालोनजीवति ॥ ८६ ॥ षष्ठाष्टमेयदाचंद्रे
द्वादशेरविमङ्गलौ ॥ सोपिजातोनजीवेतरक्षतेयदिशंकरः ॥ ८७ ॥ षष्ठाष्टमेयदाकेतुःकेंन्दीभवतिचंद्रमाः ॥ सद्योबालकमृत्युःस्याद्रक्षितायदिशं
करः ॥ ८८ ॥ चंद्रोबुधस्तथासूर्यःशनिश्चान्तेयदाभवेत् ॥ मध्यस्थानेयदाभौमोहीनदृष्टिस्तदाभवेत् ॥ ८९ ॥ अर्कःसौरिस्तथाभौमःस्वर्भानुः
केतुसंयुतः ॥ नीचसंयुक्तदृष्टिःस्यात्सजातोमातृघातकः ॥ ९० ॥ रविराहूसौरिभौमौजीवोलग्नेचपंचमे ॥ योगेस्मिंस्त्वपियोजातोजातमात्रोवि
नश्यति ॥ ९१ ॥ क्रूरक्षेत्रेगतोजीवोरविराहुर्धरासुतः ॥ सप्तमेभुवनेशुक्रोदेहीकष्टंप्रयातिच ॥ ९२ ॥ क्रूरेलग्नेभवेज्जातस्तत्स्वामीक्रूरचेतसः ॥
आत्मघातोभवेत्तस्यशरीरेकष्टमादिशेत् ॥ ९३ ॥ सप्तमेभवनेभौमःपंचमेचदिवाकरः ॥ अरण्येचभवेज्जन्मवृक्षालयेनसंशयः ॥ ९४ ॥ एकःपा
पोयदालग्नेलग्नेशोवानपश्यति ॥ सूर्यःपश्यतिनोलग्नमन्यजातस्तदाभवेत् ॥ ९५ ॥ तिथिप्रांतेदिनांतेचलग्नस्यांतेतथैवच ॥ चरांशेपिचयोजात
अन्यजातःशिशुर्भवेत ॥ ९६ ॥ नपश्यतिशशीलग्नंमध्यस्थःसौम्यशुक्रयोः ॥ ततोपरोक्षेजन्मस्याद्भौमेस्तेवातनौयमे ॥ ९७ ॥ जीवक्षेत्रगते
चंद्रेशुक्रेवेतरराशिगे ॥ द्रेष्काणेचतदंशेवापरैर्जातःसइष्यते ॥ ९८ ॥ नलग्नमिंदुर्नगुरुर्निरीक्षितेनवाशशांकोरविणासमागतम् ॥ सौरेणवा
र्केणयुतश्चवाशशीपरेणजातःप्रवदन्तिसूरयः ॥ ९९ ॥ लग्नंपश्यतिनोङ्गिरानचभृगुर्जारेणजातःशिशुःक्षोण्यर्कःसमवेक्षतेशशधरोयोगेशिवावन्यजे ॥

Nepal Sanskrit University, Baireeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चंद्रःपापयुतोदिनेशसहितःस्यादेवमप्यन्यजःप्रोक्तंप्राङ्मुनिपुङ्गवैस्फुटमिदंयोगत्रयंजायते ॥ १ ॥ यदिवापिभवेच्चन्द्रोजन्माष्टमाद्द्वितीयगः ॥ द्वादशैकादशस्थोवापश्चाज्जातस्तदाशिशुः ॥ २ ॥ क्षपाकरःपश्यतिनैवलग्नंविदेशसंस्थेजनकेप्रसूतः ॥ कुजार्किसंसर्गगतेविलग्नेकवीज्यकें द्रांशविहीनकेवा ॥ ३ ॥ रविशशियुतोसिंहलग्नेकुजार्कीनिरीक्षितेनयनरहितःसौम्येःसद्बुदलोचनः ॥ व्ययगृहगतश्चंद्रोवामहीनस्त्यपरं विर्नशुभागदितायोगाभवंतिशुभेक्षिताः ॥ ४ ॥ ॥ इत्यरिष्टयोगप्रकरणम् ॥ ॥ अथधनभावः ॥ ॥ पापाःसर्वेधनस्थानेधनहानिक रामताः ॥ अन्यैःसौम्यैःशुभंसर्वमृद्धिवृद्धिधनादिकम् ॥ १ ॥ क्रूराश्चतुर्थकेंद्रेषुतथाक्रूरोधनेपिच ॥ दरिद्रियोगंजानीयात्स्वपक्षस्यभयङ्करः ॥ २ ॥ अष्टमस्थोयदाभौमस्त्रिकोणेनीचगोरविः ॥ सशीघ्रमेवजातःस्याद्भिक्षाजीवीचदुःखितः ॥ ३ ॥ कन्यायांचयदाराहुःशुक्रोभौमःशनिस्तथा ॥ तत्रजातस्यजायेतकुबेरादधिकंधनम् ॥ ४ ॥ अर्ककेंद्रेयदाचन्द्रोमित्रांशेगुरुणेक्षितः ॥ वित्तवाञ्ज्ञानसंपन्नोजायतेचतदानरः ॥ ५ ॥ स्व क्षेत्रस्थोयदाजीवोबुधःसौरिस्तथैवच ॥ तदाजातःसदीर्घायुःसंपत्तिश्चपदेपदे ॥ ६ ॥ लग्नंलग्नेशसंयुक्तंयस्यजन्मनिजायते ॥ नमुंचतिगृ हंतस्यकुलस्त्रियइवश्रियः ॥ ७ ॥ चन्द्रेणमंगलोयुक्तोजन्मकालेयदाभवेत् ॥ तस्यजातस्यगेहंतुलक्ष्मीर्नैवविमुंचति ॥ ८ ॥ मासमध्येतुयत्सं ख्यदिवसैर्जायतेपुमान् ॥ तत्संख्यवर्षभुक्तौतुलक्ष्मीर्भवतिनिश्चितम् ॥ ॥ इतिधनभावविचारः ॥ ॥ अथसहजभावः ॥ ॥ पापैस्तृतीयगैः सर्वैर्बाधवैःसहितोभवेत् ॥ सौम्यैश्चभ्रातृसंयुक्तःकीर्तियुक्तोधनप्रियः ॥ १ ॥ लग्नात्तृतीयभुवनेशिखिनासहचंद्रमाः ॥ लक्ष्मीवाञ्जायतेबा लोभातृहीनोनसंशयः ॥ २ ॥ आदौजातात्रविर्हंतिपश्चाद्भौमशनैश्चरौ ॥ राहुणाचद्युभौहंतिकेतुःसर्वनिवारकः ॥ ३ ॥ स्वक्षेत्रस्थोयदाराहु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्धनस्थानेबृहस्पतिः ॥ बुधेनचसमायुक्तस्तस्यबंधुत्रयंभवेत् ॥ ४ ॥ लग्नेचंद्रेधनेशुक्रोव्ययेचबुधभास्करौ ॥ राहुश्चेत्पंचमेबालःसभवेद्बंधुबंधकृत् ॥
॥ ५ ॥ धनस्थानेयदाक्रूरोभौमःसौरिसमन्वितः ॥ सहजेचभवेद्राहुर्भ्रातातस्यनजीवति ॥ ६ ॥ षष्ठेचभुवनेभौमः सप्तमेराहुसंभवाः ॥ अष्टमे
चयदासौरिर्भ्रातातस्यनजीवति ॥ ७ ॥ विलग्नस्थोयदाजीवोधनेसौरिर्यदाभवेत् ॥ राहुश्चसहजेस्थानेभ्रातातस्यनजीवति ॥ ८ ॥ सप्तमेभुवने
भौमश्चाष्टमेपिसितोयदि ॥ नवमेचभवेत्सूर्यःस्वल्पायुश्चसमूर्जितः ॥ ९ ॥ तस्यभ्राताभवेदन्यःपिताचायंसमुद्धरेत् ॥ तस्यचैकोभवेत्पुत्रः
सोपिविघ्नंविनश्यति ॥ १० ॥ उदयतिमृदुभांशौसप्तमस्थोपिमंदेयदिभवतिनिषेकःसूतिरब्दत्रयेण ॥ शशिनितुविधिरेषाद्वादशाब्देप्रकुर्यान्निगादि
तमतिचिंत्यंसूतिकालेपियुक्त्या ॥ ११ ॥ पुंग्रहोचास्थितोयस्यपात्रिकायांनरस्यच ॥ तस्यषष्ठोभवेद्भ्राताचान्यथाभगिनीभवेत् ॥ १२ ॥ इतिस
हजभावः ॥ ॥ अथसुखभावफलम् ॥ ॥ तुर्यस्थानेस्थिताःपापाबालत्वेमातृकष्टदाः ॥ सौख्यंसौम्याःप्रकुर्वंतिराजसन्मानदायकाः ॥
॥ १ ॥ लग्नाच्चतुर्थगःपापोयदिस्याद्बलवत्तरः ॥ तदामातृवधंकुर्यात्केंद्रेवानपरोयदि ॥ २ ॥ द्वितीयेद्वादशेस्थानेयदापापोव्यपोहति ॥ त
दामातुर्भयंविंद्याच्चतुर्थेदशमेपितुः ॥ ३ ॥ पापमध्यगतेलग्नेचन्द्रेवापापसंयुते ॥ सोमोनधनगेपापेमातृहासप्तवासरे ॥ ४ ॥ चतुर्थेहन्यते
मातादशमेचतथापिता ॥ सप्तमेभुवनेक्रूरास्तस्यभार्याविपद्यते ॥ ५ ॥ शन्यंगारकमध्यस्थोसूर्यःकुर्यात्पितुर्वधम् ॥ मध्येवारजनीनाथोमा
तामरणंनसंशयः ॥ ६ ॥ चंद्रादष्टमगेपापेचन्द्रेपापसमन्विते ॥ पापैर्बलिष्ठैःसंदृष्टःसद्योभवतिमातृहा ॥ ७ ॥ लग्नस्थानेयदाजीवोधनस्थाने
शनैश्चरः ॥ राहुश्चसहजेस्थानेमातातस्यनजीवति ॥ ८ ॥ सिंहेभौमस्तुलांसौरिःकन्यायांवासितोभवेत् ॥ मिथुनेचयदाराहुर्जननीतस्यन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्याति ॥ ९ ॥ चंद्रःपापग्रहैर्युक्तश्चंद्रोवापापमध्यगः ॥ चंद्रात्सप्तमगःपापस्तदामातृवधोभवेत् ॥ १० ॥ एकादशेयदाक्रूरःपंचमेशुक्रशीतलौ ॥
प्रथमंकन्यकाजातामातातस्यास्तुकष्टगा ॥ ११ ॥ धनेराहुर्बुधःशुक्रःसौरिःसूर्योयदाग्रहाः ॥ तदामातुर्भवेन्मृत्युर्मृतोयंपरिजायते ॥ १२ ॥
नीचस्थानगतेचन्द्रेतिष्ठेद्वैभार्गवात्मजः ॥ पापासक्तोमहाक्रोधीमातातस्यनजीवति ॥ १३ ॥ द्वादशेरिपुभावेचयदापापग्रहोभवेत् ॥ तदामातु
र्भयंविंद्याच्चतुर्थेदशमेपितुः ॥ १४ ॥ त्रिःसप्तमोदिवानाथोजन्मस्थश्चमहीसुतः ॥ तस्यमातानजीवेतवर्षमेकंपलद्वयम् ॥ १५ ॥ लग्नेच
द्वादशेस्थानेयदिपापग्रहोभवेत् ॥ तस्यमाताभवेद्वंध्यापितातस्यनजीवति ॥ १६ ॥ द्युनाष्टमगतेपापेक्रूरग्रहनिरीक्षिते ॥ जनन्यासहमृत्युः
स्याद्बालकस्यनसंशयः ॥ १७ ॥ ॥ इतिसुखभावफलम् ॥ ॥ अथसुतभावः ॥ ॥ पंचमस्थाःशुभाःसर्वेपुत्रसन्तानकारकाः ॥ क्रूराः
संततिमृत्यूचकुपुत्रंचधरासुतः ॥ १ ॥ बालस्यजन्मकालेतुपंचमोधरणीसुताः ॥ अपुत्रश्चभवेद्बालोनारीचैवविशेषतः ॥ २ ॥ अपुत्रीकुरुतेभा
नुःपुत्रमेकोनिशाकरः ॥ सशोकंपुत्रहीनंचपंचमोधरणीसुतः ॥ ३ ॥ उच्चोवायदिवानीचोपंचमःशिखिनास्थितः ॥ हाहाकारंचकुरुतेपुत्र
शोकेनपीडितः ॥ ४ ॥ ऋतुरेतोअदृष्टोवायदिचैकोनपश्यति ॥ अप्रसूतौभवेत्पुरुषःपरिणयेद्धित्रिचतुस्त्रियः ॥ ५ ॥ एकत्रिपंचपुत्राणि
सूर्येधीस्थेकुजेगुरौ ॥ द्वि २ त्रि ३ पंचच ५ सप्तैव ७ पुत्रींदौज्ञसितेशनिः ॥ ६ ॥ पापाःपंचमराशौजातंजातंशिशुंविनाशयति ॥
सप्तमराशौपापाद्वेभार्येबादरायणेनोक्तम् ॥ ७ ॥ एकपुत्रोरवौवाच्यश्चंद्रेचैवसुताद्वयम् ॥ भौमेपुत्रास्त्रयोवाच्याबुधेपुत्रीचतुष्टयम् ॥ ८ ॥
गुरौगर्भेसुताःपंचषट्पुत्र्योभृगुनंदने ॥ शनौचगर्भपातःस्याद्राहौगर्भोभवेन्नहि ॥ ९ ॥ सुतस्थानेद्विपापौवात्रिपापाश्चात्रसंस्थिताः ॥ तदास्त्रीपुरु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षौवंध्योविज्ञेयौसुतवीक्षिते ॥ १० ॥ ऋतुश्चकथितःशुक्रोरेतोभौमःप्रकीर्तितः ॥ यद्वर्षेपश्यतेभौमोतद्वर्षेगर्भसंस्थिताः ॥ ११ ॥ ऋतुरेतश्चसंप
र्कोजायतेविषमागतिः ॥ करसंपुटमादायवंध्याभवतिनिश्चितम् ॥ १२ ॥ पुंराशौलग्नपतिःसुताधिकंवीक्षतेवापि ॥ संततिबाधांकुरुतेकेंद्रेपापान्वि
तेचंद्रे ॥ १३ ॥ लग्नात्पुत्रकलत्रभेशुभपतिःप्राप्तेथवालोकितेचंद्राद्वायादिसंपदस्तुहितयोज्ञेयोयथासंभवः ॥ पापेनोदयगेरवौरविसुतेमीनस्थितेदार
हापुत्रस्थानगतश्चपुत्रमरणंपुत्रोवनेयच्छति ॥ १४ ॥ लग्नद्वितीयेयदिवातृतीयेविलग्ननाथेप्रथमःसुतःस्यात् ॥ तुर्यस्थितेस्मिंश्चसुतोद्वितीयःपु
त्रीसुतोवेतिपुरःप्रकल्प्यम् ॥ १५ ॥ धनस्थानेयदाक्रूरःक्रूरग्रहसमन्वितः ॥ नपश्यतिनिजक्षेत्रमल्पपुत्रस्तदाभवेत् ॥ १६ ॥ सहजेसहजाधीशो
लग्नेवाथधनेभवेत् ॥ जायतेनतदाबालोयदिजातोनजीवति ॥ १७ ॥ यावत्संख्याइतिकाव्यंनवांशकस्थानेलिखितमस्तिपूर्वम् ॥ झषधनुर्धरपं
चमभावगेप्रसवसौख्यफलंनचदृश्यते ॥ मृतप्रजःखलुपंचमगेयुरौतादिहदृष्टिफलंशुभमश्नुते ॥ १८ ॥ लाभेसुतेवाशुक्रेंदुयुतेभौमोथवाक्रमात् ॥
शुक्रेंदूपश्यतःपुत्रंवर्षेस्मिन्संतदिस्तदा ॥ १९ ॥ यत्रचैकादशेराहुःपंचमेचाशिखीस्थितः ॥ सुताननंनदृश्येतयदींद्रोपिचसेव्यते ॥ २० ॥ ५ ॥
॥ अथरिपुभावः ॥ ॥ षष्ठेक्रूरानरंकुर्युःशत्रुपक्षविवर्जितम् ॥ सौम्याःषष्ठामहारोगान्पष्ठश्चंद्रश्चमृत्युदः ॥ १ ॥ ॥ इतिरिपुभावः ॥ ६ ॥
अथजायाभावविचारः ॥ ॥ भार्यायांसप्तमेपापाःसौम्याःसर्वजनप्रियाम् ॥ गुरुशुक्रौशचीतुल्यांरूपलावण्यशालिनीम् ॥ १ ॥ षष्ठेचभुवनेभौ
मःसप्तमेसिंहिकासुतः ॥ अष्टमेचयदासौरिर्भार्यातस्यनजीवति ॥ २ ॥ जायाभावेसौरिशशीचराहुर्जायापतिःपश्यतिसौख्यबाल्यम् ॥ तस्यगृहेसं
भवतीहनारीश्यामाचगौरीबहुपुत्रिणीच ॥ ३ ॥ लग्नेव्ययेचपातालेजामित्रेचाष्टमेकुजः ॥ कन्याभर्तुर्विनाशायभर्तुःकन्याविनश्यति ॥ ४ ॥ लग्नं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पापग्रहंगौरीदुर्बलःशत्रुपीडितः ॥ भवेद्दुर्वाच्यतायुक्तोभवेत्परवधूरतः ॥ ५ ॥ लग्नाद्यथेवारिपुमंदिरेवादिवाकरेंदूभवतस्तदानीम् ॥ स्यान्मानव स्यात्मजएकएवभार्यापिवैकेतिवदंतिसंतः ॥ ६ ॥ गंडांतकालेचकलत्रभावेभृगोःसुतेलग्नगतेर्कजातः ॥ वंध्यापतिःस्यान्मनुजस्तदानींशुभेक्षितंनो भवनंसुतानाम् ॥ ७ ॥ व्ययालयेवामदनालयेवाखलेषुबुद्ध्यालयगेहिमांशौ ॥ कलत्रहीनोमनुजस्तनूजैर्विवर्जितःस्यादितिवेदितव्यम् ॥ ८ ॥ संभूतिकालेचकलत्रभावेयमस्यभूमिंतनयस्यवर्गे ॥ ताभ्यांप्रदृष्टेव्यभिचारिणीस्याद्भार्यास्वयंवैव्यभिचारकर्त्ता ॥ ९ ॥ शुक्रेंदुपुत्रौचकलत्रसंस्थौक लत्रहीनंकुरुतेनरंतौ ॥ शुभेक्षितौवावयसोविरामेकामांचरामांलभतेमनुष्यः ॥ १० ॥ चंद्राद्विलग्नाच्चखलाःकलत्रेहन्युःकलत्रंचलयंगतास्तौ ॥ चंद्रार्कपुत्रौचकलत्रसंस्थौपुनर्भवास्त्रीपरिलिप्तिदौस्तः ॥ ११ ॥ महीसुतेसप्तमभावयातेकांताविवियुक्तःपुरुषस्तदास्यात् ॥ मंदेनदृष्टेप्रियतेचिरात्तदासू र्येणदृष्टेबहुदुःखपीडितः ॥ १२ ॥ षष्ठेचभुवनेभौमःसप्तमेराहुसंभवः ॥ अष्टमेचयदासौरिस्तस्यभार्यानजीवति ॥ १३ ॥ ॥ इतिजायाभावफ लम् ॥ ॥ अथायुर्भावविचारः ॥ ॥ पूर्वमायुःपरीक्षेतपश्चाल्लक्षणमादिशेत् ॥ आयुर्हीननराणांचलक्षणैःकिंप्रयोजनम् ॥ १ ॥ खेटाःसर्वेमहादुष्टा अष्टमस्थानमाश्रिताः ॥ शशांकस्तुविशेषेणजन्मकालेचमृत्युदः ॥ २ ॥ कृष्णपक्षेदिवाजातःशुक्लपक्षेयदानिशि ॥ तदाषष्ठाष्टमश्चंद्रोमातृवत्परि पालकः ॥ ३ ॥ पंचमस्थोनिशानाथस्त्रिकोणेचबृहस्पतिः ॥ दशमेचमहीसूनुःशतवर्षसजीवति ॥ ४ ॥ शनैश्चरस्तुलाकुंभमकरेयदिवाभवेत् ॥ लग्नेषष्ठेतृतीयेवातदारिष्टंनजायते ॥ ५ ॥ राहुर्वृषेत्रिभिर्दृष्टेकेतुदृष्टेचतुष्टये ॥ वृषेचगुरुशुक्राभ्यांदीर्घकालंसजीवति ॥ ६ ॥ केंद्रेशुभोयदै कोपिबलीविश्वाप्रकाशकः ॥ सर्वेदोषाःक्षयंयांतिदीर्घायुश्चभवेन्नरः ॥ ७ ॥ एकोपिकेंद्रेबुधजीवशुक्राःक्रूराःसहस्राणिविरुद्धयुक्ताः ॥ तथापि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वाण्यपियांतिनाशंयथामृगाःकेसरिदर्शनेन ॥ ८ ॥ पातालेवांबरेलग्नेसुतेधर्मेतथायगे ॥ देवगुरुस्तथाशुक्रोनाशयेद्दुरितंबहु ॥ ९ ॥ एको
पिकेंद्रेयदिद्युच्चसंस्थःसर्वेग्रहाभावगुणेनतुल्यम् ॥ सर्वेप्यरिष्टंचविनाशयंतितमोयथाभास्करदर्शनेन ॥ १० ॥ शुक्रोदशसहस्राणिबुधोदशशता
निच ॥ लक्षमेकंतुदोषाणांगुरुर्लग्नेव्यपोहति ॥ ११ ॥ केंद्रत्रिकोणगोजीवोशुक्रोवाचंद्रनन्दनः ॥ तस्यपुरुषस्यदीर्घायुःसभवेद्राजवल्लभः ॥
॥ १२ ॥ गुरुर्धनुषिमीनेवातथाकर्कटकेपिवा ॥ लग्नात्त्रिकोणेकेंद्रेवातदारिष्टंनजायते ॥ १३ ॥ अजवृषकर्कटलग्नेरक्षतिराहुःसमग्रपीडाभ्यः ॥
पृथ्वीपतिःप्रसन्नःकृतापराधंयथापुरुषम् ॥ १४ ॥ (उक्तञ्चलघुजातके) " राहुस्त्रिषष्ठलाभेलग्नात्सौम्यैर्निरीक्षितःसद्यः ॥ नाशयतिसर्वदुरितंमारुतइ
वतूलसंघातम् " ॥ १५ ॥ विलग्नपोयत्रबलेनयुक्तोलाभेतृतीयेयदिकंटकेवा ॥ सर्वाण्यरिष्टानिप्रयांतिदूरंदीर्घायुरारोग्यतनुङ्करोति ॥ १६ ॥
एकोपियदिकेंद्रस्थोभार्गवोथगिरांपतिः ॥ नवमेवासुतस्थानेसर्वारिष्टंनिवारयेत् ॥ १७ ॥ उक्तञ्चलघुजातके " बुधभार्गवजीवानामेकतमःकेंद्रमा
श्रितोबलवान् ॥ क्रूरःसहायोयद्यपिसद्योरिष्टप्रशमनाय ॥ १८ ॥ स्वस्थानगोधिकबलःसुरराजमंत्रीकेंद्रोपगःप्रशमयेत्स्फुरदंशुजालः ॥ एको
बहूनिदुरितानिसुदुस्तराणिभक्त्याप्रयुक्तइवशूलधरेप्रणामः ॥ १९ ॥ लग्नाधिपोतिबलवान्किलसौम्यदृष्टःकेंद्रस्थितैःशुभखगैरथवीक्ष्यमाणः ॥
मृत्युंविहायविदधातिसुदीर्घमायुःसंपूर्यतेनिजगृहंपरयाचलक्ष्म्या ॥ २० ॥ लग्नादष्टमसंस्थोगुरुबुधशुक्रद्वेष्काणगश्चंद्रः ॥ मृत्युप्राप्तमपिनरंपरिरक्षं
त्ययुतबालम् " ॥ २१ ॥ चंद्रःसंपूर्णतनुःसौम्यर्क्षगतोथवाशुभस्याते ॥ प्रकरोत्यरिष्टभंगंविशेषतःशुक्रसंदृष्टः ॥ २२ ॥ रिपुगःशुभद्रेष्काणेस्थितः
शशीसौम्याःखचराःसबलाः ॥ कुर्वंत्यरिष्टभंगंविशेषंयथावसुधांचलुकः ॥ २३ ॥ सौम्येद्वयांतर्गतःसंपूर्णस्निग्धमंडलश्चंद्रः ॥ भुनक्त्यशेषारिष्टान्भु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जगारिर्भुजगलोकमिव ॥ २४ ॥ प्रस्फुरितकिरणजालेस्निग्धामलमंडलेबलोपेतः ॥ सुरमंत्रिणिकेंद्रगतेसर्वारिष्टंक्षयंयाति ॥ २५ ॥ सौम्यानां भुवनगताःसौम्यांशकसंभवद्रेष्काणस्थाः ॥ गुरुचन्द्रकाव्यशशिजाःसर्वेरिष्टमस्यहंतारः ॥ २६ ॥ चन्द्रोपाशितराशितपकेन्द्रेशुभग्रहोवापि ॥ प्रकरोत्यरिष्टभंगंपापानियथाशिवस्मरणम् ॥ २७ ॥ पापायदिशुभवर्गेसौम्यैर्दृष्टाःशुभांशवर्गस्थैः ॥ निघ्नंतिसदारिष्टंपतेर्विरक्तायथायुवतिः ॥ ॥ २८ ॥ शीर्षोदयेषुराशिषुसर्वेगगनाधिवासिनोधिगताः ॥ प्रतिहंतिसर्वदुरितंयथाघृतंवाग्निसंयोगात् ॥ २९ ॥ तत्कालयुद्धविजयीशुभग्रहः शुभनिरीक्षितश्चापि ॥ नाशयतिकष्टनिवहंवात्याइवपादपंसकलम् ॥ ३० ॥ गगनविभूषणसौम्यैर्दृष्टोनाशयतिसर्वदुरितानि ॥ संपूर्णमूर्तिरुडु पोदुर्नयनःखंयथानाशम् ॥ ३१ ॥ उदयोसप्तमुनीनांतथागस्त्यःपुनरपिविलीयते ॥ तदारिष्टंनवशीतिमिवापापैर वीर्यैश्चशुभैःसवीर्यैः ॥ ३२ ॥ शुभराशौतनुभावयानिरीक्षितेव्योमचरैःशुभाख्यैः ॥ संक्षीयतेरिष्टंसुखागतंहि ॥ ३३ ॥ मूर्तेस्तुराहुस्त्रिषडायवर्तीरिष्टंहरत्येवशुभैःप्रदिष्टः ॥ शीर्षो दयस्थैर्विकृतिंनयातिसमस्तखेटैःखलुरिष्टभंगः ॥ ३४ ॥ तत्रत्ययेलाभरिपुत्रिसंस्थाःकेतुस्तुहेतुर्निधनोपशांत्यै ॥ परस्परंभार्गवजीवसौम्यास्त्रि कोणगास्तेपिहरंत्यरिष्टम् ॥ ३५ ॥ संध्याभावावैधृतिपातभद्रगंडांतयुक्तायदिजन्मकाले ॥ भवंत्वरिष्टस्यविनाशनार्थंनिरंतरादस्यदलेचसर्वे ॥ ॥ ३६ ॥ चतुष्टयेश्रेष्ठबलाधिशालिशुभोनभोगोष्टमगोनकश्चित् ॥ विंशन्मितायःप्रकरोतिनूनंदशान्वितंतच्छुभखेटदृष्टः ॥ ३७ ॥ निजत्रिभागेस्वगृहेगुरुश्चेदायुर्गतिःस्यात्खलुविंशविंशत ॥ बृहस्पतिस्तुंगगतोविलग्नेभृगोःसुतःकेंद्रगतेशतायुः ॥ ३८ ॥ लग्नेस्वतुंगेबल शालिनींदौसौम्याःशुभस्थाःखलुषष्टिरायुः ॥ मूलत्रिकोणेषुशुभेतुंगेलग्नेगुरावायुरशीतिरेव ॥ ३९ ॥ लग्नेष्टमारेंदुयुतानचेत्स्युःक्रूराःशुभस्थाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिखेचरेंद्राः ॥ बलान्वितावंचरताभवेताजातःशतायुःकथितोमुनींद्रैः ॥ ४० ॥ शून्येरंध्रैःक्रूरगैःसौम्यखेटैर्लग्नेजीवेनैधनेहृदयश्चेत् ॥ नोसंदिष्टाःपापखेटैःसदास्यादायुर्मानंसप्ततिर्वत्सराणाम् ॥ ४१ ॥ भानोरग्निभयंशशांकमुदकेभौमेमृतिश्चायुधैःसौम्येकष्टज्वरंमहांतविषमेरामाचहस्ते गुरौ ॥ शुक्रेवांत्यक्षुधात्रिषारविसुतेमृत्युर्भवेत्सर्वदासर्वेतेमरणंकरोतिसततंस्थानेस्थितेचाष्टमे ॥ ४२ ॥ दशमेपञ्चमेजीवोबुधश्चंद्रश्चभार्गवः ॥ शतंजीवीभवेज्जातोधनाढ्योवेदपारगः ॥ ४३ ॥ नवमेपंचमेजीवोबुधोभवतिसप्तमः ॥ लग्नेभार्गवशुक्रौचशतंजीवीभवेन्नरः ॥ ४४ ॥ अथ लघुजातकरीत्यागतिविचारोलिख्यते ॥ सूर्यादिभिर्धनगैर्हुतवहसलिलायुधक्षुरामयजः ॥ क्षुत्तृट्कृतश्चमृत्युःपरदेशेनैधनेचरभे ॥ ४५ ॥ योवा बलवान्निधनंपश्यतितद्धातुकोपजोमृत्युः ॥ लग्नेत्रिंशांशपतिर्द्वाविंशतिहायनेमृत्युः ॥ ४६ ॥ विबुधपितृतिरश्चोनरकान्युरुरिंदुसितौच ॥ सृग्रवीज्ञयमौरिपुरंध्रंत्रिंशपानयंतिविस्तारंनिधनस्थाः ॥ ४७ ॥ षष्ठाष्टमकण्टकगोयुरुरुचेभाविमीनलग्नेवा ॥ शेषैरबलैजन्मनिमरणेवामोक्षगतिमाहुः ॥ ४८ ॥ गुरुरुडुपतिशुक्रौसूर्यभौमौयमज्ञौविबुधपितृतिरश्चोनारकायांश्चकुर्युः ॥ दिनकरशशिवीर्याधिष्टितत्र्यंशनाथात्प्रवरसमनिकृष्टास्तुंगभासादनूके ॥ ४९ ॥ स्थिरश्चरोद्वेगसमाहयश्चराशिर्यदाजन्मनिचाष्टमस्थः ॥ स्वकीयदेशेविषयांतरेवाआयुःप्रकुर्यान्मरणक्रमेण ॥ ५० ॥ आयुर्ग्रहंखेटविवर्जितंचेद्विलोकयेत्तद्बलवान्ग्रहेंद्रः ॥ तद्धेतुजातंप्रवदंतिमृत्युंबहुप्रकारंबहवोबलिष्ठाः ॥ ५१ ॥ पित्तंकफःपित्तमथत्रिदोषंश्लेष्मानिलोवाप्यनिलक्रमेण ॥ सूर्यादिकेभ्योमरणस्यहेतुःप्रकल्पितःप्राक्तनुजातकज्ञैः ॥ ५२ ॥ इत्यष्टमभावेऽरिष्टभंगप्रकरणम् ॥ ८ ॥ ॥ अथनवमभावफलम् ॥ ॥ विहायसर्वंगणकैर्विचिंत्यंभाग्यालयंकेवलमत्रयात्रात् ॥ आयुश्चमाताचपिताचबंधुर्भाग्यान्वितेनैवभवंतिधन्याः ॥ १ ॥ यस्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तिभाग्यंसनरःकुलीनःसपंडितःसश्रुतिमान्गुणज्ञः ॥ सएववक्तासचदर्शनीयोभाग्यान्वितःसर्वगुणैरुपेतः ॥ २ ॥ ॥ अथभाग्योदयलक्षण
म् ॥ ॥ द्वाविंशेरविणाचवर्षकथितंचंद्रेचतुर्विंशतिह्यष्टाविंशतिभूमिनंदनमतंदातुर्बुधेचस्मृतम् ॥ जीवेषोडशभृगोःपंचविंशतितथाषट्त्रिंशसौरी
वदेत्कर्मेशात्खलुकर्मचैवकथितंलग्नाधिपौचेत्स्मृतम् ॥ ३ ॥ भाग्ययोर्ग्यंतरेसौरिःस्थितोजन्मयथाभवेत् ॥ लग्नपेतुविशेषेणयावज्जीवसमृद्धि
मान् ॥ ४ ॥ मूर्तेश्चापिनिशापतेश्चनवमंभाग्यालयङ्कीर्तितंतत्स्वस्वामियुतेक्षितंप्रकुरुतेभाग्यंचदेशोद्भवम् ॥ चेदन्येविषयांतरैश्चशुभदाःस्वोच्चा
दिगाःसर्वदाकुर्युर्भाग्यमसाधवोनचबलादुःखोपलब्धिपराम् ॥ ५ ॥ भाग्येश्वरोभाग्यगतोस्तिकिंवास्वस्थानगाःसारविराजमानः ॥ भाग्याश्रितः
कोस्तिविचारसर्वमनल्पमल्पंपरिकल्पनीयम् ॥ ६ ॥ तनुत्रिसूनूपगतोग्रहश्चेद्योवाधिवीर्योनवमंप्रपश्येत् ॥ यस्यप्रसूतौसतुभाग्यशालीविलासशी
लोबहुलार्थयुक्तः ॥ ७ ॥ चेद्भाग्यगामीखचरःस्वगेहेसौम्येक्षितोयस्यनरस्यसूनौ ॥ भाग्याधिशालीस्वकुलावतंसोहंसोयथामानसराजमानः ॥
॥ ८ ॥ पूर्णेंदुयुक्तौरविभूमिपुत्रौभाग्यस्थितौजीवसमन्वितौच ॥ वंशानुमानंसचिवंनृपंवाकुर्वंतितेसौम्यदशाविशेषात् ॥ ९ ॥ स्वोच्चोप
गोभाग्यगृहेनभोगेनरस्ययोगंकुरुतेचलक्ष्म्या ॥ सौम्येक्षितोसौयदिभूमिपालंदन्तावलोत्कृष्टविलासलाभम् ॥ १० ॥ ॥ इतिभाग्यभावः ॥
॥ ९ ॥ ॥ अथदशमभावफलम् ॥ ॥ समुदितमृषिवर्यैर्मानवानांप्रयत्नादिहहिदशमभावेसर्वकर्मप्रकामम् ॥ गगनगपरिदृष्ट्याराशिखेटःस्व
भावःसकलमपिविचिंत्यंसत्त्वयोगात्सुधीभिः ॥ १ ॥ ततःसकाशाद्दशमेशशाङ्केवृत्तिर्भवेत्तस्यनरस्यनित्यम् ॥ नानाकलाकौशलवाग्विलासः
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥ अथशनिमध्येशुक्रफलम् ॥ सुहृद्बंधुवशीयुक्तंभार्यावित्तंजयान्वितम् ॥ सुखसौभाग्यवात्सल्यंसौरस्यातर्गतेसिते ॥ १ ॥ पुत्रकासुखभाईसाथिप्रीतिघणी ॥ भार्याहूंतीसुखप्राप्तिःद्रव्यअर्जनाहोई ॥ जनसाथिप्रीतिहोई ॥ एकगौरपुरुषएकणिआंखिकाणोमिलई ॥ अन्यजातितेहसाधिविणकरतांलाभहोई ॥ ॥ अथशनिमध्येरविफलम् ॥ ॥ पुत्रदारधनैर्नाशंकरोतिसमयंमहत् ॥ सौरस्यांतर्गतेभानौजीवितस्यापिसंशयम् ॥ १ ॥ पुत्रकाकष्टस्त्रीकाकष्टधननाशवैरीकीधाआपदापडै ॥ पूर्वदिशिजाइतिहांहानिहोई ॥ ॥ अथशनिमध्येचन्द्रफलम् ॥ ॥ मरणंस्त्रीवियोगश्चबंधूद्वेगोसुखंशृणु ॥ क्रुद्धमारुरुजोरोगंचन्द्रावंतर्गतेशनौ ॥ १ ॥ मरणांतकष्टस्त्रीकावियोगभ्राताकुंपीडाअसमाधिक्रोध ॥ प्रकृतिरोगप्राप्तिःधवलीगाइदानैकष्टटलई ॥ ॥ अथशनिमध्येभौमफलम् ॥ ॥ देशभ्रंशंतथादुःखंकुरुतेव्याधिभ्रंशता ॥ अंतर्दशायांसौरस्यकुजःप्राणमहद्भयम् ॥ १ ॥ राजविद्धस्थकीदेशांतरहोई ॥ महादुःखपांमई ॥ वातविकार लक्ष्मीकीहानि ॥ चोपदहुंतीभयपाणीकासंकट ॥ ॥ अथशनिमध्येराहुफलम् ॥ ॥ श्वभ्रावातांगभेदश्चज्वरातीसारपीडनम् ॥ शत्रुभंगोऽर्थनाशश्चराहोरंतर्गतेशनौ ॥ १ ॥ धवलीदभूतहोईशरीरईफुटणी ॥ रुधिरकठावई ॥ अतिसारकीपीडाशत्रुपराभव ॥ द्रव्यनाशहोई ॥ एदशामान्यमफलकृष्णदानदेणा ॥ कष्टटलई ॥ ॥ अथशनिमध्येगुरुफलम् ॥ ॥ देवार्चनंद्विजःसौख्यंबहुभृत्ययुणैर्युतम् ॥ स्थानप्राप्तिंगुरुःकुर्यात्सौरस्यांतर्गतादशा ॥ १ ॥ एदशाभलीदेवपुजागुरुपूजाकरई ॥ ब्राह्मणकीभक्तिकरई सुखकीप्राप्तिकरई ॥ पीतीवस्तुरातीवस्तुहूंतीलाभ ॥ ॥ इतिशनिमहादशासंपूर्णा ॥ ॥ अथबुधदशालिख्यते ॥ ॥ दिव्यांगनावदनपंकजषट्पदस्यलीलाविलासवरभोगसमन्वितस्य ॥ नानाप्रकारविभवागमकोशवृद्धिःक्षिप्रंपुनर्बुधदशाभिमतार्थसिद्धिम् ॥ १ ॥ अथबुधमध्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बुधफलम् ॥ ॥ बुद्धिर्धर्मसमायोगोमित्रबंधुसमरगमाः ॥ प्राप्तिर्ज्ञानस्यविपुलादेहपीडांप्रकोपनाम् ॥ टीका ॥ रूपवतीस्त्रीकीप्राप्तिः ॥ भोगकीप्राप्तिकरई ॥ धर्मअर्थकामामित्रवर्गसाधई ॥ बांधवाकामेलमंत्रिकामेलविद्याकीप्राप्तिःकांइदेहपीडा ॥ ॥ अथबुधमध्येकेतुफलम् ॥ ॥ दुःखशोकातुलंनित्यंशरीरक्लेशसंयुतम् ॥ भवत्यंतर्दशायांहिकेतुर्यदिबुधस्यच ॥ १ ॥ दुःखकष्टगाढाहोईशोकउपजई ॥ शरीररोगविचार ॥ चौपदाहूंतीभयअग्निहूंतीभय ॥ अथबुधमध्येशुक्रफलम् ॥ गुरुवस्त्राणिलभ्यंतेधनधर्मप्रियंतथा ॥ वस्त्रालंकरणैर्युक्तंबुधस्यांतर्गतःसितः ॥ ॥ १ ॥ एदशामाहिवस्त्रप्राप्तिराज्यप्रसाद आभरणमुद्रा ॥ रक्तादिकनीप्राप्तिअत्यंतलाभहोई ॥ पुण्यवांछाहोई ॥ भोगप्राप्तिः ॥ ॥ अथबुधमध्येरविफलम् ॥ ॥ स्वर्णादिकंभवेत्प्राप्तिर्यशःप्राप्नोतिसर्वतः ॥ जायास्वस्त्रीभवोद्वेगोबुधस्यांतर्गतेरवौ ॥ १ ॥ अथबुधमध्येचंद्रफलम् ॥ कुष्ठगंडविकारैश्चक्षयरोगभगंदरैः ॥ गजादिवाहनैर्भीतिश्चंद्रेचांतर्गतोबुधः ॥ १ ॥ श्वेतवस्त्रदान ॥ ॥ अथबुधमध्येमंगलफलम् ॥ ॥ शिरोरोगगलेरोगैर्नानाक्लेशविमर्दनम् ॥ चोरभंगभयंचाथबुधस्यांतर्गतेकुजे ॥ १ ॥ टीका ॥ अग्निभयनासाविकारदानदेणारातिवस्तु ॥ ॥ अथबुधमध्येराहुफलम् ॥ ॥ अकस्माच्छत्रुनिर्घातमकस्मादर्थनाशनम् ॥ संपर्कादग्निदाहंचराहोरंतर्गतेबुधे ॥ १ ॥ अथबुधमध्येगुरुफलम् ॥ ॥ व्याधिशत्रुभयैर्मुक्तोब्रह्मिष्ठोनृपवल्लभः ॥ पूतात्माधर्मकश्चैवबुधस्यांतर्गतेगुरौ ॥ १ ॥ ॥ अथबुधमध्येशनिफलम् ॥ ॥ धर्मार्थभोगीगंभीरः क्लीबोमित्रार्थलुब्धकः ॥ सर्वकार्येष्वनुत्साहोबुधेसौरोयदानुगः ॥ ॥ इतिबुधमहादशाफलम् ॥ ॥ अथकेतुमहादशाफलम् ॥ ॥ विषादकर्त्रीधनधान्यहर्त्रीसर्वापदामूलमनर्थदात्री ॥ भयंकरीरोगविपद्विधात्रीकेतोर्दशास्यात्किलजीवहंत्री ॥ ॥ अथकेतुमध्येकेतुफलम् ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केतौकन्यापुत्रनाशाधनरोगाग्निविग्रहाः ॥ भयंराज्यकुलाद्दुष्टस्त्रीभिसहकलिर्भवेत् ॥ १ ॥ ॥ अथकेतुमध्येशुक्रफलम् ॥ ॥ केतोरंतर्गतेशुक्रे प्रियायाश्चकलिर्भवेत् ॥ अग्निदाहंज्वरंतीव्रंस्त्रीत्यागंकन्यकाजनिः ॥ १ ॥ अथकेतुमध्येरविफलम् ॥ ॥ केतोरंतर्गतेसूर्येराजभंगोरिविग्रहः ॥ अग्निदाहोज्वरस्तीव्रोविदेशगमनंभवेत् ॥ १ ॥ ॥ अथकेतुमध्येचंद्रफलम् ॥ ॥ अर्थलाभोऽर्थहानिश्चसुखंदुःखंतथैवच ॥ स्त्रीलाभोधनहानिश्चकेतोरंतर्गतःशशी ॥ १ ॥ एदशामिश्रफला ॥ ॥ अथकेतुमध्येभौमफलम् ॥ ॥ गोत्रजैःसहसंवादश्चोराणांचभयंतथा ॥ शरीरपीडांप्राप्नोतिकेतोरंतर्गतेकुजे ॥ १ ॥ अथकेतुमध्येराहुफलम् ॥ ॥ चोरैश्चशत्रुभिर्वापिदेहभंगःप्रजायते ॥ दुर्जनैःसहसंवादोराहुःकेतोर्यदानुगः ॥ ॥ १ ॥ ॥ अथकेतुमध्येगुरुफलम् ॥ ॥ दुर्जनैःसहसंयोगोराजमान्यैःसहाथवा ॥ भूलाभोजन्मपुत्रस्यकेतोरंतर्गतेगुरौ ॥ १ ॥ ॥ ॥ अथकेतुमध्येशनिफलम् ॥ ॥ वातपित्तभवापीडास्वजनैःसहविग्रहः ॥ विदेशगमनंचापिकेतोरंतर्गतेशनौ ॥ १ ॥ ॥ टीका ॥ कालादानदेणा ॥ कष्टटलई ॥ ॥ अथकेतुमध्येबुधफलम् ॥ ॥ सुहृद्बंधुसमायोगोबुद्धिबोधंधनागमम् ॥ नकिंचित्क्लेशमाप्नोतिकेतोरंतर्गतेबुधे ॥ ॥ १ ॥ ॥ इतिकेतुदशासमाप्ता ॥ ॥ अथशुक्रदशाफलंलिख्यते ॥ ॥ मित्रोपचारमशुभप्रमदाविलासंश्वेतातपत्रनृपपूजितदेशलाभम् ॥ हस्त्यश्वयानपरिपूर्णमनोरथाश्चशुक्रेदशासृजतिनिश्चलराज्यलक्ष्मीम् ॥ १ ॥ ॥ अथशुक्रमध्येशुक्रफलम् ॥ ॥ शौक्रस्त्रीसंगमोलाभोधर्मकामार्थसंयुतः ॥ कौशल्यंचमहाकीर्तिर्निधिलाभश्चजायते ॥ १ ॥ ॥ अथशुक्रमध्येरविफलम् ॥ ॥ गंडोदरक्षयंरोगैर्नृपवंध्यादिकेतवैः ॥ उपपातोभवेन्नूनंशुक्रस्यातर्गतेरवौ ॥ १ ॥ अथशुक्रमध्येचंद्रफलम् ॥ ॥ नखास्थिजशिरोरोगैःकोमलाद्यामयैर्दशाम् ॥ शरीरक्लेशमाप्नोतिशुक्रस्यां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तर्गतःशशी ॥ ॥ अथशुक्रमध्येभौमफलम् ॥ ॥ वातपित्तक्षयोरोगोमदोत्साहोन्यसंशयः ॥ भूयःस्याद्भूमिलाभश्चशुक्रस्यातर्गतेकुजे ॥ ॥ १ ॥ अथशुक्रमध्येराहुफलम् ॥ ॥ अंत्यजैःसहसंक्लेशःबंधूद्वेगःसुहृद्वधः ॥ अकस्माद्भयमाप्नोतिराहोरंतर्गतःसितः ॥ १ ॥ ॥ अथशुक्रमध्येगुरुफलम् ॥ ॥ धान्यरत्नसमृद्धंचभूमिपुत्रसुखावहः ॥ श्रियंप्रभुत्वमाप्नोतिजीवःशुक्रदशांगतः ॥ १ ॥ अथशुक्रमध्येशनिफलम् ॥ ॥ वृद्धस्त्रीभिःसहक्रीडापुत्रनाशोविपत्पदम् ॥ शत्रुनाशःशुद्धप्राप्तिःसौरःशुक्रदशांगतः ॥ १ ॥ ॥ अथशुक्रमध्येबुधफलम् ॥ ॥ धनागमश्चसौख्यंचमनोरथयशःश्रियः ॥ नृपवल्लभताशौर्यंशुक्रस्यांतर्गतेबुधे ॥ १ ॥ ॥ अथशुक्रमध्येकेतुफलम् ॥ ॥ कलहोबांधवैःसार्द्धंरिपुनाशोरिविग्रहः ॥ चलाचलंसमग्रंचकेतावंतर्गतेसिते ॥ ॥ इतिविंशोत्तरीदशान्तर्दशासमाप्ता ॥ ॥ अथअष्टोत्तरीमहादशान्तर्दशाफलंलिख्यते ॥ ॥ तत्रप्रथमंसूर्यमहादशाफलम् ॥ ॥ खेर्दशायामतितीक्ष्णभोज्यंप्राप्नोतिमानोपचयंमहांतम् ॥ धनानिचामीकरशंप्रशांतंसंजायतेबंधुसुखंशुभंच ॥ १ ॥ ॥ अथसूर्यमध्येसूर्यांतर्दशाफलम् ॥ ॥ बंधूनांस्वांतरेमानोबंधूनांमरणंभवेत् ॥ अत्यंतरेचांतरादौसर्वमेवफलंवदेत् ॥ १ ॥ ॥ अथसूर्यमध्येभौमफलम् ॥ ॥ प्रवालमुक्ताहेमादिधनंप्राप्नोतिभूपतेः ॥ खेरंतर्गतेभौमेविभूतिःसुखमद्भुतम् ॥ १ ॥ ॥ अथसूर्यमध्येबुधफलम् ॥ ग्रहवातव्याधिहानिर्द्रव्यनाशःकुलक्षयः ॥ अविश्वासोभवेल्लोकेखेरंतर्गतेबुधे ॥ १ ॥ ॥ अथरविमध्येशनिफलम् ॥ ॥ महादुःखानिजायंतेपुत्रमित्रविनाशनम् ॥ खेरंतर्गतेमंदेशत्रुतश्चभयंभवेत् ॥ १ ॥ ॥ अथरविमध्येगुरुफलम् ॥ ॥ विपद्रोगविनाशश्चलक्ष्मीमेधेसुखानिच ॥ खेरंतर्गतेजीवेशत्रुमंगलमुत्सवः ॥ १ ॥ ॥ अथरविमध्येराहुफलम् ॥ ॥ शोकोभंगोमहाभीतिर्विपत्तिरशुभंनृणाम् ॥ खेरंतर्गतेराहौसर्वत्रामंगलाक्रिया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १ ॥ ॥ टीका ॥ ॥ अत्रव्यसनप्राप्तिःनीचसंगतिःबंधुनाशःगुप्तरोगःपाषाणहृदयंचरणेवातरोगः ॥ मूत्रकृच्छ्रंशरीरकष्टंश्यामवर्णपुरुषतोहानिः ॥ मध्येस्वल्पसुखम् ॥ अल्पहानिः ॥ ॥ अथरविमध्येशुक्रफलम् ॥ ॥ गात्रपीडाभयंत्रासोज्वरातीसारशूलके ॥ द्रव्यादिहानिंप्राप्नोतिरवेरंतर्गतेसिते ॥ १ ॥ ॥ इतिरविदशासमाप्ता ॥ ॥ अथचंद्रदशांतर्दशाफलंलिख्यते ॥ ॥ नित्यंविभूषामणिवस्त्रलाभंमिष्टान्नपानंप्रमदानुरागम् ॥ चांद्रीदशा साधुफलंनराणांलभेतपूजान्नृपतेःसदैव ॥ १ ॥ ॥ अथचंद्रमध्येचंद्रान्तर्दशाफलंलिख्यते ॥ ॥ चन्द्रेस्वांतर्गतेसौख्यंसर्वत्रविजयोभवेत् ॥ स्वपक्षवैरंकन्यानांजन्मनिद्रारतिर्भवेत् ॥ १ ॥ ॥ अथचंद्रमध्येभौमफलम् ॥ ॥ शस्त्ररोगभयैर्युक्तोवन्हिचोरधनक्षयः ॥ विधोरन्तर्गतेभौमेमनोदुःखंभवेन्नृणाम् ॥ १ ॥ ॥ अथचंद्रमध्येबुधफलम् ॥ ॥ सर्वत्रलभतेलाभंगजाश्वैर्गोधनादिकम् ॥ जायतेकन्यकालाभश्चंद्रस्यांतर्गतेबुधे ॥ १ ॥ ॥ ॥ अथचंद्रमध्येशनिफलम् ॥ ॥ बंधुवैरंस्थानहानिःशोकोवाकलहोविपत् ॥ विधोरंतर्गतेमंदेसंदिग्धोभवतिध्रुवम् ॥ १ ॥ ॥ अथचंद्रमध्येगुरुफलम् ॥ ॥ धर्मवित्तसुखानिस्युर्वसनाभरणादिकम् ॥ विजयोराजसन्मानोविधोरंतर्गतेगुरौ ॥ १ ॥ ॥ अथचंद्रमध्येशुक्रफलम् ॥ ॥ बंधुनाशःस्थानभ्रंशःशत्रुर्बाहुभयंतथा ॥ नकुत्रापिसुखंराहौविधोरंतर्गतेसति ॥ १ ॥ ॥ अथचंद्रमध्येशुक्रफलम् ॥ ॥ कन्याजन्मसुखप्राप्तिःस्त्रीसंगोविजयःसुखम् ॥ मुक्ताहेममणिप्राप्तिश्चंद्रस्यांतर्गतेसिते ॥ १ ॥ ॥ अथचंद्रमध्येरविफलम् ॥ ॥ भूपाश्रयसुखंराज्यंरिपुरोगक्षयोभवेत् ॥ ऐश्वर्यसौख्यमतुलंचंद्रस्यांतर्गतेरवौ ॥ १ ॥ ॥ इतिचंद्रमहादशान्तर्दशासंपूर्णा ॥ ॥ अथभौममहादशाफलंलिख्यते ॥ ॥ शस्त्राभिघातवधबंधनरेन्द्रपीडाचिंताग्रहोविकलरुक्चगृहाश्रमेषु ॥ चौराग्निभीतिधननाशयशःप्रणाशंकुर्याद्विघातभयमत्रदशाकुजस्य ॥ १ ॥ ॥ तत्रप्रथमं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भौममध्येभौमांतर्दशाफलम् ॥ ॥ भौमेशत्रुविमर्दःस्यात्कलहोबंधुभिर्नृणाम् ॥ स्वांतरेबहुपीडास्याद्वृद्धस्त्रीगणिकारतिः ॥ १ ॥ ॥ अथ
भौममध्येबुधफलम् ॥ ॥ भूपाग्निनृपचौरेभ्योभयंपीडाज्वरादिभिः ॥ भूमिजांतर्गतेसौम्येकलहोदुर्जनादिभिः ॥ १ ॥ ॥ अथभौममध्ये
शनिफलम् ॥ ॥ महादुःखानिजायंतेजलभीतिमतिर्नृणाम् ॥ भौमस्यांतर्गतेमंदेराजपीडाभयंनृणाम् ॥ १ ॥ ॥ अथभौममध्येगुरुफलम् ॥
॥ पुण्यतीर्थादिगमनंदेवब्राह्मणपूजनम् ॥ भौमस्यांतर्गतेजीवेलभेतावित्तमुत्कटम् ॥ १ ॥ ॥ अथभौममध्येराहुफलम् ॥ ॥ शस्त्राग्निनृपचौरा
णांभीतिर्मृत्युर्नृपाद्भयम् ॥ भौमस्यांतर्गतेराहौमनोदुःखंप्रवर्तते ॥ १ ॥ ॥ अथभौममध्येशुक्रफलम् ॥ ॥ शत्रुभीतिर्महाक्लेशोधर्महानिःसु
खंव्ययः ॥ भौमस्यांतर्गतेशुक्रेभयंभूत्वास्वबंधनम् ॥ १ ॥ ॥ अथभौममध्येरविफलम् ॥ ॥ सम्मतोनृपतेर्भूरिप्रचंडैःसहसंगतिः ॥ मंगलां
तर्गतेभानौभवेत्कुस्त्रीसमागमः ॥ १ ॥ ॥ अथभौममध्येचंद्रफलम् ॥ ॥ बहुवित्तंसुहृत्सौख्यंमुक्ताहेममणिश्रियम् ॥ भौमस्यांतर्गतेचंद्रेप्रा
प्नोतिपरमंपदम् ॥ १ ॥ ॥ इतिभौममहादशासमाप्ता ॥ ॥ अथबुधदशाफलंलिख्यते ॥ ॥ प्राप्नोतिसौम्यस्यदशाविवेकेशुभेशुभानिप्रियमित्रसं
गम् ॥ सुवर्णहेमांबरपूर्णलाभंविद्यार्थलाभंमनसःप्रमोदम् ॥ १ ॥ ॥ अथबुधमध्येबुधांतर्दशाफलम् ॥ ॥ स्वदशांतर्गतेसौम्येबुद्धिवृद्धिःसमागमः॥
शरीरेयुवतिःसौख्यंनानावित्तंसुखंयशः ॥ १ ॥ ॥ अथबुधमध्येशनिफलम् ॥ ॥ मित्रार्थसाधकःसिद्धोगुणधर्मार्थसाधकः ॥ सर्वकार्योद्यमीभा
स्वान्बुधस्यांतर्गतेशनौ ॥ १ ॥ ॥ अथबुधमध्येगुरुफलम् ॥ ॥ रिपुरोगभयैस्त्यक्तोधर्मज्ञोनृपवल्लभः ॥ हेमादिजनरंभाद्योबुधस्यांतर्गतेगुरौ
अथबुधमध्येराहुफलम् ॥ ॥ अकस्माद्बंधुभेदोवाप्यकस्माद्व्रजतोनृपात् ॥ भयंवाअर्थनाशोवाराहौसौम्यांतरेसति ॥ १ ॥ ॥ अथबुधमध्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुक्रफलम् ॥ ॥ गुरुदेवद्विजार्चासुदानधर्मपरोभवेत् ॥ वस्त्रालङ्काररक्तस्यलाभोज्ञस्यातरेसिते ॥ १ ॥ ॥ अथबुधमध्येरविफलम् ॥ ॥ सुवर्णहयमाणिक्यंविजयंलभतेसुखम् ॥ राज्यंश्रियंबलंतेजोबुधस्यातर्गतेरवौ ॥ १ ॥ ॥ अथबुधमध्येचंद्रफलम् ॥ ॥ अचारवान्बहुधनोगजाश्वादिसुखाप्तयः ॥ बुधस्यातर्गतेचन्द्रेपर्यंकच्छत्रसंपदः ॥ १ ॥ ॥ अथबुधमध्येभौमफलम् ॥ ॥ शिरोगुदरुजापीडावन्हिचौरनृपाद्भयम् ॥ बुधस्यांतर्गतेभौमेबंधुपुत्रादिपीडनम् ॥ १ ॥ ॥ इतिबुधदशासमाप्ता ॥ ॥ अथशनिमहादशाफलम् ॥ ॥ प्राप्नोतिसौरस्यदशाविपाकेदुर्गादिसीमागिरिरक्षणंच ॥ सुधान्यजीर्णांबरभूमिलाभंसंयुज्यतेश्वैर्महिषादिभिश्च ॥ १ ॥ ॥ अथशनिमध्येशनेरंतर्दशाफलम् ॥ ॥ बंधुदारसुतार्थानांनाशोवापीडनंभवेत् ॥ विदेशगमनंदुःखंसौरेस्वांतरसंस्थिते ॥ १ ॥ ॥ अथशनिमध्येगुरुफलम् ॥ ॥ देवद्विजार्चनंसौख्यंधनवृद्धिर्गुणोदयः ॥ स्थानाप्तिःकामनाप्तिश्चशनेरंतर्गतेगुरौ ॥ २ ॥ ॥ अथशनिमध्येराहुफलम् ॥ ॥ वातरोगःकुक्षिपीडादेशांतरगतिर्भवेत् ॥ बुधद्वेषसुखाभावोराहौशनिदशांगते ॥ १ ॥ ॥ अथशनिमध्येशुक्रफलम् ॥ ॥ बंधुमित्रकलत्रार्थःसुखसंपत्समागमः ॥ सौहार्दंनृपतेर्लक्ष्मीःशनेरंतर्गतेसिते ॥ १ ॥ ॥ अथशनिमध्येरविफलम् ॥ ॥ दारासुतधनार्थानांभीतिर्जीवितसंक्षयः ॥ शनेरंतर्गतेभानौ सर्वत्राशुभदर्शनम् ॥ १ ॥ ॥ शनिमध्येचंद्रफलम् ॥ ॥ स्त्रीलाभंविजयंसौख्यंमहिषीगोधनादिकम् ॥ लभतेकन्यकाजन्मशनेरंतर्गतेविधौ ॥ १ ॥ ॥ अथशनिमध्येभौमफलम् ॥ ॥ बंधुस्त्रीसुतनाशोवाविद्युत्पातभवंभयम् ॥ महाव्याधिररिष्टंवाशनेरंतर्गतेकुजे ॥ १ ॥ ॥ अथशनिमध्येबुधफलम् ॥ ॥ सौख्यंसौभाग्यमारोग्यंयशःसंतोषवृद्धयः ॥ सुहृत्स्थानादिलाभःस्याच्छनेरंतर्गतेबुधे ॥ १ ॥ ॥ इतिशनिद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शासमाप्ता ॥ ॥ अथगुरुदशालिख्यते ॥ ॥ गुरोर्दशायालभतेतिसौख्यंगुणोदयंबुद्ध्यवबोधनाग्रम् ॥ स्त्रीवित्तलाभंद्युतिकातिभोगान्महात्म
चेष्टाफलमुत्तमायाम् ॥ १ ॥ ॥ अथगुरुमध्येगुरुफलम् ॥ ॥ स्वदशातर्गतेजीवेधर्मार्थहयलब्धयः ॥ लाभोहेमस्थावराणांराजपूजागुणोदयः
॥ १ ॥ ॥ अथगुरुमध्येराहुफलम् ॥ ॥ अंत्यजैःसहसंप्रीतिर्वातपित्तभयापहम् ॥ गुरोरंतर्गतेराहौसर्वकार्यविनाशनम् ॥ १ ॥ ॥ अथगुरुम
ध्येशुक्रफलम् ॥ रिपुभीतिर्वित्तनाशोबंधनंकलहोगदः ॥ स्त्रीवियोगमवाप्नोतिजीवस्यांतर्गतेसिते ॥ १ ॥ ॥ अथगुरुमध्येरविफलम् ॥ ॥
नृपतुल्यक्रियायुक्तोव्याधिरोगविवर्जितः ॥ बहुस्त्रीसुखसंतोषोगुरोरंतर्गतेरवौ ॥ १ ॥ ॥ अथगुरुमध्येचन्द्रफलम् ॥ ॥ शत्रुहानिःसुखंपुण्यं
शरीरेपुष्टिरुत्तमा ॥ स्वजनैःसहसंवासोगुरोरंतर्गतेविधौ ॥ १ ॥ ॥ अथगुरुमध्येभौमफलम् ॥ ॥ धनंकीर्तिःशत्रुहानिर्बंधुकीर्तिःसुखान्वितः ॥
निरोगीसुभगःश्रीमान्गुरोरंतर्गतेकुजे ॥ १ ॥ ॥ अथगुरुमध्येबुधफलम् ॥ ॥ सुखदुःखसमःश्रीमान्गुरुदेवाग्निपूजकः ॥ गुरोरंतर्गतेसौम्ये
शत्रुर्मित्रसमोभवेत् ॥ १ ॥ ॥ अथगुरुमध्येशनिफलम् ॥ ॥ वारस्त्रीसंगमंदुःखंकुवृत्तिर्धर्मनाशनम् ॥ कामलोभौनीचसख्यंगुरोरंतर्गतेशनौ
॥ १ ॥ ॥ इतिगुरुदशासमाप्ता ॥ ॥ अथराहुफलंलिख्यते ॥ तत्रप्रथमंमहादशाफलम् ॥ ॥ धर्मव्ययोकामरतिर्विनाशःस्त्रीपुत्रमित्रादि
विदेशयानम् ॥ मतिभ्रमंकालिमकुष्ठरोगभयंभवेद्राहुदशागमेनसत् ॥ १ ॥ ॥ अथराहुमध्येराहुफलम् ॥ ॥ भयंस्वांतर्गतेराहौरोगार्तःपापपी
डितः ॥ स्त्रीपुत्रमित्रनाशोवाकलहोवास्वबंधुभिः ॥ १ ॥ ॥ अथराहुमध्येशुक्रफलम् ॥ ॥ सौहार्द्धंविप्रभूपाभ्यांसंगस्त्रीवित्तसंचयः ॥ कलहे
विजयख्यातोराहोरंतर्गतेसिते ॥ १ ॥ ॥ अथराहुमध्येरविफलम् ॥ ॥ रिपुरोगभयंघोरंद्रव्यनाशोमहद्भयम् ॥ अग्निचोरभयंचैवराहोरंतर्ग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेरवौ ॥ १ ॥ ॥ अथराहुमध्येचन्द्रफलम् ॥ ॥ रिपुर्व्याधिर्महाभीतिर्बंधुवित्तविनाशनम् ॥ कलहोबंधुविद्वेषोराहोरंतर्गतेविधौ ॥ १ ॥
॥ ॥ अथराहुमध्येभौमफलम् ॥ ॥ विषशस्त्राग्निचौरेभ्योमहाभीतिःपुनःपुनः ॥ राहोरंतर्गतेभौमेवित्तस्त्रीबंधुनाशनम् ॥ १ ॥ ॥ अथराहु
मध्येबुधफलम् ॥ ॥ बंधुमित्रकलत्रादिवित्तमित्रसुखान्वितः ॥ नकुत्रापिभयंतस्यराहोरंतर्गतेबुधे ॥ १ ॥ ॥ अथराहुमध्येशनिफलम् ॥
॥ वातपित्तभवारोगाःकलहोबांधवैःसह ॥ देशत्यागोधनभ्रंशोराहोरंतर्गतेशनौ ॥ १ ॥ ॥ अथराहुमध्येगुरुफलम् ॥ ॥ नीरोगैःस्वगणैर्युक्तो
देवद्विजरतोभवेत् ॥ राहोरंतर्गतेजीवेधर्मतीर्थरतोभवेत् ॥ ॥ इतिराहुमहादशासमाप्ता ॥ ॥ अथशुक्रदशाफलंलिख्यते ॥ ॥ शौर्यगी
तिरतिप्रमोदविभवोद्रव्यान्नपानांबुदः ॥ स्त्रीरत्नंमतिमन्महोपकरणैरर्थाश्चनानाविधाः ॥ स्वाध्यायौषधमंत्रशिल्पकरणैरर्थस्यसिद्धिर्भवेत्सौख्यंचक्षुविका
रभोजनरुचिख्यातिःप्रतापोन्नतिः ॥ १ ॥ ॥ अथशुक्रमध्येशुक्रांतर्दशाफलम् ॥ ॥ लाभःस्वांतरगेशुक्रेस्त्रीसंगोधर्मजंसुखम् ॥ अभिला
षार्थयुक्तश्चकीर्तिकौशल्ययुग्भवेत् ॥ १ ॥ ॥ अथशुक्रमध्येरविफलम् ॥ ॥ नेत्रगंडभवैरोगैःपीड्यतेनृपबांधवैः ॥ उत्पातश्चमहादुःखं
शुक्रस्यांतर्गतेरवौ ॥ १ ॥ ॥ अथशुक्रमध्येचन्द्रफलम् ॥ ॥ उद्वेगोकुशलंहानिरश्वादीनांधनक्षयः ॥ बहुक्लेशमनादुःखंशुक्रस्यांतर्गतेविधौ ॥
॥ १ ॥ ॥ अथशुक्रमध्येभौमफलम् ॥ ॥ नखोदरशिरोव्याधिकलहीःबंधुसंक्षयः ॥ दौर्बल्यंचशरीरस्यकुजेशुक्रदशांगते ॥
॥ १ ॥ ॥ अथशुक्रमध्येबुधफलम् ॥ ॥ धनंधान्यंसुखंलाभोमानोधर्मोयशःसुखम् ॥ महाजनेनसौहार्दंशुक्रस्यातर्गतेबुधे ॥ १ ॥
॥ अथशुक्रमध्येशनिफलम् ॥ ॥ वृद्धस्त्रीगमनंपीडापुत्रनाशोविपत्पदम् ॥ शत्रुनाशःसुहृत्प्राप्तिःसौरेशुक्रदशांगते ॥ १ ॥ ॥ अथशुक्रम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्येगुरुफलम् ॥ धनधान्यसमृद्धिश्चधर्मशीलसुखानिच ॥ स्त्रीसुखंकीर्तिमाप्नोतिगुरौशुक्रदशागते ॥ १ ॥ ॥ अथशुक्रमध्येराहुफलम् ॥ ॥ विदेशगमनंबंधुद्वेषःसंगमशुद्धयः ॥ स्ववंशनाशमाप्नोति राहौशुक्रदशागते ॥ १ ॥ ॥ इतिशुक्रमहादशासंपूर्णा ॥ ॥ क्रूरग्रहदशायाचशुक्रस्यांतर्दशायदि ॥ शत्रुयोगेभवेन्मृत्युर्मित्रयोगेनसंशयः ॥ १ ॥ मंगलस्यदशायांचशनेरंतर्दशायदि ॥ म्रियतेचचिरंजीवीकाकथास्वल्पजीविनः ॥ २ ॥ क्रूरराशिस्थितःपापःषष्ठेवानिधनेपिवा ॥ सितेनरविणादृष्टःस्वपाकेमृत्युदोग्रहः ॥ ३ ॥ लग्नस्याधिपतेःशत्रुर्लग्नस्यांतर्दशांगतः ॥ करोत्यकस्मान्मरणंसत्याचार्येणभाषितम् ॥ ४ ॥ प्रवेशेबलवान्खेटःशुभैर्वासन्निरीक्षितः ॥ सौम्याधिमित्रवर्गस्थोरिष्टभंगोभवेत्तदा ॥ ५ ॥ ॥ इतिअष्टोत्तरीदशासमाप्ता ॥ ॥ अथउपदशाफलंलिख्यते ॥ ॥ अथातःसंप्रवक्ष्यामिग्रहस्योपदशाफलम् ॥ सौम्यक्रूरविभिन्नस्यदिनचर्यादिसंमतम् ॥ १ ॥ ज्वरःशिरोर्तिपीडाचकलिरुद्वेगकारकः ॥ विग्रहश्चविवादश्चसूर्येस्वोपदशागते ॥ २ ॥ धननाशोदरेरोगंकुर्यात्पामांचतुष्पदात् ॥ क्षीरंस्नेहंविनाभुंक्तेचंद्रःस्वोपदशांगतः ॥ ३ ॥ राज्ञोभयंविकारश्चोपद्रवंरिपुविग्रहः ॥ कुधान्यभोजनंसूर्येभौमस्योपदशाफलम् ॥ ४ ॥ वातश्लेष्मंशत्रुभयंतीक्ष्णंक्षीरंकुभोजनम् ॥ राजपीडाधनेहानिःसूर्येद्युपदशांगते ॥ ५ ॥ हेमांबरजयैर्वृद्धिःशत्रुनाशंमहत्सुखम् ॥ मिष्टान्नभोजनंसूर्येशनेरुपदशायदि ॥ ६ ॥ नृपपूजाधनंकीर्तिर्विद्याबंधुसमागमः ॥ भोजनंमधुरान्नस्यरवौज्ञोपदशागते ॥ ७ ॥ दैन्यंपरान्नभोजीस्याद्राजपीडामहद्भयम् ॥ शत्रुद्वेषोपदशायांचरतेकेतूरवेर्यदि ॥ ८ ॥ सुखवृद्धिसमानानिधनलाभोमहोत्सवम् ॥ स्त्रीविलासाःसदासौख्यरवेःसितदशागतः ॥ ९ ॥ ॥ इतिरव्युपदशाफलम् ॥ ॥ धनलाभोमहासौख्यंस्त्रीलीलापुत्रसंपदः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वस्त्रान्नपानलाभश्चोपदशासुयशःशशी ॥ १ ॥ वृद्धिर्धनागमोबुद्धिबंधुस्वजनसौहृदः ॥ रक्तवस्तुकृतोलाभश्चंद्रस्योपदशांकुजः ॥ २ ॥ राजमानो
सहासौख्यंभूतिकल्याणवर्द्धनम् ॥ चंद्रस्योपदशाप्राप्तोराहुःशत्रुभयावहः ॥ ३ ॥ धनधर्मोमहत्तेजामित्रलाभःसुभोजनम् ॥ सौख्यंचवस्त्रलाभंचचं
द्रस्योपगतोगुरुः ॥ ४ ॥ पुत्रबंधुकृतोद्वेगमुक्तःस्वस्थानवर्जितः ॥ चंद्रस्योपगतेसौरेतुषधान्यादिभोजनम् ॥ ५ ॥ शुक्लवस्त्रस्त्रियांलाभोमांगल्यंपुत्रसं
पदः ॥ हयभूलाभदश्चैवचंद्रस्योपगतोबुधः ॥ ६ ॥ विरोधःसर्वधर्माणांजीवितंबहुसंशयम् ॥ सर्पांबुविषजाभीतिःशिखीचोपदशांगतः ॥ ७ ॥
जलोदरादिरोगैस्तुरिपुचौरैर्धनक्षयः अक्षीरंभोजनंरूक्षमिंदोरुपगतेसिते ॥ ८ ॥ विजयंधनसौख्यंचवस्त्रान्नपानलाभकृत् ॥ चंद्रस्योपदशांभानुःकुरुते
नात्रसंशयः ॥ ९ ॥ ॥ इतिचंद्रस्योपदशाफलम् ॥ ॥ बिद्याबुद्धिर्धनप्राप्तिःस्वर्णरूप्यंचमाणकम् ॥ लभतेधान्यरत्नानिबुधस्योपदशास्वय
म् ॥ ॥ १ ॥ रक्तपित्तकृतापीडाकुख्यातोदरपीडनम् ॥ वस्त्रार्थशस्त्रहानिश्चसौम्यस्योपदंशाशिखी ॥ २ ॥ सौम्यादिक्षुभवेल्लाभःपरप्राप्तिर्मह
त्सुखम् ॥ भुंक्तेमिष्टान्नमाहारंसौम्यस्योपदशांसितः ॥ ३ ॥ तेजोहानिःशिरःपीडाचोद्वेगश्चलाचित्तकः ॥ दृष्टिदोषोभवेच्छर्दीसौम्यस्योपदशांरविः
॥ ४ ॥ श्रियोलाभस्तथाकन्यासौम्यार्थपुत्रपौत्रकः ॥ मिष्टान्नभोजवस्त्राणिबुधस्योपदशांगतः ॥ ५ ॥ आममृत्युश्चातिसारंचौराग्निशस्त्रपीड
नम् ॥ ज्ञानधर्मधनप्राप्तिःसौम्यस्योपदशांकुजः ॥ ६ ॥ राजशत्रुभयंत्रासोकलहःस्त्रीनिरुत्सहा ॥ स्नेहक्षीरंविनाभुक्तंबुधस्योपदशांतमः ॥
॥ ७ ॥ प्रधानपुरुषंराज्यंविद्याबुद्धिविवर्द्धनम् ॥ अन्नपानादिसौख्यंचबुधस्योपदशांगुरुः ॥ ८ ॥ विकलंघातपातानांवातपीडामहद्भयम् ॥
अन्नपानादिहानिश्चबुधस्योपदशाफलम् ॥ ९ ॥ ॥ इतिबुधोपदशाफलम् ॥ ॥ अथशुक्रोपदशालिख्यते ॥ ॥ माणिक्यसुंदरीप्राप्तिर्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्वाज्यपयभोजनम् ॥ श्वेतवस्त्रस्यसंप्राप्तिरूपदशास्थोस्वयंभृगुः ॥ १ ॥ राजशत्रुज्वरापीडाहृदिजंघाशिरोव्यथा ॥ स्वल्पासनश्चलाभश्चशुक्रस्योप
दशांरविः ॥ २ ॥ राज्याधिकप्रदोराज्येलभतेवस्त्रकांचनम् ॥ कन्याजन्मफलप्राप्तिःशुक्रस्योपदशांशशी ॥ ३ ॥ अलाभंताडनंकेशोरक्तपित्तप्र
पीडनम् ॥ अन्नपानादिसौख्यंचशुक्रस्योपदशांकुजः ॥ ४ ॥ राजशत्रुभवापीडास्त्रीशत्रुकलहोभवेत् ॥ भोजनेकटुकक्षारंसितस्योपदशांतमः ॥
॥ ५ ॥ वज्रमुक्तपदप्राप्तिर्गजाश्वादिगवांलभेत् ॥ कर्पूरमिष्टमाहारंशुक्रस्योपदशांगुरुः ॥ ६ ॥ गवुष्ट्रखरलोहादिलभतेस्वल्पलाभकृत ॥ भोजनं
तिलमाषाश्चशुक्रस्योपदशांशनिः ॥ ७ ॥ बुद्धिर्विज्ञानराज्यश्रीनिध्यधिकारलाभकृत् ॥ भोजनंहवितक्राभ्यांशुक्रस्योपदशांबुधः ॥ ८ ॥ भ्रम
णन्देशग्रामाणांरोगमृत्युमहद्भयम् ॥ लभतेद्रव्यधान्यादिशुक्रस्योपदशांशिखी ॥ ९ ॥ इतिशुक्रोपदशा ॥ ॥ अथराहूपदशा ॥ बंधव्याधिस्त
थारोगःपीडाभवतिदारुणा ॥ स्थानच्युतिःकुभोज्यंचराहुःस्वोपदशांगतः ॥ १ ॥ ज्ञानधर्मार्थनाशश्चकलहंव्यसनंभवेत् ॥ कटुकंमिष्टभ्योज्यंच
राहोरुपदशांगुरुः ॥ २ ॥ लंघनंगृहभंगश्चहस्तपादाक्षिपीडनम् ॥ बंधनंबहुजीवश्चराहोरुपगतेशनौ ॥ ३ ॥ धनवस्त्रादिहानिश्चपदबुद्ध्योर्वि
नाशकृत् ॥ भोजनंफलशाखादिराहोरुपदशांबुधः ॥ ४ ॥ अर्थनाशोविदेशश्चमृत्युश्चोरनृपाद्भयम् ॥ राहोरुपदशांकेतुर्बंधनंविग्रहोभवेत ॥ ५ ॥
स्त्रीनाशःकुलनाशश्चयोगिनीभूतमातृभिः ॥ पीडनंचकुभोज्यंस्याद्राहोरुपदशांसितः ॥ ६ ॥ सुहृत्पुत्रमहापीडाज्वररोगोन्नहानिकृत् ॥ राहो
रुपदशांसूर्यःकुरुतेनात्रसंशयः ॥ ७ ॥ चित्तभ्रमोमनोभङ्गउद्वेगोथकलिर्भयम् ॥ भोज्यंस्नेहंहविष्यान्नंराहोरुपदशांशशी ॥ ८ ॥ रोगमृत्यूप्रमा
दश्चरक्तपित्तभगन्दरौ ॥ कुभोजनंमानहानीराहोरुपदशङ्कुजः ॥ ९ ॥ ॥ अथजीवोपदशाफलम् ॥ ॥ यशोदयोमहावृद्धिर्धनहेमसमागमः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुखमिष्टान्नभोज्यञ्चगुरुश्चोपदशाङ्गतः ॥ १ ॥ हयभूमिपशुप्राप्तिःसर्वत्रसुखमाप्नुयात् ॥ सुभोज्यबहुधान्यानिजीवस्योपदशाशनिः ॥ २ ॥ विद्या
मौक्तिकशस्त्राणांलाभःसुहृद्वयागमः ॥ अशनंस्नेहपक्वादिजीवस्योपदशांबुधः ॥ ३ ॥ बन्धूनांतस्करादीनाङ्कलितोमृत्युतोभयम् ॥ कुधान्यश
मनंजीवेकेतोरुपदशाङ्गते ॥ ४ ॥ हेमवस्त्रधनप्राप्तिक्षेमवृद्धिर्विभूषणः ॥ भोजनंमधुरंक्षारंजीवस्योपदशांसितः ॥ ५ ॥ मातृपितृधनंभुंक्तेराज
पूज्यश्चजायते ॥ भ्रममष्टादशप्राप्तिर्जीवस्योपदशांखौ ॥ ६ ॥ दधिमधुघृतक्षीरमणिमुक्तेषुलाभदा ॥ जीवस्योपदशांचंद्रेकुक्षीपादप्रपीडनम् ॥
॥ ७ ॥ शस्त्रशत्रुकृतापीडागण्डामन्दाग्न्यजीर्णता ॥ कुधान्यभोजनंभौमोजीवस्योपदशाङ्गतः ॥ ८ ॥ चाण्डालव्याधिशत्रुभ्यःपीडनंवमनंभ
यम् ॥ कटुक्षारंचसंभोज्यंजीवस्योपदशांतमः ॥ ॥ इतिगुरोरुपदशासमाप्ता ॥ ॥ अथशनेरुपदशा ॥ ॥ जलौकादेहपीडाचविदेशगमनं
भवेत् ॥ कुधान्यतिलमश्नातिशनिःस्वोपदशाङ्गतः ॥ १ ॥ धनबुद्धीरिपोःपीडाअन्नपानादिहानिकृत् ॥ स्नेहरसंविनाभुक्तंसौरस्योपदशांबुधः
॥ २ ॥ शत्रुचित्तभयंत्रासोदरिद्रश्चबहुक्षुधि ॥ नीचसंगङ्कभक्षीचसौरस्योपदशांशिखी ॥ ३ ॥ द्यूतवेश्याभवद्द्रव्यंमहिषीकृष्यलोभदः ॥ कन्या
जन्मतदागर्भःसौरस्योपदशांसितः ॥ ४ ॥ राजाधिकारस्तेजस्वीव्याधिःपीडाज्वरोव्यथा ॥ कलत्रकलहंचौरंसौरस्योपदशांरविः ॥ ५ ॥ प्रमा
णबुद्धिप्राधान्यंबहुस्त्रीभोगवान्धनी ॥ हविःक्षीरमधुभोक्तासौरस्योपदशांशशी ॥ ६ ॥ शस्त्रवन्हिरिपोर्भीतिर्वातरक्तोपमानवः ॥ भोजनंमधुस
र्पिभ्यांसौरस्योपदशाङ्कजः ॥ ७ ॥ धनभूमिपशूनाशंकटुतीक्ष्णाम्लभोजनम् ॥ मृत्युर्विदेशगमनंसौरस्योपदशान्तमः ॥ ८ ॥ गृहध्वंसोभवे
त्स्त्रीभिःक्लेशप्रियानिरुद्यमः ॥ किंचित्सौख्यमवाप्नोतिसौरस्योपदशांगुरुः ॥ ९ ॥ ॥ अथमङ्गलस्योपदशा ॥ ॥ पीडाशत्रुनरेंद्राणांरक्तस्रावो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भगन्दरः ॥ अकस्माज्जायतेभौमोउपदशासुस्वयंकुजः ॥ १ ॥ कलहंबन्धनंरोगंराजभङ्गंकुभोजनम् ॥ अपमृत्यूपदशांराहुर्जायतेशत्रुपीडितः
॥ २ ॥ कुबुद्धिर्दूषितोरोगीदेशेदेशेपरिभ्रमः ॥ भौमस्योपदशांजीवेस्वर्णंभवतिमृत्तिका ॥ ३ ॥ रक्तवासमहात्रासोबन्धनंधनपीडनम् ॥
कोद्रवंचतिलंभोज्यंभौमस्योपदशांशनिः ॥ ४ ॥ ज्वरार्तिःसुहृदासीनोविलंबेनधनक्षयः ॥ भौमस्योपदशासौम्यस्त्वन्नवस्त्रादिनाशनः ॥ ५ ॥
जृंभणंचशिरःपीडारोगमृत्युनृपाद्भयम् ॥ तंद्रालस्यंकुभोज्यंचकेतौभूसुतमध्यगे ॥ ६ ॥ राजशत्रुभयंत्रासोवमनातीसारतोभयम् ॥ व्रणाजीर्णा
मयादुःखंभौमस्योपदशांसिते ॥ ७ ॥ भूमेश्चमणिलाभंचधनमित्रसुखावहम् ॥ तीक्ष्णंवैमधुरंभुंक्तेभौमस्योपदशांखौ ॥ ८ ॥ मौक्तिकंशुक्लवस्त्रं
चलभतेचसुखंयशः ॥ क्षीरमिष्टान्नभोजीस्यात्कुजस्योपदशांशशी ॥ ९ ॥ ॥ इतिमङ्गलस्योपदशासंपूर्णा ॥ ॥ अथकेतोरुपदशालिख्यते ॥
॥ धननाशोपघातश्चविदेशेदुःखपूरितम् ॥ सर्वत्रविफलंविंद्यात्केतोरुपदशांशिखी ॥ १ ॥ अर्थंचतुष्पादहानिर्नेत्ररोगशिरोव्यथा ॥ श्लेष्मभीत्य
र्थहानिश्चकेतोरुपदशांभृगुः ॥ २ ॥ मित्रस्वजनजोद्वेगौअल्पमृत्युःपराजयः ॥ भोजनंक्रतुहीनंचकेतोरुपदशांखौ ॥ ३ ॥ अन्नपानादिनाशं
चव्याधितस्यचविभ्रमः ॥ मिष्टान्नभोजनप्राप्तिःकेतोरुपदशांशशी ॥ ४ ॥ वन्हेःशत्रोरणेभीतिर्वातकष्टभयंनृपः ॥ कुधान्यंमत्स्यमा
सानिकेतोरुपदशांकुजः ॥ ५ ॥ शत्रुतोहिभयंस्त्रीणांनीचेभ्योधिकपीडनम् ॥ बुभुक्षितंपराधीनंकेतोरुपदशान्तमः ॥ ६ ॥ विवादन्धनहानि
श्चवस्त्रमंत्रावनाशनम् ॥ केतोरुपदशांजीवोरूक्षधान्यादिभोजनम् ॥ ७ ॥ वस्त्रान्नपानहानिश्चसुखमाश्रमपीडनम् ॥ गोमाहिष्यादिनाशश्चके
तोरुपदशांशनिः ॥ ८ ॥ शत्रुपीडामहोद्वेगोविद्याबन्धुधनक्षयः ॥ केतोरुपदशायांहिकेतुःसौम्यस्यसंशयः ॥ ९ ॥ ॥ इतिकेतुमध्येउप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दशासमाप्ता ॥ ॥ इतिविंशोत्तरीदशायाउपदशाफलम् ॥ ॥ अथसंध्यादशालिख्यते ॥ ॥ संध्यादिनेशस्यविपाककालेधनागमंशौर्य
नरेंद्रसौख्यम् ॥ धर्मोद्यमंसौख्यमतीवतीक्ष्णंभूपादिसौख्यंविभवादिमानम् ॥ १ ॥ प्रचण्डवित्तंस्वकुलाधिकारंसुवर्णताम्राश्वरथादिकाप्तिः ॥
आरोग्यताविद्रुमरत्नलाभंप्राप्नोतिकीर्तिंरिपुसंक्षयञ्च ॥ २ ॥ सूर्यादिसंस्थःफलमेवसंध्यानीचारितस्थोअशुभंफलंच ॥ तदर्थनाशंपितृबन्धहा
निंहृदक्षिपीडाकरपित्तरोगम् ॥ ३ ॥ ॥ इतिरविसंध्या ॥ ॥ निशाकरःसंधिविपाककालेप्राप्नोतिवित्तंद्विजमंत्रिसौख्यम् ॥ स्वविक्रमाच्चस्व
गुणैःसुवर्णसुगन्धद्रव्यादिषुकार्यलाभम् ॥ १ ॥ प्रबोधकल्याणधनावराप्तिःअभीष्टसिद्धिर्धनधर्मलाभम् ॥ सत्साधुसंपर्ककथानुरक्तःकुलाधिमुख्यं
नृपपूजितश्च ॥ २ ॥ नीवारितस्थंकृषिकस्वरूपंमित्रादिहर्त्तादुहितुःप्रसूतिः ॥ अर्थक्षयंशोकरुजादिकष्टंक्रोधोद्भवंविद्रवमृत्युकारी ॥ ३ ॥ ॥
॥ इतिचंद्रसंध्या ॥ ॥ स्वपाचकालेधरणीसुतस्यसंध्यामवाप्नोतिमहाप्रतापम् ॥ चौर्यंहविस्तस्करपापकर्मादोर्दंडतेजोरनुसाहसश्च ॥ १ ॥ नृपे
श्वराःशस्त्रविषाग्निकर्मनेतारःसूर्यानृपकूलधर्मैः ॥ कान्तादिकार्यःसततार्थलाभंहेमाङ्गनाताम्रहिरण्यलाभदा ॥ २ ॥ मतिश्चपूर्वाकटुकेःकषायैरसैः
कुमंत्रैःकुजनेषुशक्तिः ॥ स्वभ्रातृबन्धुःस्वजनार्थनाशन्दाहानुजःशोणितपित्ततेच्छया ॥ ३ ॥ ॥ इतिभौमसंध्या ॥ ॥ बुधस्यसंध्याविद
धातुशश्वद्धनागमंमित्रकलत्रपुत्रैः ॥ वणिक्प्रयोगादिखिलेषुकाव्यैर्महेंद्रजालैःकुहकादिभिश्च ॥ १ ॥ द्यूतप्रयोगाद्विपकर्ममंत्रैर्दैवज्ञसिद्धान्तर
सायकाद्यैः ॥ भूहेमलोहस्वनृपात्मजेभ्योलाभेधनानांसुखसौख्यवृद्धिः ॥ २ ॥ नीचारितस्थोस्तमितस्यसौम्यस्त्रिधातुपीडाकुरुतेर्थनाशम् ॥ कलत्र
हानिर्नृपबन्धनाप्तिंपरस्वदुःखंनृपपीडितश्च ॥ ३ ॥ ॥ इतिबुधसंध्या ॥ ॥ गुरुःस्वसंध्यांलभतेतिसौख्यंहेमांबररत्नगजाश्वजातम् ॥ धनंलभे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्पुत्रसमुच्चयञ्चस्वधर्मसिद्धिर्द्विजदेवपूजा ॥ १ ॥ स्वजनागमञ्चात्रदेवेश्वरत्वंवेश्मप्रवेशस्त्वपिचार्थसिद्धिः ॥ स्वजन्मसन्मानमतिप्रहर्षंभूपालसौ
ख्यंविविधार्थलाभम् ॥ २ ॥ विदेशनिम्नेकृतगोविवर्णैर्गुरुःस्वपाकेसुकृदर्थनाशम् ॥ भूपालभङ्गसुतकष्टरोगङ्करोतिकापेबहुदुःखकारी ॥ ३ ॥ इतिजी
वसंध्या ॥ ॥ दैत्येंद्रपूज्यस्यकरोतिसन्ध्यामहार्थसम्प्राप्तिमहच्चसौख्यम् ॥ नृपेश्वरत्वंस्वकुलाधिकारंप्राप्नोतिवित्तंमणिमौक्तिकानि ॥ १ ॥ गजाश्व
यानासनमानहर्षैःप्रख्यातकर्माक्रयविक्रयाणाम् ॥ धनागमंभूकृषिणामहोक्षैःकलत्रवृद्धिःसुखसौख्यदञ्च ॥ २ ॥ शुक्रेरितेनिम्नगृहेल्पचायेयोधैर्जि
तोवाखलिप्तियुप्तिः ॥ दुष्टाङ्गनासङ्गमसौख्यहर्त्ताधनक्षयंस्त्रीसुतधर्मनाशम् ॥ ३ ॥ ॥ इतिशुक्रसंध्या ॥ ॥ प्राप्नोतितीक्ष्णांशुसुतस्यसंध्याददा
तिलाभंस्वकुलाधिकारम् ॥ खरोष्ट्रगोपाक्षिकधान्यवस्त्रकुलित्थमाषादिककोद्रवाप्तिः ॥ १ ॥ वृन्देश्वरंग्रामपदाधिपत्यङ्कुलोन्नतिंहीनजनप्रमाणम् ॥
लोहायसीसत्रपुसन्महिष्यैर्धनागमंमृत्युचतुष्पदाच्च ॥ २ ॥ नीचारितत्स्थोस्तमितोदितस्यसौरस्यपाकेकुरुतेचकष्टम् ॥ सद्बन्धुभार्यात्मजअर्थ
नाशन्देहेरुजातीव्रतरानिलोत्था ॥ ३ ॥ ॥ इतिशनिसंध्या ॥ ॥ उक्तःपुराद्वादशभिःप्रकारैर्नैसर्गिकादीनिदशान्तराणि ॥ तत्रापिसंध्या
फलपाकउक्तःसचिन्तनीयोदृशःफलानि ॥ १ ॥ ॥ अथपाचकफलम् ॥ ॥ राजमानंसुखंचैवसन्मानंशत्रुनाशनम् ॥ लभतेसौख्यलाभ
ञ्चरविमध्येस्वयंरविः ॥ १ ॥ ॥ इतिरविमध्येरविफलम् ॥ ॥ रोगादिनाशंधनधान्यलाभंशत्रुक्षयंप्रीतिसुखोदयञ्च ॥ सूर्यस्यचन्द्रान्तरसंधिपाके
तत्रास्तभाद्वित्रिशुभंकरोति ॥ १ ॥ ॥ इतिचन्द्रः ॥ ॥ दिवाकरस्यान्तरगोकुजश्चलाभोभयंविक्रमहेमताम्रम् ॥ संग्रामधुर्याजयवाहनानिप्र
चण्डतांभूपसुखंकरोति ॥ १ ॥ इतिभौमः ॥ ॥ देहेचकष्टंज्वररोगदौस्थ्यंकरोतिशोकःक्षयशत्रुवैरम् ॥ अर्थक्षयंरोगरुजाप्रवासंबुधोविपाके

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिवसेश्वरस्य ॥ १ ॥ ॥ इतिबुधः ॥ ॥ पापादिरोगाव्यसनादिमुक्तिर्धर्मौस्वयंज्ञानसुखागमंच ॥ सूर्यःसुरेज्यान्तरगोविपाकेकरोतिलक्ष्मीं धनवर्धनंच ॥ १ ॥ ॥ इतिगुरुः ॥ ॥ दिद्रंशिरोगाङ्गलरोगदोषाञ्छूलंज्वरंवासुहृदःस्वहर्ता ॥ शस्त्राद्भयंकरस्यसंस्यामृच्छ्रेयोदैत्यगुरुःक रोति ॥ १ ॥ ॥ इतिशुक्रः ॥ ॥ कार्यार्थनाशंक्षितिपालभङ्गन्देहोरुजापित्तसमुद्भवंच ॥ विद्युद्भयंबुद्धिविनाशदैन्यंसंध्यातुसौरेर्दिवसेश्वरस्य ॥ १ ॥ ॥ इतिशनिः ॥ ॥ अथचन्द्रमध्येपाचकफलम् ॥ ॥ मणिमुक्ताफलंचैवसौख्यानिविविधानिच ॥ वस्त्रप्राप्तिःसुखप्राप्तिःस्वपाके तुगतेशशी ॥ १ ॥ ॥ इतिचन्द्रमध्येचन्द्रफलम् ॥ ॥ रक्तवस्तुभवेल्लाभोविदेशगमनंभवेत ॥ सुखसन्तानमाप्नोतिचन्द्रेभौमस्यपाचके ॥ ॥ १ ॥ ॥ इतिभौमः ॥ ॥ दुःखंसुखसमंचैवलाभहानीतथैवच ॥ उद्वेगवशगोनित्यंचन्द्रस्यान्तर्गतेबुधः ॥ १ ॥ ॥ इतिबुधः ॥ ॥ स्वर्णलाभंपुत्रजन्मह्यानन्दंहर्षसंयुतम् ॥ मणिर्मुक्ताफलंचैवचंद्रस्यान्तर्गतेगुरौ ॥ १ ॥ ॥ इतिशुक्रः वेश्यागमनङ्करोत्येवविवादंस्त्रीसमागमः॥ अकस्माद्धनलाभश्चचन्द्रमध्येशनिर्यदा ॥ १ ॥ ॥ इतिशनिः ॥ ॥ मणिविद्रुमलाभंचसर्वसौख्यसुखागमम् ॥ प्रतापंगंधसंयुक्तंकर्पूरादि शशीरवेः ॥ १ ॥ ॥ इतिरविः ॥ ॥ अथभौममध्येपाचकफलंलिख्यते ॥ ॥ फलंमानंसुखंचैवधनलाभंसुखागमम् ॥ लभतेमानवोनि त्यंभौममध्येबुधोयदा ॥ १ ॥ ॥ इतिबुधः ॥ ॥ सौभाग्यसौख्यमतुलंनानाशत्रुविमर्दनम् ॥ लभतेसुखसौभाग्यंभौममध्येगुरुर्यदा ॥ १ ॥ इतिगुरुः ॥ ॥ स्वदेहपीडांधनमानहानिंमहत्प्रतापंसुखवर्जितंच ॥ ददातिभौमातरगोभृगुश्चधर्मार्थसिद्धिंविजयंतथैव ॥ १ ॥ ॥ इतिशुक्रः ॥ स्वदेहभंगंकुरुतेशनौकुजोविपाककालेसुखवर्जितंच ॥ धनागमंह्यर्थविनाशनंचसेवाभवेन्नीचजनप्रतापे ॥ १ ॥ इतिशनिः ॥ ॥ सूर्योरोगविना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शंचश्वेतवस्तुफलप्रदम् ॥ सन्मानंचैवभूपालंसर्वसौख्यधनागमम् ॥ १ ॥ ॥ इतिरविः ॥ ॥ ददातिहेमाम्बरसौख्यलाभन्धनन्तथाभोगसुखंचसन्त
तिम् ॥ मित्रागमंभ्रातृपितृश्चभक्तिर्ददातिचन्द्रान्तरगःकुजश्च ॥ १ ॥ ॥ इतिचन्द्रः ॥ ॥ अथबुधपाचकफलंलिख्यते ॥ ॥ स्वबोधबुद्धिदंचैव
शत्रूणांचक्षयंकरम् ॥ द्रव्यलाभंधनंसौख्यंस्वपाकेबुधगेसदा ॥ १ ॥ ॥ इतिबुधमध्येबुधः ॥ ॥ हेमांबरेभवेल्लब्धिर्विदेशगमनंभवेत् ॥ बुधस्यांतर्ग
तेजीवेधनधान्यसुखंभवेत् ॥ १ ॥ ॥ इतिगुरुः ॥ बुधमध्येयदाशुक्रोभवत्येवसुखागमः ॥ धनधान्यसमृद्धंस्याद्बहुसौख्यङ्करोतिच ॥ इतिशुक्रः ॥
बुधसंध्यातुमध्येस्यात्सौरपाकोयदाभवेत् ॥ तदाराजाभवेन्मानसुखसन्तानकारकः ॥ १ ॥ इतिशनिः ॥ वातपित्तकृतापीडाहानिकारीनरोभवेत् ॥
पाककालेबुधस्यापियदाअन्तरतोरविः ॥ १ ॥ ॥ इतिरविः ॥ ॥ देहपीडाचउद्वेगंकलहश्चगृहेभवेत् ॥ अत्यन्तहानिकारीचबुधमध्येतुचं
द्रमाः ॥ १ ॥ ॥ इतिचंद्रः ॥ ॥ अग्निदाहंज्वरंतीव्रंभवेद्रक्तविकारकम् ॥ शत्रुघातरुजंचैवबुधमध्येकुजेसदा ॥ १ ॥ ॥ इतिभौमः ॥
॥ अथजीवसंध्यामध्येग्रहाणांपाचकफलम् ॥ ॥ पापैश्चरोगैश्चभवेद्विमुक्तोधर्मोजयंप्राप्यसमस्तकाले ॥ जीवःस्वपाकेफलमातनोतिधनागमं
मित्रकलत्रपुत्रैः ॥ १ ॥ इतिगुरुमध्येगुरुः ॥ ॥ कार्यार्थनाशंचमहाविरोधंविशेषमाप्नोतिनरोतिसौख्यम् ॥ शृंगारकोशस्यनरैश्चसौख्यंयदाभवे
जीवगतोभृगुश्च ॥ १ ॥ ॥ इतिशुक्रः ॥ ॥ शनैश्चरेपाकगतेथजीवेदानङ्करोत्येवहिसर्वसौख्यम् ॥ द्रव्यापहारंव्यसनादियुक्तंज्वराविघातं
व्यसनेचसक्तिम् ॥ १ ॥ ॥ इतिशनिः ॥ ॥ संध्यागुरोःपाकरविःस्वकालेधनागमंमित्रकलत्रकंच ॥ चिरंवसेद्देशविदेशलाभंमहत्प्रतापंविजयं
चसौख्यम् ॥ १ ॥ ॥ इतिरविः ॥ ॥ तीर्थागमेभवेत्सौख्यंपुत्रमित्रसमागमम् ॥ धनलाभोभवेच्चैवगुरुपाकेशशीयदा ॥ १ ॥ इतिचंद्रः ॥

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अग्निचोरभयंनास्तिधनप्राप्तिःपदेपदे ॥ राजमानंगृहेसौख्यंजीवमध्येकुजेगतिः ॥ १ ॥ ॥ इतिभौमः ॥ ॥ जीवान्तरगतेसौम्येपुत्रधान्यंगृहेसुखम् ॥ माङ्गल्यंचभवेन्नित्यंवस्त्रप्राप्तंसुखंभवेत् ॥ १ ॥ ॥ इतिबुधः ॥ ॥ अथशुक्रसंध्यामध्येग्रहाणांपाचकफलंलिख्यते ॥ ॥ स्वपाककालेभृगुनंदनोपिहेमांबरंसौख्यंददातिनित्यम् ॥ वस्त्रादिप्राप्तिंचसुखागमंचधनंलभेत्पुत्रसमन्वितंच ॥ १ ॥ ॥ इतिशुक्रमध्येशुक्रः ॥ ॥ राज्याभिमानंसुखसंपदंचपरोपकारीव्ययमाप्नुवंति ॥ मित्रादितोव्ययव्यसनैःसमेतंमांगल्यकार्यंचसुखावहंच ॥ १ ॥ ॥ इतिशनिः ॥ ॥ कार्यनाशंगृहेसौख्यंभुंजंतिप्रभवःसदाः ॥ विपाकेसूर्यशुक्रेचमानवोलभतेफलम् ॥ १ ॥ ॥ इतिरविः ॥ ॥ ददातिवित्तंबहुसौख्ययुक्तंवस्त्रांबरंरत्नसमुच्चयंच ॥ सौख्यार्थलाभंस्वगृहेचसौख्यंयदाभवेच्छत्रुगतोहिमांशुः ॥ १ ॥ ॥ इतिचंद्रः ॥ ॥ भृगोर्विपाकेधरणीसुतोपिकार्यार्थलाभंबहुअर्थयुक्तम् ॥ महत्प्रतापंसुखसंगमंचददातिप्राप्नोतिभयंकुतश्च ॥ १ ॥ ॥ इतिभौमः ॥ ॥ ददातिमौक्तिकंचैवसुखसौभाग्यपुत्रदम् ॥ कन्याजन्मगृहेसौख्यंभृगुमध्येगतेबुधे ॥ १ ॥ ॥ इतिबुधः ॥ ॥ सुखंकरोतिसौभाग्यंव्यवहारेमहत्सुखम् ॥ लाभंकार्यस्यसिद्धिःस्वाच्छुक्रमध्येगतेगुरौ ॥ १ ॥ ॥ इतिशुक्रमध्येगुरुः ॥ ॥ अथशनिमध्येपाचकफलंलिख्यते ॥ ॥ शनेर्विपाकेकुरुतेभिमानंमहत्सुखंलोहगतादिवृद्धिः ॥ लाभंप्रतापंचशरीरकष्टंप्रांतेददात्येवहिसूर्यपुत्रः ॥ १ ॥ धनहानिर्भवेन्नित्यंहानिशोकौभयंतथा ॥ विदेशेभ्रमणंशीलंशनेःपाकेगतोरविः ॥ २ ॥ सुखदंरोगनिर्मुक्तंलाभदंहानिजन्तथा ॥ करोतिशनिपाकेचचंद्रमांतर्गतेरवौ ॥ ३ ॥ ॥ इतिचंद्रः ॥ ॥ महीसुतेंतरगतेकलहंचउपद्रवः ॥ अग्निदाहंज्वरंतीव्रंविफलंविगतंभवेत् ॥ १ ॥ ॥ इतिभौमः ॥ ॥ सौरान्तरगतेसौम्येराजमानंकरोतिच ॥ मध्यसंपत्यगेहेचकार्यप्राप्तिःसवस्त्रदम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इतिबुधः ॥ ॥ करोतिजीवोबहुबुद्धिसौख्यंराज्याभिधंदेशपुराधिपत्यम् ॥ परोपकारंसुखसम्पदश्चकरोतिसौरेचयुरुःसदैव ॥ १ ॥ ॥ इतियुरुः ॥
॥ ददातिवित्तंभृगुनंदनःसुखंसुखार्थविद्यागमनंभवेत्स्वयम् ॥ सुनिर्मलंबाहुप्रतापयुक्तंविदेशगमनेचनरःसुखंलभेत् ॥ १ ॥ इतिशुक्रफलम् ॥ ॥ इति
शनिमध्येपाचकफलंसमाप्तम् ॥ ॥इतिसप्तग्रहाणांसंध्यापाचकदशाफलंसमाप्तम् ॥ ॥ नत्वागणेशंगिरमब्जयोनिंविष्णुंशिवंसूर्यमुखान्महेंद्रान् ॥ वक्ष्ये
स्फुटंसूर्यकृताद्यशास्त्राद्दशाक्रमंवाकिलयोगिनीजम् ॥१॥ अजनस्यविधिवत्प्रसवंविचार्यसंवत्सरंचायनमासदिनर्क्षकालैः ॥ यस्मिन्भवेद्दिवसभेजननं
जनस्यतद्भंपिनाकनयनैःसहितंविधेयम् ॥ २ ॥ गौरीशमर्त्याविभजेच्चशेषंयत्संख्यकंसैवदशाजनस्य ॥ ययाजनःकर्मफलस्यपंक्तिःशुभाशुभस्य
स्फुटतामुपैति ॥ ३ ॥ मंगला १ पिंगला २ धन्या ३ भ्रामरी ४ भद्रिकातथा ५ ॥ उल्का ६ सिद्धा ७ संकटाच ८ एतासां नामवत्फलम् ॥
॥ ४ ॥ एकंद्वौगुणवेदबाणरससप्तेष्टांकसंख्याक्रमात्स्वीस्वीयाचदशाविपाकसमयेज्ञेयंशुभंवाशुभम् ॥ षट्कृत्वाविभजेच्चषट्कृतिरसैकद्वित्रिवेदेषुषट्स
प्ताष्टघ्नदशाभवेयुरितिताएवंदशांतर्दशाः ॥ ५ ॥ गतर्क्षनाडीगुणितादयाब्दासर्वंचनाडीविहृताःफलंयत् ॥ वर्षाधिकंभुक्तफलन्ततश्चभोग्यन्दशा
याःप्रविचार्यलेख्यम् ॥ ६ ॥ ॥ अथदशाफलानिलिख्यंते ॥ ॥ सद्धर्मेद्विजदेवगोपुरमनोत्कर्षप्रदात्रीनृणांनानाभोगयशोर्थसन्नृपपराश्चेभांग
जाप्तिप्रदा ॥ सन्मांगल्यविभूषणांबरवयःस्त्रीभोगसंदायिनीज्ञानानंदकरीदशाभवतिसाज्ञेयासदामंगला ॥ ७ ॥ स्यात्पुंसांयदिपिंगलाप्रसवतोह
द्रोगशोकप्रदानानारोगकुसंगदेहमनसाव्याध्यर्दितार्तिप्रदा ॥ कृष्णासृग्ज्वरपित्तशूलमलिनस्त्रीपुत्रभृत्याप्तसन्मानध्वंसकरीधनव्ययकरीसत्प्रेमहंत्री
खला ॥ ८ ॥ धन्याधन्यतमाधनागमसुखव्यापारभोगप्रदापुंसांमानविवृद्धिदारिपुगणप्रध्वंसिनीसौख्यदा ॥ विद्याराजजनप्रबोधसुरताज्ञानाङ्कुरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्वर्द्धिनीसत्तीर्थामरसिद्धसेवनरतिर्लभ्यादशाभाग्यगाः ॥ ९ ॥ दुर्गारण्यमहीधरोपगहरोरामातपव्याकुलादूरादूरतरंभ्रमंतिमृगवत्तृष्णाकुलाःसर्वतः ॥ भूपालान्वयजादशामधिगतायेवैनृपाभ्रामरींस्वंराज्यंप्रविहायतेस्फुटतरंक्ष्माधोलुकंठेमुहुः ॥ १० ॥ सौहार्दंनिजवर्गभूसुरसुरेशावांसुहृन्मानतामाङ्गल्यंगृहमंडलेखिलमुखव्यापारसक्तंमनः ॥ राज्यंचित्रकपोलपालितिलकासप्तांगनाभिःसमःक्रीडामोदभरोदशाभवतिचेत्पुंसांहिभद्राभिधा ॥ ॥ ११ ॥ उल्काचेद्यदियोगिनीगुरुदशामानार्थगोवाहनव्यापारांबरहारिणीनृपजनक्लेशप्रदानित्यशः ॥ भृत्यापत्यकलत्रवैरजननीरम्यापहस्त्रीनृणांहृन्नेत्रोदरकर्णदानपदजोरोगःस्वदेहेभृशम् ॥ १२ ॥ सिद्धासिद्धिकरीसुभोगजननीमानार्थसंदायिनीविद्याराजजनप्रतापधनसद्धर्मप्रजज्ञानदा ॥ व्यापारांबरभूषणादिकमतोद्वाहोपिमांगल्यदासत्संगान्नृपदत्तराज्यविभवोलभ्यादशापुण्यतः ॥ १३ ॥ राज्यभ्रंशाग्निदाहोग्रहपुरनगरग्रामगोष्ठेषुपुंसांतृष्णारोगांगधातोःक्षणवीकृतिरथोपुत्रकांतावियोगः ॥ चेत्स्यान्मोहोरिभीतिःकृशतनुलतिकासंकटायाविरोधोनोमृत्युर्जन्मकालाद्यमपिहिविनासंकटंयोगिनीजम् ॥ १४ ॥ भ्रामर्यांचतथोल्कायांसंकटांतर्गताभवेत् ॥ तदातुयमराज्यस्यसदनंप्राप्यतेनृणाम् ॥ १५ ॥ ॥ इति ॥ ॥ स्वीस्वीदशायादिवसादिनिघ्नास्वांतर्दशायादिवसैःक्रमेण ॥ षड्भिर्विभक्ताघटिकास्तथाच्यस्युर्मंगलाद्याःक्रमशोनितांतम् ॥ १ ॥ मित्रपुत्रकलत्रांगव्यापारसुखदायिनी ॥ मङ्गलात्यर्थदाजातामङ्गलामङ्गलप्रदा ॥ २ ॥ कलहःस्वजनैःसार्द्धंमानसोद्वेगमेवहि ॥ विविधार्तिप्रदानित्यंपिंगलामंगलागता ॥ ३ ॥ गजाश्वगोधनप्राप्तिःसुतमित्रसुखंमहत् ॥ विलासोविविधःपुंसांधन्यास्यान्मंगलांगता ॥ ४ ॥ स्त्रीमित्रकलहोनित्यंप्रवासोधननाशनम् ॥ नरेंद्रैःसहसाङ्गल्यंभ्रामरीमंगलागता ॥ ५ ॥ धनधान्यसुतःस्त्रीभिःप्रीतिःस्यात्स्वजनैःसह ॥ प्रमोदःसुरभिज्ञोवाभद्राचेन्मंगलागता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ६ ॥ धनकीर्तिसुतोद्वेगस्त्रीमित्रपशुपीडनम् ॥ भूपतेर्हानिदानित्यंउल्कास्यान्मंगलांगता ॥ ७ ॥ भवेत्पुत्रधनस्त्रीभिर्विलासोविविधंसु
खम् ॥ बंधुमित्रसमंयोगःसिद्धाचेन्मङ्गलांगता ॥ ८ ॥ जलाग्निचौरभूपालपीडनंकलिवर्द्धनम् ॥ मृत्युतुल्यंतथाज्ञेयंसंकटामंगलांगता ॥
॥ ९ ॥ ॥ इतिमंगलाफलम् ॥ ॥ पिंगलास्वदशांप्राप्तारुक्छोकव्यसनार्तिदा ॥ मानसोद्वेगसंतापक्लेशभ्रमणदामता ॥ १० ॥ धन्याधन्या
र्थिदायित्रीविलाससुतकामदा ॥ पिंगलांतर्गतारण्यरमणीसुखदानृणाम् ॥ ११ ॥ देशत्यागोगृहग्रामेपुरलोकधनाक्षितीः ॥ कलहःस्वजनैःसार्द्धंभ्रा
मरीपिंगलागता ॥ १२ ॥ भद्राभद्रकराप्रोक्तापिंगलांतर्यदागता ॥ स्थानांतरात्पुत्रकीर्तिर्व्यापारेधनलाभदा ॥ १३ ॥ उल्कादशायदापुंसांपिंग
लामध्यतोभवेत ॥ विग्रहोबंधुभिःसार्द्धंराजचोरजनार्दनम् ॥ १४ ॥ सिद्धिदामंत्रयंत्राणांसिद्धाधान्यधनप्रदा ॥ पिङ्गलामध्यमापुंसांकासश्वासप्रमे
हदा ॥ १५ ॥ पिंगलांतर्यदाजातासंकटाधनहानिदा ॥ दुष्टव्याधिविरोधित्वंशत्रुराजभयंतथा ॥ १६ ॥ मंगलाविविधाव्याधिशोकमोहभया
र्तिदा ॥ पिंगलांतर्गतापुंसांमाससिद्धिकरीतथा ॥ १७ ॥ ॥ इतिपिंगलादशाफलम् ॥ ॥ धन्यास्वीयदशाप्राप्ताभूग्रामधनधान्यदा ॥
नृपस्वजनस्त्रीपुत्रसुखंस्याद्विविधंनृणाम् ॥ १८ ॥ धन्यांतर्भ्रामरीचेत्स्याद्भ्रमणक्लेशहानिदा ॥ अन्यस्थानाश्रयाल्लाभःस्वजनैश्चविरोधता ॥ १९ ॥
भद्रासौभाग्यजननीग्रहमित्रसुखप्रदा ॥ धन्यांतर्नृपमंत्रीशवाहनाबरभूमिदा ॥ २० ॥ विविधङ्कष्टमुत्पातमुल्काधन्यान्तरङ्गता ॥ तत्रहृत्कटिशू
लादिपीडनंधननाशनम् ॥ २१ ॥ सिद्धाधन्यांतरंयातासुतमित्रोत्सवप्रदा ॥ नानाभोगप्रदानित्यंज्ञेयासातुविचक्षणैः ॥ २२ ॥ धन्यासूपगता
यत्रसंकटाबंधनप्रदा ॥ नीतिव्यापारभूपालमानसोत्साहदामता ॥ २३ ॥ पिंगलायदिधन्यांतर्व्यवधाहस्तभूधनः ॥ सोत्साहीनृपतेर्द्वारिशिरोरु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृशूलभासरः ॥ २४ ॥ ॥ इतिधन्याफलम् ॥ ॥ भ्रामरीस्वदशामध्येभ्रातिमोहविशार्तिदा ॥ स्वस्थानेस्वजनेशैलोवैरि
भद्रातुभ्रामरीमध्येविदेशगमनंभवेत् ॥ निज मित्रसमायोगोविद्यासन्मानभूपतिः ॥ २६ ॥ उल्कातुभ्रामरीमध्येज्वरशूल
कलत्रांगपीडाहानिकरीमता ॥ २७ ॥ सिद्धासिद्धिप्रदानित्यंभ्रामरीमध्यतोयदा ॥ विवेकविद्यानिधिदाभयरोगार्तिनाशव
णंक्लेशोशोकंमोहंगतंगदः ॥ राजचोरजनख्यातिपदाभ्रामरिमध्यगा ॥ २९ ॥ विलासोविविधंसौख्यंनृपसेवातिपुष्टता
लासहमंगला ॥ ३० ॥ पिंगलाभ्रामरीमध्येगुदांघ्रिमुखरोगदा ॥ गजाश्वमहिषव्याघ्रव्रणभीतिप्रदाभवेत् ॥ ३१ ॥
हनभागदां ॥ नृपैःप्रीतिकराभिल्लैर्वैरहानिकरामता ॥ ३२ ॥ ॥ इतिभ्रामरीदशाफलम् ॥ ॥ भद्राभद्रगतायत्रयश
नार्तिहरापुण्यमार्गरोधकरीमता ॥ ३३ ॥ उल्काभद्रातरंयाताविवादकृतरोगदा ॥ स्थानभ्रंशोद्रव्यहानिकारण्युद्वेगदायि
भद्रांतर्गताद्विजदेवार्चनेरतिः ॥ पुत्रमित्रकलत्रांगगृहग्रामजनोत्सवान् ॥ ३५ ॥ भद्रादशांसमायातासंकटासंकटार्तिद
भ्रांतिदेशइहार्त्तिदा ॥ ३६ ॥ सन्मानधनभूकीर्तिव्यापारेसुतसौख्यदा ॥ मङ्गलाभद्रिकामध्येपितृवंशविवृद्धिदा ॥ ३७
पिंगलापित्तरोगदा ॥ कृषिवाणिज्यभूवृद्धाश्रयतोविविधप्रदा ॥ ३८ ॥ रुधिराग्नियमाद्भीतिर्भद्रायांभ्रामरीयदा ॥ गृहक्षे
सुखम् ॥ ३९ ॥ ॥ इतिभद्रतार्दशाफलम् ॥ ॥ शत्रुभिःसाहसंहानिर्द्रव्यस्यमहतीव्यथा ॥ उल्कामध्येयद्युल्काचराज्य
सिद्धानुस्वफलंत्युक्तंपरस्यफलदायिनी ॥ उल्कान्तरंसमायाताविदेशगमनप्रदा ॥ ४१ ॥ उल्कायामध्यगायत्रसंकटा

	की०	डा.म.
	२–८	०–६
	२–०	०–४
	०–२	०–॥
	०–४	०–॥
मक	१–४	०–३
	१–०	०–३
	०–३	०–॥

मुम्बई.

Nepal Sanskrit University, Balmeeki Campus Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पीड

श्वजनहानिर्निजकुलक्षयः ॥ ४२ ॥ उल्कायामध्यगायत्रमंगलामोहकारिणी ॥ धनमित्रविवेकस्त्रीसुखदामल्हा
रोगैःपीडितोधरणीतले ॥ भ्रमतेनात्रसन्देहोयद्युल्कायांतुपिङ्गला ॥ ४४ ॥ नोलाभोनसुखंकिंचिद्धातव्याधिकफोदयः
स्त्रीपुत्रस्वजनैःकलिः ॥ ४५ ॥ उद्विग्नमानसंमोहोभ्रमःपुंसोरिभंजयम् ॥ नानाक्लेशसमायोगोभ्रामर्युल्कांतरंगता ॥ ४६
द्राभद्रार्थदायिनी ॥ भूषणांबरहानिःस्यात्कुलमित्रजनात्सुखम् ॥ ४७ ॥ इतिउल्कादशाफलम् ॥ ॥ सिद्धासिद्धार्थसंदा
सिद्धायामथवैश्वर्यसुखमित्रसुखप्रदा ॥ ४८ ॥ बन्धनंनृपचौरेभ्योधनहानिर्महद्भयम् ॥ देशत्यागोभवेन्नूनंसिद्धायांसङ्कटा
स्वजनैःसौख्यंधनलब्धिर्नृपाद्भवेत् ॥ मङ्गलासिद्धिदासिद्धासंगताविविधायदा ॥ ५० ॥ सिद्धायांपिंगलायांतुमानंक्रोधा
जैःसार्द्धंपरद्रव्याभिधारणम् ॥ ५१ ॥ पुंसांधन्यातुसिद्धायांप्राक्पुण्यनिचयोभवेत ॥ ॥ मनःप्रकल्पितंसर्वंसिद्धिमायातिस
दिसंप्राप्तासिद्धायांयस्यजन्मनि ॥ स्वस्थानाद्व्यसनैस्त्यागान्ननुराजकुलाद्भयम् ॥ ५३ ॥ मांगल्यंभौमजननीविधाशोध
दाभद्रासिद्धायामुपजायते ॥ ५४ ॥ उल्कासिद्धांसमापन्नाधनधान्यविनाशिनी ॥ क्लेशशोकव्यसनदायुद्दरुग्मोहकारिणी
सिद्धाफलम् ॥ ॥ संकटास्वदशांप्राप्ताकरोतिमरणंध्रुवम् ॥ राजवंशाच्चहानिश्चदेशत्यागोधनक्षयः ॥ ५६ ॥ शिरोरु
सनैस्तथा ॥ कलत्रंजीवतिनरोमंगलासंकटागता ॥ ५७ ॥ अकस्माद्धनहानिःस्यात्पुत्रशोकोरिजंभयम् ॥ पिंगलासंक
सह ॥ ५८ ॥ गुल्मोदरकृतापीडानिजेषुप्रमुखंमहत ॥ स्वदेशजनताकीर्तिर्धन्यातुसंकटांगता ॥ ५९ ॥ भ्रामरीसंकटां

त्रधनस्त्रीभिर्विलासोविविधंसु
तथाज्ञेयंसंकटामंगलांगता ॥
ा ॥ १० ॥ धन्याधन्या
॥ कलहःस्वजनैःसार्द्धंभ्रा
उल्कादशायदापुंसांपिंग
मध्यमापुंसांकासश्वासप्रमे
विधाव्याधिशोकमोहभया
ाप्ताभृग्रामधनधान्यदा ॥
जनैश्चविरोधता ॥ १९ ॥
तरङ्गता ॥ तत्रहृत्कटिशू
॥ २२ ॥ धन्यासूपगता
सोत्साहीनृपतेर्द्वारिशिरोरु

पद्ध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देशग्रामपुरद्वारराज्यभ्रंशोरिजंभयम् ॥ ६० ॥ विद्यालङ्कारवस्त्राणिविविधानिमहद्यशः ॥ विग्रहोन्यजनःसार्द्धंभद्राचेत्संक
पातधनग्रामहारिणीमृत्युकारिणी ॥ संकटामन्तरेणैवपशुमात्रकुलार्दनः ॥ ६२ ॥ उत्साहोविविधःपुंसांनिजपुत्रसुखोद
तिसिद्धाचेत्संकटांगता ॥ ६३ ॥ ॥ इतियोगिनीदशाफलंसमाप्तम् ॥ ॥ आसीद्गुर्जरमंडलेद्विजवरःशांडिल्यगोत्रो
नमणिर्ज्योतिर्विदामग्रणीः ॥ श्रौतस्मार्तरतोजनार्दनइतिख्यातःस्वकीयैर्गुणैस्तत्सूनुर्हरजीदशांस्फुटतरांचक्रेपरांयोगिनीम् ।
भूमिपत्रश्चांद्रिर्मंदोभार्गवःसैंहिकेयः ॥ एतेनाथामंगलांतःप्रदिष्टासौम्याःसौम्यानामनिष्टाःखलानाम् ॥ २ ॥ यःखेटोस्तग
तोयथावर्षेशाद्रिपुतोहितस्यगदितासर्वादशामध्यमाः ॥ यश्चोच्चस्थलमाश्रितःस्वभवनेमूलत्रिकोणेखगोमित्रागारसुपागतो
ख्यदा ॥ ३ ॥ ॥ कस्याप्येते ॥ ॥ पिंगलातोभवेत्सूर्योमङ्गलातोनिशाकरः ॥ भ्रामरीतोभवेत्क्ष्माजोधन्यातो
भद्रिकातोगुरुरभूत्सिद्धतःकविसंभवः ॥ उल्कातोभानुतनयःसंकटातोअभूत्तमाः ॥ ५ ॥ अस्याएवदशान्तेचकेर
॥ इतिरुद्रयामलेयोगिनीदशक्रमःसमाप्तः ॥ ॥ शुभंभवतु ॥ ॥ समाप्तोऽयंग्रंथः ॥ ॥ ॥

इदं पुस्तकं मुम्बय्या भगीरथात्मजेन हरिप्रसादेन "नेटीवओपिनियन" मुद्रणयन्त्रालयेऽङ्कयि
प्रकाशितम् । संवत् १९६०, शके १८२५.

	की०	दा.म.
पुष्पधाराटीका	२–८	०–६
....	२–०	०–४
....	०–२	०–॥
भाषाटीका इसमें		
खनेका विचारहै.	०–४	०–॥
सटीक तन्त्रयात्मक		
....	१–४	०–३
कागद	१–०	०–३
मन्थाफलसहित)	०–३	०–॥

रामवाड़ी, मुम्बई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दैवज्ञ हरिभद्रसूरिविरचित

ताजिकसार सटीक ।

इसमें ग्रंथकर्ताने जन्मकुण्डली वर्षकुण्डली आदिमें अधिक उपयोगी ग्रहस्पष्टीकरणादि गणितविषयका सविस्तर नि
फलादि उपयुक्त फलित विषयकाभी व्यष्टिरूपसे वर्णन किया है और अन्तमें गणितके आधारसे चमत्कृतिकारक, त्रिका
मुष्टिप्रश्न आदि उत्कृष्ट प्रश्नविषयका विस्तारपूर्वक स्पष्ट विवरण करके ग्रंथको पूर्ण किया है. ज्योतिर्विन्महाशयो ! यहां
गया है, सो दिग्दर्शनमात्र है; किन्तु समस्त गुण आद्योपान्त अवलोकन करनेपरही विदित होंगे. तिसपर जो संस्कृत
तथा सोदाहरण है. जिससें पाठकोंको ग्रंथका मर्म अनायास अवगत हो सक्ता है. ऐसे उत्तम और पुरातन ग्रंथका अ
होनेसे ग्रंथके न होनेका ख्याल होता था. यहांतक कि अधिकांश ज्योतिषी इसका नामभी न जानते थे. ऐसी अवस्था
साथ अधिकतर अन्वेषणाद्वारा प्राप्त करके सुवाच्य टाईपके अक्षरोंमें स्निग्ध व पुष्ट कागजपर छापके प्रसिद्ध किया है. मू

हरिप्रसाद भगीरथजीका—

पुस्तकालय—कालकादेवीरोड, रामवाड़ी, मुम्ब

पद्ध

नस्त्रीभिर्विलासोविविधंसु
ज्ञेयंसंकटामंगलांगता ॥
ता ॥ १० ॥ धन्याधन्या
॥ कलहःस्वजनैःसार्द्धंभ्रा
उल्कादशायदापुंसांपिंग
मध्यमापुंसांकासश्वासप्रमे
विधाव्याधिशोकमोहभया
प्राप्ताभूग्रामधनधान्यदा ॥
जनैश्चविरोधता ॥ १९ ॥
न्तरङ्गता ॥ तत्रहृत्कटिशू
॥ २२ ॥ धन्यासूपगता
सोत्साहीनृपतेर्द्वारिशिरोरु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विक्रयार्थ तैयार ।

नाम०	की०	डा.म.
बृहत् पाराशर, केवल उत्तरभाग ...	०–४	०–१
बृहज्जातक सटीक	१–४	०–४
ग्रहलाघव सटीक	०–१२	०–२
चमत्काराचन्तामणि सान्वय भाषाटीका	०–४	०–१
जातकाभरण	०–१२	०–२
जातकालंकार सटीक	०–६	०–१
जातकालंकार सान्वयभाषाटीकासह	०–६	०–१
लघुपाराशरी सटीक	०–३	०–१
लघुपाराशरी भाषाटीका....	०–३	०–॥

नाम.	की०	डा.म.
मुहूर्तगणपति	०–१२	०–२
मुहूर्तमार्तण्ड सटीक....	०–१२	––२
मुहूर्तचिन्तमणि प्रमिताक्षरा टीका सुन्दर जिल्दबन्द ग्लेज	१–८	०–४
,, ,, तथा रफ कागद	१–०	०–४
,, ,, खुलापत्रा. रफ कागद....	१–४	०–३
,, ,, तथा ग्लेज कागद	१–८	०–३
,, ,, भाषाटीका रफ कागद	०–१४	०–३
,, ,, भाषाटीका ग्लेज कागद	१–४	०–३

नाम.	की०	डा.म.
मुहूर्तचिन्तामणि पीयुषधाराटीका	२–८	०–६
महादेवीसारणी	२–०	०–४
बालबोध ज्योतिष	०–२	०–॥
अर्धप्रकाश ज्योतिष भाषाटीका इसमें तेजी मंदी वस्तु देखनेका विचारहै.	०–४	०–॥
ताजिकनीलकण्ठी सटीक तन्त्रयात्मक परमोत्तम	१–४	०–३
,, ,, तथा रफ कागद	१–०	०–३
पञ्चकोश भाषाटीका (मुन्थाफलसहित)	०–३	०–॥

पुस्तक मिलनेका ठिकाना—हरिप्रसाद भगीरथजीका—पुस्तकालय—कालकादेवीरोड़, रामवाड़ी, मुम्बई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४०२२

॥ इति मानसागरीपद्धतिः समाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu